श्रीमदानन्दतीर्थभगवत्पादविरचितं चित्रकाव्यं

श्रीमहाभारततात्पर्य्यम्

श्रीनरहरितीर्थविरचितया श्रीकृष्णप्रकाशिकया
आचार्यगोविन्दविरचितया श्रीकृष्णचन्द्रिकया च सहितम्।

[ससंहितापाठं सपदपाठं च]

*

शोधयिता–सम्पादयिता
बन्नञ्जेपदोपाह्व आचार्यगोविन्दः

*

ईशावास्य-प्रतिष्ठानम्
उडुपि-बेङ्गळूर्
२००६

MAHĀBHĀRATA-TĀTPARYAM : A Citra-kaya by Sri Ananda-Thirtha-Bhagavat-pada; with ŚRĪ-KṚṢṆA-PRAKĀŚIKĀ, a commentary by Sri Narahari Thirtha and ŚRĪ-KṚṢṆA-CANDRIKĀ by Bannanje Govindacharya.

Edited by: Bannanje Govindacharya.

Published by : Īśāvāsya Pratiṣṭhānam, Udupi-Bangalore
Regd. office : Īśāvāsyam, Ambalapadi, Udupi- 576 103
Phone : (0820)2521047

First Edition : 2006, April 30 (500 copies)

Pages : 34+202

Price : Rs.80/-

Cover design
& sketches : Ganjeefa Raghupati Bhat
K.M. Sheshagiri

Typeset : Kaddi Badari Narayana Achar
Poornaprajna Vidya Peetha,
Bangalore-560028

Printed at : Rajaprakash Prints
No. 142, I main road, Chamarajpet,
Bangalore -560 018
Phone: (080) 26521515

distributors : Bannanje Associates
Īśāvāsyam, Ambalapadi, Udupi- 576 103
Phone : (0820)2521047

यत् पपाथ भगवद्गुणपाथो यज्जगन्थ भवसागरपारम् ।
यत् सतामुवचिथ प्रियतत्वं तेन मध्व सुहृदध्वनि भूयाः ॥

श्रीमध्वप्रियशिष्यं प्रकटितभारततात्पर्यसहजभावम् ।
श्रीनरहरिपदभक्तं श्रितपरमार्थं नमामि नरहरितीर्थम् ॥

कृतज्ञा वयम्

अस्यापूर्वस्य प्रत्नस्य ग्रन्थरत्नस्य मुद्रणे प्रकाशने च बहवो महान्तः सहृदया दत्तहस्तावलम्बाः । गणकयन्त्रद्वाराऽक्षरविन्यासे विद्याविनयसम्पन्नस्य श्रीमतः कड्डीपदोपाह्वस्य बदरीनारायणाचार्यस्यापारः सहकारः न केवलं कृतज्ञताव्याहारमात्रेणाऽनृण्यमर्हति । आचार्यपादसपर्यायाम्, तत्ववादपरिरक्षायां च बद्धपरिकरोऽयम् । स एव भगवानाचार्यस्तमनुगृह्णातु ।

मुद्राक्षरशोधने च बहवः सहायन्त । विशिष्य चैते सकार्तज्ञ्यं स्मर्तव्याः, येभ्यो भीतः प्रायः पलायत मुद्राराक्षसः– श्रीलः पर्कळ वेङ्कटेश बायरी, युवानौ विद्वांसौ श्रीलौ विजयसिंह-कृष्णराजभट्टौ ।

तेषामेतया निस्पृहया पुनरुपचिकीर्षया नूनमधमर्णा वयम् । तेषां केवलं साञ्जलिबन्धं परं श्रेयः प्रशास्महे ।

श्रीमान् रघुपतिभट्टः स्वीयकलाविन्यासवैशारद्येन पुस्तकस्यास्य बहिरन्तः सुषमामतिशाययति स्म । युवकलावित् श्रीमान् शेषगिरिनामधेयश्च बन्धरेखाविन्यासादिना कृतपरमोपकारः । एतयोरुभयोरपि कलाभिज्ञयोः सहार्दां कृतज्ञतामर्पयामः ।

मनोज्ञमुद्रणे सदा दर्शितादरः, ‘राजप्रकाश प्रिण्ट्स्’ इति प्रथितस्य मुद्रणालयस्य निर्वोढा श्रीप्रकाश इति सुगृहीतनामधेयः, तस्य कर्मकरास्तान्त्रिकाश्च मुद्रणकार्यं समर्थं निरवहन्निति तेभ्योऽपि नः कृतज्ञताकुसुममालिकेयम् ।

बहवश्चात्र मुद्रणादिव्ययभारं स्वभुजयोरूढ्वाऽपि प्रचारपराङ्मुखा वदान्याः । तेषां सर्वेषामपि भगवतो भगवत्पादस्य च निरन्तरामनुग्रहपरम्परामाशास्महे ।

शा. शकसं.१९२९, व्ययसं.
वैशाखशु. तृतीया भानुवासरः
(**क्रि.श.**2006 **एप्रिल्** 30)

प्रकाशनसमितिः
ईशावास्यप्रकाशनम्
(**उडुपि-बेङ्गळूरु**)

✻ ✻ ✻

प्रथमं वचनम्

प्रतनं वचनम्; न किमपि नूतनम्; अथापि प्रथमं वक्तव्यं वचनमितीदं प्रवचनमारभामहे । महाभारततात्पर्यमहार्णवमिमङ्क्षया जिगमिषूणामिदं वेलोद्यानम् । तत्पुरं प्रविविक्षूणामिदं गोपुरम् । भगवत्पादकृतिसौधमारुरुक्षूणामियं सोपानसरणिः ।

भगवत्पादरचितेषु परिचत्वारिंशेषु प्रबन्धेषु विशिष्टं विलक्षणं चेदं महाभारत-तात्पर्यं नाम चित्रकाव्यम् । इदमेव प्रथमं चित्रं यत् तत्ववादिनामग्रणीः श्रीमध्व-श्चित्रकाव्यं प्रणिनायेति । तदिदं काव्यमधिकृत्य स्वयं महाकविर्ग्रथिता-नेकचित्रकाव्यः पुनरनयैव चित्रशैल्या प्रबद्धपारिजातहरणः श्रीनारायणपण्डितः श्रीमध्वविजये एवमुवाच–

> 'भगवंश्चित्रकवितां लौकिकीं दर्शयन् किल ।
> गोप्यं भारतसङ्क्षेपमकृथा विश्वविस्मयम्' (१५.८३) इति ।

मूलतः त्रिविक्रमपण्डिताचार्यस्य वचोविलासोऽयम् । तेनोदितं तत्तनयः काव्येऽनूवाद । अनुव्याख्यानरचनार्थमाचार्यमध्वं प्रार्थयमानेन श्रीत्रिविक्रम-पण्डितेन कविगणमूर्धन्येन चित्रकाव्यमिदमेवं प्राशंसि ।

किं गोप्यं भारततात्पर्ये? इदमिह चिन्तनीयम् । भारते पाण्डवानां कथा किल प्राधान्येन कथिता । अथापि क इह कथानायकः? कृष्ण एव । न पाण्डवाः । यद्यपि कथानायिका द्रौपदी । अथापि न पाण्डवेष्वेको नायकः । किन्तु कृष्ण एव । तेन कृष्ण एव भगवान् सर्वभारतप्रतिपाद्य इति भारतसङ्क्षेपः । अतः पण्डिताचार्यः– 'गोप्यं भारतसङ्क्षेपमकृथाः' इत्याह ।

मुखतः पाण्डवानां कथा । अन्तर्वाहिनी तु कृष्णकथा । अतः स्वयमाचार्य उदघोषयदेतद्ग्रन्थान्ते– 'कृष्णकथेयं यमिता' इति । अतो महाभारतस्येदं महातात्पर्यम्– यत् पाण्डवानां चरितस्य वर्णनद्वारा दुष्टदमनायावतीर्णस्य कृष्णस्य महिमोद्घाटनम् । तदेतत् करुणया बुबोधयिषन्नाचार्यः ग्रन्थस्यास्य समुचिततरं नाम चकार 'महाभारततात्पर्यम्' इति । पुराणवचनं चात्र संवदते– 'वासुदेवस्य महिमा भारते निर्णयोदितः' इति ।

द्वितीयं गोप्यं भीममहिमा । मुखतः अर्जुनमहिमा । अथापि अन्तर्वाहिनी भीमसेनमहिमैव । तदिदं भारतगोप्यमत्र स्फुटीकृतम् । 'यद्धरितं विष-सर्पप्रभृतिध्वान्तं न मारुतिं विषसर्प' (३०), 'भीमे प्रीतिममे याम्–'(३१), 'तं स्वात्मेन्द्रवरेण व्युधुनोद् भीमेन–' (३९), 'यद्बलवान्–'(४६) , 'यद्बल-भारवहत्वात्–'(४७) 'यद्भक्तप्रवरेण–'(५०) 'यद्धरितो भरताभः–' (५९) इत्यादिना । तथाच भरतस्य भगवत इदं भारतं मुख्यतः । ततः भगवता भरितस्य अत एव भरताख्यस्य प्राणावतारस्य भरतस्येदं कथानकं भारतम् । अन्ते च भरतानामयमितिहासो भारतमिति त्रेधा भारतपदार्थं सूचयता त्रिविधं भारतगुह्यमप्याविष्कृतम् । अपिच 'दशार्थाः सर्वभारते' इत्युक्तमप्यत्रैव स्फुटीकृतम् । दशावतारपरतया दशार्थाः सर्वभारतस्येति परं गोप्यमत्रैव प्रथममाविश्चकार भगवत्पादः । तदपि नरहरितीर्थैनैव प्रकटीकृतम्– 'भारताख्यानविषयः प्राधान्येनोक्तमार्गतः । श्रीकृष्णरूपमथवा सर्वान्तर्यामिकं परम् । आस्तिकादिप्रकारेण तथा मन्वादिना क्रमात् । तद्वन्मत्स्यादिरूपाणि सर्वाणीत्यवधार्यताम्'(७०) इत्यादिना ।

तथाच द्वेधाऽस्य निर्वचनं भवति । फलपरतया च हेतुपरतया च । महाभारतस्य तात्पर्यं महाभारततात्पर्यमिति; महाभारतस्य तात्पर्यं निर्णीयतेऽत्रेति महा-भारततात्पर्यमिति ।

एवमर्थवैपुल्ये स्थितेऽपि यत् पाश्चात्या नामान्तरं चक्रुस्तन्मूलहृदयापह्नवाद-पचार इव । भवतु; यस्य यत्राऽदरस्तस्य तन्नामैव शोभते । अथापि यदि

चित्रभारतमिति वा सङ्ग्रहभारतमिति वा नामाकरिष्यन्, इतोऽपि सुन्दरमभविष्यत्; पण्डिताचार्यवचनं चानुसृतमभविष्यत् । यथा सर्वशास्त्रार्थसङ्ग्रहमणुभाष्यं व्याहरन्– 'त्वयाऽणौ भाष्यसङ्ग्रहे' इति वचनमनुस्मरन्तः, 'सङ्ग्रहभाष्यम्' इति च ।

तदिदं चित्रकाव्यं विश्वविस्मयमित्याह स्वयं सद्यःकवितारचनपटुः पण्डिताचार्यः । किमत्र समग्रस्य विश्वस्य विस्मयावहम्? अयमेव तावत् प्रथमो विस्मयः यत् स्वयमुषाहरणे, अनुपरूढश्मश्रुण्येव वयसि, प्रकटितचित्रकविताचातुर्यः, अथच वयसा शास्त्रेण च प्रबुद्धस्तत्वप्रदीपे प्रकटितापूर्वानवद्यगद्यशैलीसौन्दर्यः कविवर्यः सतात्पर्यं सबहुमानं विस्मयमान आह । प्रबन्धुरेव मुखात् प्रबन्धस्यास्य विश्वविस्मयमर्थसार्थं श्रुतवतां युक्ततरोऽयं व्याहारः ।

स्फुटमेतत् श्रीमध्वगुरोः साक्षाच्छिष्येण कळिङ्गराज्यनिर्वहणे वेदान्तसाम्राज्यनिर्वहणे च दर्शितसमानसामर्थ्येन श्रीनरहरितीर्थेन विरचितामुद्घाटितहृदयकवाटां टीकां निर्वर्णयतां विपश्चिताम् । गुरुभावव्यञ्जनेऽद्भुतमसाधारणं च कौशलं तत्रभवतः श्रीनरहरितीर्थयतेः । अयमपि किल स्वयं गुरुमुखादेव श्रुतगुरुभावः । तेन गुरुभावं व्यञ्जयन्ती भाति श्रीनरहरितीर्थवागपि, वैदिकीं शैलीमनुसरन्ती रञ्जयन्ती वैदिकजनमनांसि च ।

प्रायश्चित्रकाव्येषु विवक्षिताक्षरनियतिनिर्वाहार्थं यथाकथाचापुष्टार्थान्यपि पदानि प्रयुञ्जते स्म महाकवयोऽपि । अत्र पुनर्नैकमपि पदम्, नहिनहि, नैकमप्यक्षरमपुष्टार्थमल्पार्थं वेति महदिदं विस्मयस्थानं वागर्थसम्पृक्तिविदामपि विदुषाम् । अत्र हि प्रायः प्रतिपदमनेकार्था विलसन्ति । एकैकोऽप्यर्थः पूर्ववर्णितार्थोपक्षिप्तस्य संशयस्य समाधानरूप इति नूनमत्यद्भुतेयं चातुरी ।

उदाहरणार्थं श्रीनरहरितीर्थीयं वासुदेव-नवासुदेवपदयोर्विवरणमवलोकनीयम् (प.४)–

अजातोऽपि हरिः सोऽयं वासुदेवोऽभिधीयते ।
वसुदेवाख्यसंशुद्धमनसो विषयत्वतः ॥

ज्ञानरूपोऽसुदेवोऽयमथवा ज्ञानरूपिणा ।
असुरानसुमुख्येन भीमेनैव जिगीषति ॥

सहितः क्रीडते तेन तेन व्यवहरत्यपि ।
तेन द्योतोऽस्य लोकेषु स्तूयते तेन सर्वदा ॥

तस्माच्च कमनीयोऽयं तेनैव सह गच्छति ।
अन्यैरपि स वै गम्यस्तत्प्रसादेन नान्यथा ॥

एवं स वासुदेवः स्यान्नान्यापत्यत्वतः क्वचित् ।
नवासुदेव एवायं हृषीकाणामधीश्वरः ॥

नवासवो विमुक्ता वा जरानुपहतेन्द्रियाः ।
तैरयं क्रीडते देवः स्वीयैर्वा नूतनेन्द्रियैः ॥

अत्र वासुदेवशब्दस्य दशार्थाः नवासुदेवपदस्य च त्रयोऽर्थाः कथिताः । तदिदं 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते' इति पुराणवचनं पुनः स्मारयतीव ।

अथ वृन्दावनशब्दस्यार्थवैपुल्यमवलोक्यताम् (प.१७)–

गोपगोपीगवां वृन्दस्यावनं यत्र वै हरेः ।
यद्वा तद्वृन्दसंसेव्यमा समन्ताद् यदञ्जसा ॥

वृन्दैरासेव्यमानो वा यत्र सन्निहितो हरिः ।
तद्धि वृन्दावनं गोपास्तत्राऽवासमचीक्लृपन् ॥

सभङ्गश्लेषेष्वपि (प.३)–

रमाऽपि नैव जानाति साकल्याद् यन्मनोगतम् ।
न किञ्चिद् वास्तवं तस्य नाऽगम्यं कस्यचिन्मनः ॥

अथवा नमनो यस्याऽनन्तं नित्यसुखं लभेत् ॥

अगम्यं हेतुभिर्वाऽन्यैर्यस्य धाम चिदात्मकम् ।

अत्र 'नमनोगम्' इति मूलपदम्– 'न मनोगम्', 'न मनः अगम्', 'नमनः अगम्' इति त्रेधा विभज्य पञ्चधा व्याख्यातम् । 'मनोगम्' इत्येतदपि 'मनः+गम्' इति, मनः+अगम्' इति द्वेधा विभज्यार्थविशेष उपवर्णितः । एवमन्यत्रापि । अनेन च श्लेषपथेनानेके प्रमेयविशेषा जिज्ञासतामन्तेवासिनामवगमिता भवन्ति; अनेकाश्च शङ्का निरस्ता भवन्तीति स्फुटं शास्त्रेष्वधीतिनाम् ।

यद्यपि क्वचित् क्लिष्टा यमकशैली विद्वज्जनमात्ररञ्जनी भवति । यथा विप्रश्रियमवतेति वक्तव्ये 'विप्रेमवता' इत्याह (प.६४) । 'सुखगेशवतः' इति वक्तव्ये 'तृतीयोऽतिशये' इति वैदिकं पन्थानमनुपतन् 'सुखकेशवतः' इत्याह श्लेषनिर्वाहाय (प.७८) । अथाप्यल्पज्ञानां विनेयानामपि सुखेन बोधाय चामितमोदाय च सरळामपि श्लेषभङ्गशैलीं सलीलं प्रयुञ्जान आचार्यः विदुषां चाविदुषां च समानं चित्तमावर्जयति । तद्यथा–

तत्र यशोदा तनयं
मेने कृष्णं स्वकीयमवदातनयम् । (६)

तत्र च पूतनिकाया
वधमकरोद् यन्निजाः सुपूतनिकायाः । (७)

(अयं सभङ्गो विभक्तिश्लेषः । पूतनिकाया इति षष्ठी; सुपूतनिकाया इति प्रथमा । तेन विभक्तिश्लेष । बहुवचनैकवचनयोर्विभक्तिश्लेषोऽपि । एवं स्त्रीलिङ्गपुल्लिङ्गयोः संश्लेषाल्लिङ्गश्लेषोऽपि । एवमन्यत्राप्यूह्यम् ।)

यस्य च पर्यङ्कोयं
पूर्वतनो विष्णुमजसपर्यङ्कोयम् । (११)

अमुषन्नवनीतमदः
स्वगोकुले गोपिकासुनवनीतमदः । (१३)

तन्माता कोपमिता
तमनुससारात्मवादवाकोपमिता । (१४)

अनयद्दामोदरतां
योऽरमयत्सुन्दरीन्निजामोदरताम् । (१५)

प्रद्युम्नं मोदरतः
प्राप ज्येष्ठं हरिस्सुतम्मोदरतः । (२९)

शक्रपुरीमभियातः
प्रादाद्वह्नेर्वनं सतामभियातः । (३८)

पूजा तेनावापि
च्छिन्नश्चैद्यस्स्मृतिङ्गते नावापि ॥ (४१)

अजयद्रुद्रश्च रणे
बाणार्थेवनतिपतितकचन्द्रश्चरणे । (४२)

पार्त्थार्त्थे बहुतनुतां
यत्र प्राकाशयत्स्वयं सवहुतनुताम् । (५५)

कृष्णाभीमाप्ततमः
शीर्ण्णं येन स्वकीयहृदयमाप्ततमः । (६१)

भीमविपाटितदेहा-
नदर्शयत्स्वानरीन् विपाटितदेहान् । (६२)

नैव परः केशवतः
परमादस्मात्समश्च सुखकेशवतः । (७८)

कियन्तीत्युदाह्रियन्ते । सेयं भगवत्पादस्य यमकक्रीडा । समानाक्षराणि सभङ्गान्यभङ्गानि च पदानि 'मां स्वीकुरु, मां स्वीकुरु' इति प्रार्थयमानानि तत्पुरः परिनृत्यन्तीव । तदिदं मन्दप्रज्ञानामपि मनोऽमन्दमानन्दयति ।

तेनास्मिन्नपि चित्रकाव्ये सार्थकं पण्डिताचार्यवचनम्–'बालसङ्घमपि बोधयद् भृशं दुर्निरूपवचनं च पण्डितैः'(म.वि.९.१०) इति ।

एवं विलोमानुलोमपद्यमपि–

रामराममहाबाहोमायातेसुदुरासदा ।
वादसाददकोलोकेपादावेवतवासजेत् ।। (७१)

सर्वाणि ललितानि सुगमानि च पदानि । सोऽयमक्लेशः श्लेषो नाम । किं कोऽपि प्रभवेदूहितुमपि यदिदं व्यत्यस्य पठितं सत् श्लोकान्तरं भवतीति । स्वप्नेऽप्यनालोचितं श्लोकान्तरं समभवदेव–

'जेत्सवातववेदापाकेलोकोददसादवा ।
'दासरादुसुतेयामाहोवाहाममरामरा ।।'

न केवलं श्लोकान्तरम् । अत्र पुनरुक्तिप्रत्युक्तिश्लेषोऽपि । तथाहि प्रश्नः– 'लोके कस्तव पादावेवाऽसजेत्?' इति । 'को ब्रह्मा पादावेव तवाऽसजेत्' इत्युत्तरम् । नूनमत्यद्भुतेयं चातुरी ।

एवमेकाक्षरचित्रमपि (प.७७) नेदृशं क्वापि दृष्टचरम् । न केनापि कवि-तल्लजेन ग्रथितचरम् । अन्यत् सर्वमेकव्यञ्जनं चेत् नैकस्वरम्; एकस्वरं चेन्नैकव्यञ्जनम् । तदिदमुभयमेकस्वरं चैकव्यञ्जनं च, 'भाभा...' इति पद्य-माचार्योपक्रमम् । अत एव महाकवयोऽपि विस्मयेन नसि न्यस्ताङ्गुलयो मुक्तगळं प्रणिजगदुः 'तदिदं विश्वविस्मयम्' इति ।

अपि च अन्यदप्यत्र विस्मयावहमस्ति । एकाक्षरं पद्यं कथञ्चिदेकार्थं तदपि क्लिष्टार्थं भवति सर्वत्र । इदं च प्रतिवर्णं सुस्पष्टं भिन्नार्थं सदपि समस्त-पदतयाऽपि परःशतार्थम् । तदिदमस्माभिस्तद्व्याख्यानावसरे किञ्चिदिव विवृतम् । समग्रे गीर्बाणवाङ्मये पुनरीदृशी काचिदन्या रचना न दृष्टचरेति निर्मत्सरैः सुधीभिर्विभावनीयम् । एवम्, 'देवानां पतयो नित्यम्–' इति

(७२) इति पद्यम् । अपूर्वबन्धनिबद्धमिदम् । अथापि बन्धगन्धोऽपि विदुषामपि मुखतो न प्रतीयते ।

एवं बहून्यत्र विश्वविस्मयावहानि प्रमेयजातानि परिस्फुरन्ति शर्कराक्षाणां विचक्षणानामक्षरमुखानाम् ।

✻

ननु परमवैदिक आचार्यः किमिति लौकिकीं चित्रकविताचातुरीमदिदर्शयिषत्? अत्रैवं सम्प्रदायविद आभाणकमाभणन्ति–

कदाचिद् भगवानाचार्यः क्वचिद् विद्वत्सभायां वेदमन्त्रान् व्याचक्षाण आसीत् । अथ तत्र ये भागभाजो याज्ञिकास्त आचार्योक्तार्थे विवदमाना बभूवुः । आचार्येण च समर्थितः स्वोक्तोऽर्थः सयज्ञप्रक्रियं सप्रमाणोपन्या-सम् । निरुपायाः पण्डिता मुद्रितमुखास्तूष्णीमासन् ।

अथापि यथाकथाचाऽचार्यो निग्रहीतव्य इति दुराग्रहग्रहगृहीतः कश्चिद् विपश्चित् प्रत्यवातिष्ठत–' वेदार्थविषये भवतु भवतः पाण्डित्यम् । न तावता सर्वङ्कषं वैदुष्यं भवति । यदि भवान् चित्रकवितायामपि दर्शितप्रतिभस्तदा वयमूरीकुर्मः प्रगल्भो भवानिति' इति ।

तदा तत्रत्या आचार्यान्तेवासिनः कुतूहलाकुलस्वान्ताः समचिन्तयन् – 'किमद्य न आचार्यश्चिकीर्षति' इति । अथ भगवत्पादः परिवीक्षितविनेयकुतूहलोऽ-न्तरेव स्मयमानः शिष्यानुजिघृक्षया निरातङ्कं जग्रन्थ ग्रन्थमेनं चित्रकविता-मयमिति ।।

✻

अपिचेदं प्रासमयं वाङ्मयं न केवलं लौकिकम् । वेदेष्वपि दृश्यते, इतिहासेऽपि, पुराणेष्वपि । तेन वैदिकानामपीदं मान्यमेवेति न एतेन बोधयतीव वेदप्रवचना-

चार्यो भगवत्पादः । तथाहि वेदे तावत्–

‘पाहि न इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद् दुर्मतीनाम् ।
‘देवः सन् दुर्मतीनाम्’

‘अधा हि त्वा जनिता जीजनद् वसो
रक्षोहणं त्वा जीजनद् वसो’ ।। (ऋ.सं.१.१२९.११)

‘सोमानां प्रथमः पीतिर्महसि
‘सुतानां पीतिर्महसि’ (१.१३४.६) इत्यादि।

लाटानुप्रासोऽयमर्वाचीनकविसमयानुसारेण । अत एवानुव्याख्यानेऽपि नरसिंहप्रिय आचार्यो नरसिंहप्रियं क्षकारानुप्रासं विन्यास्यत्–

‘प्रत्यक्षेक्षाक्षमः साक्षात् कं पक्षमवलम्बते ।
तस्मादक्षमपक्षत्वान्मोक्षशास्त्रेऽभ्युपेक्षितः’ इति ।।

पुराणेष्वपि हि दृश्यते प्रासरसिकता–

‘अनिलालोलकङ्कोलवल्लीहल्लीसकायितम् ।

‘लवलीलवलीभिर्लास्यलीलालयं किल’ ।।

‘त्वष्टा त्वष्टादशहयः’

‘तारां स ताराधिपतिः करेण जग्राह’ इत्यादि ।

रामायणेऽपि–

‘मत्ता गजेन्द्रा मुदिता गवेन्द्रा वनेषु विश्रान्ततरा मृगेन्द्राः ।
रम्या नगेन्द्रा निभृता नरेन्द्राः प्रक्रीडितो वारिधरैः सुरेन्द्रः’ ।।
(कि.का.२८.४३)

‘वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः’
(२८.२७) इत्यादि ।

‘गृहाणि नानावसुराजितानि
देरासुरैश्चापि सुपूजितानि ।
सर्वैश्च दोषैः परिवर्जितानि
कपिर्ददर्श स्वबलार्जितानि । (सु.का.७.३)

‘अपश्यतोऽभवदतिदुःखितं मनः
सुचक्षुषः प्रविचरतो महात्मनः’ (७.१७) इत्यादि च ।

तस्मादियं लौकिकी काव्यपद्धतिरजामित्वाय तदातदा वैदिकैरप्यनुमता । तदेतद् वनौकसामपि सतां लौककज्ञत्वं नाम ।

अथायमत्र केषाञ्चित् पुरोभागिनां दोषविमर्शो भवति । श्रद्धयाऽधीयमानानामपि शङ्काशङ्कवः मा हृदि कीलिता भूवन्निति । तथाहि काव्ये असाधुता नाम दोषः । शब्दशास्त्रविरुद्धत्वमित्येतत् । तथाऽप्रयुक्तत्वं नामापरो दोषः । कोशव्याकरणसिद्धस्यापि कविभिरप्रयुक्तत्वमित्येतत् । तदुभयमत्र प्राचुर्येणोपलभ्यते । तथाहि शब्दशास्त्रविरुद्धानि पदानि– अयादिति वक्तव्ये अयदित्याह(१) । अध्याददिति वक्तव्ये अध्यादित्याह(७) । गच्छन्निति वक्तव्ये गन्नित्याह(१३) । अहन्निति वक्तव्ये अहनदित्याह (१८) । गळिकेशिनोरिति वक्तव्ये गळिकेश्योरित्याह(२३) । प्रभेत्तेति वक्तव्ये प्रभेदितेत्याह (२५) । विससर्पेति वक्तव्ये विषसर्पेत्याह(३०) । नद्धुमिति वक्तव्ये नहितुमित्याह (४८) । एवमन्येऽपि । इत्याद्या इति पर्याप्तं वचः ।।

कविभिरप्रयुक्तानि च पदानि– जगद्व्यापारसहितमित्यर्थे सानमित्याह (१४) । समुद्रमाद्युदकमाह (१९) । स्त्रीगुह्यमिपीत्याह (२२) । मांसं बबकमित्याह (३१) । सूर्यमशशीत्याह(३६) । चन्द्रं भकमाह सूर्यं च रूशम् (४३) । लीनं ममित्याह(४९) । विप्राणां तपःश्रियं विप्रेमित्याह(६४) ।

आरादित्यर्थे आके इत्याह(७१)। भवेयुः साधूनीमानि पदानि व्याकरणरीत्या। भवेयुः साधवोऽर्थाः कोशनिरुक्तादिरीत्या। अथापि कविभिरप्रयुक्तानीति न काव्ये प्रयोगमर्हन्ति। दोषैकदृशामेष आक्षेपो भवति।

अत्रेदमवधेयम्। यदालङ्कारिकाः शब्दशास्त्रविरुद्धमित्याचक्षते तत् केवलं पाणिनीयं शब्दशास्त्रं विवक्षित्वा। बहूनि शब्दशास्त्राणि भवन्ति। चान्द्रमैन्द्रं सारस्वतमापिशलं काशकृत्स्नमित्यादि। अथ पुनरन्यदेव वैदिकं व्याकरणं भवति।

ननु भोः साधवः शब्दा अपि द्विविधा भवन्ति– पाणिनीया अपाणिनीयाश्चेति। साधुत्वाव्यापकं पाणिनीयत्वम्। पाणिनीया अपि साधवः। न पाणिनीया एव। पाणिनीयत्वमित्ययोगव्यवच्छेद एव। न त्वन्ययोगव्यवच्छेदः सर्वत्र।

तद्यथा ळकारं पाणिनिर्न मन्यते। वैदिका मन्यन्ते। वेदज्ञ आचार्योऽपि अनुमन्यते स्वयं च प्रयुङ्क्ते– 'यस्य कराळोळं चक्रम्' (२) इत्यादि। ळकारगतं भगवद्रूपं च ळाळुकमाह। धातूनां नियतभाषत्वं पाणिनिर्मन्यते। सर्वस्मादुभयं पदमित्यन्ये वैयाकरणाः। अनुमन्यते च पक्षान्तरमाचार्यः। प्रयुङ्क्ते च बहुधा– 'स्मरेत यामिनीनाथसहस्रामितकान्तिमत्', 'स्मरामि भवसन्तापहानिदामृतसागरम्', 'यदि नाम परो न भवेत हरिः कथमस्य वशे जगतेतदभूत्', 'आत्मनाशाय को यतेत्' इत्यादि। करोमीति रूपं वैयाकरणा आहुः। कुर्मीति रूपं वाल्मीकिः प्रयुङ्क्ते– 'अञ्जलिं कुर्मि कैकेयि' (अयो.१२.३६) इति। करोमि कुर्वः कुर्म इति पाणिनिः पठति। करोमि कुर्मि कुर्वः कुर्म इति वाल्मीकिः पठति। एवं सर्वेषामुभयपदत्वमप्यनुमन्यते वाल्मीकिरपि। अत एव 'ह्रियन्ती लक्षिता मया' (कि.कां.६.२३) इत्यादीनि च बहुलं प्रयुङ्क्ते।

इन्नन्तस्येदन्तत्तामपि पुरातना मन्यन्ते। नृकेसरिणं नृकेसरिरित्याचक्षते वैदिकाः। केशिनं केशिरित्याह भगवत्पादः– 'अथ हतयोर्गळिरेश्योः'(२३)

इति। पक्षिणं पक्षिरित्याचष्टे वाल्मीकिः–'मेनाते राक्षसं पक्षिम्' (अर.का.१४.२) इति। 'वैदर्भं रुग्मिमेव च' (१०.५५.२४) इति भागवते। पाणिनिस्तु इन इद्भावं न मन्यते।

व्याकरणं मुखे कृत्वा तदवलम्बेन महता प्रयत्नेन ये शुद्धं संस्कृतं भाषमाणाः सम्प्रत्यपि परिदृश्यन्ते महान्तस्ते। तेभ्यो नमोवाकं प्रशास्महे। येषां संस्कृतस्यापि जननी गीर्वाणसरस्वती सहजसिद्धा मातृभाषेव जिह्वालग्ना ते स्वच्छन्दाः परावरज्ञाः। येषां रसनाग्रे नृत्यन्ती लसति सरस्वती किं तेषां पुरोऽपि प्रसरति व्याकरणम्। लौकिकानां हि वाग् व्याकरणमनुवर्तते। ऋषीणां पुनराद्यानां वाचंवाचं व्याकरणमनुधावति। तत्र भवन्तो मन्त्रद्रष्टार एवात्र प्रमाणम्।

वस्तुतस्तु लौकिकभाषास्वपि समानमेतत्। या यस्य स्वभाषा स तां व्याकरणभित्तिं भित्तशो भित्त्वाऽपि स्वच्छन्दं वर्धयति। यदि परकीया भाषा स व्याकरणस्य पृष्ठतो बद्धहस्ताञ्जलिश्चरति।

अपिच वैदिकी गैर्वाणी प्रचलितात् संस्कृतादीषद् विलक्षणा। अन्यच्च तस्या व्याकरणम्। ननु पाणिनीयं नाम वैदिकानां लौकिकानां शब्दानामनुशासनम्। अर्थवाद एवायम्। य एव वैदिकास्त एव लौकिका इति चोल्लाघनमात्रम्; स्वपृष्ठास्फालनमात्रम्। अवैदिका अपि लोके प्रयुज्यन्ते। वैयाकरणमूलश्चायं प्रयोगः। तद् यथा– सङ्गमिति युद्धार्थं वैदिकम्। सङ्ग्रमिति लौकिका वैयाकरणाः। बाहुषाळीति वैदिकम्। बाहुशालीति वैयाकरणाः। भत्सनमिति वैदिकम्। भर्त्सनमिति वैयाकरणाः। रुग्ममिति वैदिकम्। रुक्ममिति वैयाकरणाः। अहो वैयाकरणोपज्ञमेव क्वचिदपशब्दानामवतारः।

अनन्तपारः शब्दपारावारः। अपरिमेयं वाङ्मयम्। विपुलतराणि पुरातनानि व्याकरणानि। भगवदनुग्रहेण शब्दब्रह्मशरधिपारदृश्वानः परिणतप्रज्ञाः केचिदर्वाचीनैर्विस्मृतानि वैदिकसम्प्रदायसिद्धन्यापूर्वाणि पदानि बभुत्सूनामर्थे स्वग्रन्थेषु न्यग्रन्थिषुरिति गुण एवायं भाति दोषज्ञानामप्यपुरोभागिनाम्।

अत एवाप्रयुक्तान्यपि वैदिकानि पदानि परमवैदिक आचार्यः प्रयुङ्क्त इति भूषणमेव। 'दोषशब्दाश्च विष्णवि' इत्यनुव्याख्यान एवैतमाशयं स्फुटं सूचयामास भगवत्पादः– न वयं निमील्य चक्षुषी, अवलम्ब्य च पाणिनीयपृष्ठकच्छम्, शौवं साम गायाम इति । दर्शितं चात्र काव्येऽपि तत्रतत्र श्रीनरहरितीर्थैनैव केषाञ्चन पदानां वैदिकसम्प्रदायसिद्धत्वम्। अपरे तु वृथा पाणिनीयेनैव पथा समाधातुं प्रायतन्त ।

भगवत्पादो यद्येतानि पदानि न प्रायोक्ष्यत प्रायः पुनरेतेषां साधुत्वमेव न व्यज्ञास्यत । प्रायः संस्कृतवाङ्मयादेतानि पदानि सर्वथा विलुप्तान्येवाभविष्यन् । अत एवं केषाञ्चिदपूर्वपदानामाविष्करणेन गीर्बाणसरस्वत्याः महानुपकारः समजनि ।

अपिच, अप्रसिद्धार्थता, कविभिरप्रयुक्तता च न सर्वत्र काव्येषु दोषः। यमकेषु चित्रेषु च काव्येषु नार्वाचीना अपि तयोर्दोषतामुशन्ति । इदं च न केवलं चित्रकाव्यमात्रम्। किन्तु शास्त्रकाव्यमिति महानयं क्वचिद् गुणो यदप्रसिद्धार्थत्वं नाम। अन्ये शास्त्रदोषाः। अन्ये च काव्यदोषाः। क्वचित् काव्ये दोषाः शास्त्रे गुणा अपि स्युः। अधिकारवैशेष्यात्। यास्कवचनं चात्र स्मर्तव्यं भवति–'नैष स्थाणोरपराधः, यदेनमन्धो न पश्यति' इति ।

श्रीनरहरितीर्थस्तट्टीका च

महाभारततात्पर्यस्य प्रथमव्याख्याता विख्यातयशाः श्रीनरहरितीर्थः भगवत आचार्यस्य साक्षाच्छिष्यः। साक्षाच्छिष्यतया स्फुटमवगतेषु नवस्वन्यतमः।

तथाहि त इमे नव श्रीपदपूर्वाः श्रीपादाः– १))हृषीकेशतीर्थः, २.) पद्मनाभतीर्थः, ३) नरहरितीर्थः, ४) जनार्दनतीर्थः, ५) उपेन्द्रतीर्थः, ६) वामनतीर्थः, ७) विष्णुतीर्थः ८) रामतीर्थः, ९) अधोक्षजतीर्थश्चेति।

अयं प्रायस्तेषां वेदान्तसाम्राज्यपीठारोहणक्रमश्च। पद्मनाभतीर्थो न प्रथमशिष्य इति श्रीमध्वविजये स्फुटम्– 'अनयोः प्रथमे शिष्याश्चरमे चाभवन् किल'

(१५.१२७) इति । अनयोरिति विष्णुतीर्थपद्मनाभतीर्थयोः । तेन श्रीहृषीकेशतीर्थस्य प्राथम्यं निश्चितम् । अत एव तमष्टोत्कृष्ट इत्याचचक्षिरे आश्रमज्येष्ठत्वादिति । ततो जनार्दनतीर्थस्ततो नरहरितीर्थश्चाऽत्ततुरीयाश्रमाविति च श्रीमध्वविजयादेवावगम्यते– 'वशीकृतहृषीकाश्च जननाद्युपमर्दिनः । नरसिंहपदाधारा अभ्यस्तोपेन्द्रनामकाः'(१५.१२८) इति । अथ श्रीपद्मनाभतीर्थः श्रीनरहरितीर्थात् पूर्वं स्वीकृतपारिव्राज्य इति च स्फुटम्। यतः पश्चादयं तच्छिष्यपरम्परायामुपविष्टः । तेन श्रीहृषीकेशतीर्थादनन्तरम्, श्रीजनार्दनतीर्थादप्यनन्तरं वा श्रीपद्मनाभतीर्थस्य तुरीयाश्रमस्वीकार इति निश्चीयेत।

वेदान्तसाम्राज्ये तु श्रीजनार्दनतीर्थात् पूर्वं श्रीनरहरितीर्थोऽभिषिक्तस्तीर्थपदभागभवदिति तेनैव क्रमेण सम्प्रत्यपि श्रीकृष्णसपर्यापर्यायक्रमो निर्वर्तते । तत्र श्रीपद्मनाभतीर्थः कर्णाटकपूर्वसज्जनगुरुत्वमूढ्वा उपगिरि सञ्चरन्नासीत्। अन्येऽष्टौ कृष्णपूजाधुरमूढ्वा रजतपीठे न्यूषुः, तत्तत्समये कृष्णमर्चन्तः, अन्यदा तत्ववादप्रसारायाऽसेतोरा हिमाचलं सञ्चरन्तः ।

तेषां साम्राज्याभिषेकक्रमस्तदनुसारी कृष्णपूजाक्रमश्चास्मिन् पद्ये स्फुटः–

'वन्दे हृषीकेशमथो नृसिंहं जनार्दनं चिन्तय धीरुपेन्द्रम् ।
श्रीवामनं संस्मर विष्णुमेमि श्रीराममश्वेऽहमधोक्षजं च' इति ॥

सम्प्रति 'अदमारुमठ' इति मूलग्रामनाम्ना प्रथितं संस्थानमेव श्रीनरहरितीर्थीयं मूलसंस्थानम् । अत्र केचित्प्रत्यवतिष्ठमाना आक्षिपन्ति– 'अदमारुमठस्य मूलयतिर्न नरहरितीर्थः, किन्तु नरसिंहतीर्थः । तथैव च पठन्ति गुरुपरम्परा श्लोके। मध्वविजयेऽपि 'नरसिंहपदाधाराः' इत्येवोक्तम्। ननु 'नरहरिपदाधाराः' इति। सम्प्रदायपद्येऽपि 'अथो नृसिंहम्' इति। अपिच रजतपीठे वर्णिनां सन्न्यास इति श्रूयते। न गृहिणाम्। उपरितनमठेषु च गृहिणामेव न वर्णिनाम्। श्रीनरहरितीर्थस्तु पूर्वाश्रमे श्यामशास्त्रीति सुगृहीतनामधेयः स्वीकृतगार्हस्थ्यः

कळिङ्गराजस्य प्रधानसचिव आसीत्। तत् कथं स रजतपीठपरम्परायामष्टस्वेक आसीत्' इति।

सोऽयमनवलोकितभावप्रकाशिकानां भगवान् भ्रमः। यतस्तत्र 'नरसिंहपदाधाराः' इति स्ववाक्यस्य स्वयमेव भावं प्राकाशयत् पण्डिताचार्यः 'नरहरितीर्थाः' इति व्याचक्षाणः। यदि नरसिंहतीर्थ इत्येव तस्य यतेर्नामाभविष्यत्, तदा 'नरसिंहपदाधाराः' इति स्फुटार्थस्य पदस्य 'नरहरितीर्थाः' इति विवरणं नाकरिष्यदेव। आपाताधीतमध्वविजया अनधिगतभावप्रकाशिका येऽच्युतप्रज्ञमेवाच्युतप्रेक्षं बभ्रमुस्ते नरहरितीर्थं नरसिंहतीर्थाख्यं मेनिर इति नात्र विस्मयः। सम्प्रदायमालिन्यं तु विस्मयावहम्। स्मरामो भगवत्पादवचनस्य स्थाने– 'दौर्लभ्याच्छुद्धबुद्धीनां बाहुल्यादल्पवेदिनाम्' इत्यादि। इयं नाम नामभ्रान्तिर्गुरुपरम्परायाः। नाम्न्येव भूयो भ्रमन्तः कथं तत्वं न विभ्रमेयुः।

केचिन्मन्दमनीषा जल्पन्ति– 'द्वौ नरहरितीर्थनामधेयौ मध्वशिष्यौ। एकः पद्मनाभतीर्थपरम्परामलञ्चकार। अपरो रजतपीठमठपरम्पराम्' इति। तदेतदज्ञानविजृम्भणं नाम। किं द्वयोः सुतयोः क्वाप्येकं नाम पिता कुर्यात्। व्यावृत्ततया व्यवहरणार्थं किल नाम क्रियते। यदि न व्यावृत्तिस्तर्हि किं नामकरणफलम्। वरं विमर्शकानां बुद्धिदारिद्र्यमित्यभ्युपगमः। नतु भगवत्पादस्य स्वशिष्याणां नामकरणे नामदारिद्र्यम्।

यदप्युक्तम्– रजतपीठे न गृहिणां पारिव्राज्यसम्प्रदाय इति, श्रीनरहरितीर्थस्तु पूर्वाश्रमे स्वीकृतगार्हस्थ्य आसीदिति च। उभयमपि निराधारम्। नहि घट्टादधस्ताद् वर्णिनामेव सन्यासः, उपरि च गृहिणामेवेत्याचार्योपज्ञं सम्प्रदायः। अधस्तादपि गृहिणो यतय आसन्। उपरिष्टादप्यगृहिणो यतयः। 'यदा विरक्तः पुरुषस्तदैव सन्यासविधिः' इति त्वाचार्यकृता व्यवस्था। गृहित्वमगृहित्वं वाऽवर्जनीयसन्निधिः। विरक्तिस्तु बीजम्।

श्रीनरहरितीर्थः पूर्वाश्रमे स्वीकृतगार्हस्थ्य इत्येतदपि सन्दिग्धम्। स्यादपि, न स्यादपि। न किमपि स्फुटमितिहासविदो वदन्ति– 'प्रथमं श्रीहृषीकेशतीर्थस्य

द्वन्द्वमठमारूढः श्रीनरहरितीर्थः मूलत आन्ध्रः। पूर्वाश्रमे च, तदपि पूर्ववयस्येव, कळिङ्गदेशे गजपतिराज्ये प्रमुखसचिपपदमूढ्वा प्रजाः पालयामास। एतस्य तातोऽपि कळिङ्गराजस्य मन्त्रित्वं निरुवाह। तेन बाल एव चायं परिणतराज्याधिकारव्यवहार आसीत्। दुष्टनिरासाय कृतशस्त्राभ्यासतया युद्धशौण्डश्चाऽसीत्। तदेतत् सर्वं शिलाशासनादेवावगम्यते (श्रीकूर्मक्षेत्रे श्रीयोगानन्दनरसिंहदेवमन्दिरे अन्तःस्तम्भे १२८५ तमे क्रिस्तीयवर्षे, उट्टङ्कितोऽयं शिलालेखः)– 'पित्र्याचारमुपैति सूनुरिति सन्नीतिस्थितौ...' इत्यादि। (समग्रशिलालेखपाठः, तद्विमर्शश्च श्रीमध्वविजयपरिशिष्टे सविस्तरमस्माभिः कृतः। जिज्ञासुभिः सुधीभिस्तदवलोकनीयम्।)

अस्य कालविषयेऽपि बहव इतिहासज्ञा एवमभिप्रयन्ति– कळिङ्गभूपतिः प्रथमनरसिंहः १२६४ तमे क्रि.वर्षेऽम्रियत। ततस्तत्तनयो राजा बभूव। सोऽपि १२७९ तमे क्रि.वत्सरे तनुं तत्याज। तदा तत्तनयस्त्रिचतुरहायन आसीत्। यावता स प्रबुद्धो युवा बभूव तावन्तमनेहसम्, चतुर्दशवर्षाणि, राजप्रतिनिधितया श्रीनरहरितीर्थ एव भगवत्पादानुज्ञया राज्यधुरं निरुवाह। यदा द्वितीयनरसिंहः प्राप्तयौवनः, तदा १२९३ क्रि.वर्षे श्रीनरहरितीर्थस्तद्राज्यं प्रत्यर्प्याऽचार्यपादसमीपमाजगाम।

एतेनैतदपि स्फुटम्। १२७९ तमात् क्रि. वत्सरात् पूर्वमेव श्रीनरहरितीर्थो भगवत्पादशिष्यतामाश्लिष्य ततः स्वीकृततुरीयाश्रमश्चाऽसीत्। तदा भगवत्पाद एकचत्वारिंशद्वर्ष आसीत्। नरहरितीर्थः पुनस्तदात्वे स्ववयसस्तृतीये दशके स्यादिति सम्भाव्यते। अतोऽकृतोद्वाह एव स सन्यासं स्वीचकारेत्येव सहजसुन्दरं भाति।

ततः पाश्चात्यं कथाजातं शक्योहम्। भगवत्पादेन पञ्चदशवर्षेभ्यः पूर्वमेव स्वीकृततुरीयाश्रमः श्रीनरहरितीर्थ आचार्यानुज्ञया राज्ञो नरसिंहस्य राज्यधुरं निरुह्य समागत इति प्रीत्या जनास्तं नरहरितीर्थं नरसिंहतीर्थमाचक्षत नर-

सिंहस्य राज्ञः प्रतिनिधिरयं तीर्थ इति। तदेवं लौकिकवैदिकोभयतन्त्रावारपारीणः प्रजाराज्ये वेदान्तस्य प्रज्ञाराज्ये च धुरीण इति जनास्तस्मिन् सगौरवं साभिमानं प्रीतिपूरं ववृषुः । कळिङ्गराज्यादानीतरामार्चमाचार्यस्तं सपदि वेदान्त-साम्राज्येऽभिषिच्य कृष्णपूजार्थं न्ययुङ्क्त ।

ततः कतिषुचन वत्सरेषु क्रमेण स कृष्णमानर्च । तेन कृष्णसपर्याभाग्येन सम्भृतपुण्यस्ततः स्वपरिचिते अन्ध्रे कलिङ्गे विशेषतस्तत्ववादं प्रचिचा-रयिषू रजतपीठे स्वशिष्यं कमलेक्षणतीर्थं संस्थापयामास। स्वयं च पद्मनाभ-तीर्थशिष्यतामङ्गीकृत्य तत्परम्परामप्यलञ्चकार । पूर्वमप्ययं भगवत्पादाज्ञया पद्मनाभतीर्थसकाशे तत्वशास्त्राण्यधिजगाविति तद्वचनादेव ज्ञायते ।

यदाऽयं यतिपुङ्गवो रजतपीठ आसीत् तदात्व एव शिष्यानुकम्पापरवता भगवता महाभारततात्पर्यं प्रायो निरमायि; तस्मिन्नेवावसरे आचार्यपादमुखनळिनादेव श्रुतप्रबन्धार्थमरन्दः श्रीनरहरितीर्थषट्पदः पदवाक्यप्रमाणज्ञष्टीकामेतामटीकतेति युक्तमुत्पश्यामः ।

मूलप्रबन्धुर्मुखादेव श्रुतपरमार्थोऽयं टीकाकृदिति महदस्य टीकाकृतश्च टीकायाश्च वैशिष्ट्यम् । आचार्यपादप्रेमपाकोऽयं स्वयमपि गुरुसरणिमनुसरन् बहुल-मपाणिनीयान् छान्दसान् शब्दान् प्रयुङ्क्ते । प्राय आचार्यशिष्येषु द्वावेव साहसेऽस्मिन् न्यस्तहस्तौ-श्रीविष्णुतीर्थश्च श्रीनरहरितीर्थश्च। परमवैदिकस्याऽ-चार्यस्य परमवैदिकोऽयं शिष्यः । तद् यथा–

'वैरिशोभाक्रिये येन वोज्झिते तं नृकेसरिम्' । (१५)

'नहि रुद्रवरोन्मत्तानहनत् केवलं हरिः' (१६२) इत्यादि ।

अथाप्यस्य रुचिरं व्याख्यानकौशलं मूलस्य प्रतिपदमनेकार्थान् प्रतिपादयत् सतां चित्तमावर्जयति । स्वादंस्वादं मोदन्ते विद्वत्तल्लजाः । तदिदमन्यदा-चार्यानुसरणं यच्छलोकरूपं व्याख्यानमरीरचत्। मन्यामहे यदृग्भाष्यमनुव्या-ख्यानं चास्याष्टीकाया मूलस्फूर्तिरिति ।

यद्यपीयं प्रतना टीका पूर्वमेव प्रकटिता द्वित्राणि मुद्रणान्यपश्यत् । आङ्ग्ला-नुवादसहितं च महाभारततात्पर्यम्, यमकभारतमित्येव नाम्ना, श्रीमता श्यानभागोपाह्वेन दयानन्दनाम्ना प्रकट्यकारि । सर्वमपि दोषप्रचुरम्, मूल-पाठविरुद्धमप्रबुद्धं च । सर्वेऽपि सम्प्रदायनाम्ना मूढपरम्परां रक्षन्तः स्वान् सम्प्रदायरक्षकान् मन्यन्ते । न केषामपि परिशुद्धे पाठे, परिशुद्धेऽर्थे च भरः । सत्यनैर्भर्यमपि निर्भयं साहसमपेक्षते । नायं प्राचीनदोषोद्घाटनभीरूणाम-व्युत्पन्नानां पन्थाः। शुद्धश्च महाभारततात्पर्यपाठः, शुद्धं च मूलग्रन्थनाम, प्रायः शुद्धश्च टीकापाठः सशुद्धार्थः इदमुपज्ञमुपहारीक्रियते । तदेतदुपरिष्टाद् ग्रन्थ-भागं परिशीलयतामुत्सारितमत्सराणां सहृदयानां स्फुटमिति न बहु तत्रोच्यते। ये दुराग्रहग्रहग्रस्तास्तेषां पुरोऽनल्पजल्पेनापि किं फलम् । नहि महिषस्याग्रे ततवाद्यसेवा प्रवर्तते ।

अज्ञातकर्तृका असङ्गता टिप्पणी

प्रथते किंवदन्ती यल्लिकुचान्वयेन नारायणपण्डितेनापि महाभारततात्पर्य-स्यैका टीका व्यरचीति। श्रूयते नतु दृश्यते। न कोऽपि जानीते, यदि न कृतैव, आहो कृताऽपि घुणभक्षिता कालगर्भे निलीय नितरां नष्टेवेति। नरहरितीर्थीया-मेतां प्रतनटीकामृते, ततः पाश्चात्याः पञ्चषाष्टीकाः सम्प्रत्युपलभ्यन्ते। तत्रैकाऽ-ज्ञातकर्तृका, नरहरितीर्थीयं च मूलं च सङ्गमयन्ती विस्तृता टिप्पणी । संशोधकानामयं महान् भ्रमः यदियं टीका स्वकृतपद्यविवरणरूपा गद्यमयी नरहरितीर्थेनैव प्रणीतेति। कः कर्तेति न ज्ञायत इति तु परमार्थः। असङ्गतिबहुलं स्वमूलभावग्रहणेऽप्यदक्षं कथं नरहरितीर्थकृतं स्यात्?

अपिच तत्र ग्रन्थान्ते पठ्यमानमिदं वाक्यमवधीयताम्– 'इत्थं यमकभारतं व्याख्याय नृहरितीर्थश्रीमच्चरणा अन्ते स्वेष्टदेवतां तमेव व्यासरूपं वेदान्त-कर्तारं तत्स्तोतारं भगवन्तमानन्दतीर्थं च प्रणमन्ति' इति । यदीदं नरहरि-तीर्थकृतमभविष्यत् नावक्ष्यत् सबहुमानं बहुवचनान्तं स्वनाम 'नृहरि-

तीर्थश्रीमच्चरणाः' इति । 'ग्रन्थकर्ता' इत्यवक्ष्यत् । नृहरितीर्थ इति तु परमम् । एवं प्रबन्धनामापि न यमकभारतमिति, किन्तु महाभारततात्पर्यमित्येवा-वक्ष्यत् ।

अपिच श्रीनरहरितीर्थसम्मते पाठेऽष्टाविंशतिरेव भकारा इत्यप्यजानन्नयं पद्यव्यख्यान्ते वक्ति– 'इति सर्वद्वात्रिंशत्सङ्ख्याकभवर्णप्रमेयमुदीरितमित्यर्थः' इति । अहो टीकापाठेऽपि विभ्रमोऽस्य गूढव्याख्यातुः । अष्टाविंशतिं भकारार्थानुक्त्वाऽन्ते टीकाकारः स्वोक्तधातुपाठस्य मूलमाकरमाविष्करोति– 'इति सर्वविदीरितम्' इति । सर्वविदा भगवत्पादेनैव स्वयमीरितमित्यर्थः । अयं तु गूढव्याख्याता 'इति सर्वमुदीरितम्' इति पाठभ्रान्त्या किमप्यसङ्गतं जजल्प ।

अन्यच्चेदं पश्यत– 'नैव परः केशवतः परमादस्मात्समश्च सुखकेशवतः' (७८) इति मूले 'सुखकेशवतः' इति पदस्य विवरणरूपं नरहरितीर्थीयटीकागतमिदं वचनम्– 'सुखगेन्द्रः सुपर्णो हि तद्वान् स्याद् गरुडध्वजः । को गस्थाने समुद्दिष्ट-स्तृतीयोऽतिशये यतः' इति । अस्य वचनस्यायमर्थः– सुखकेशवत इति गकारस्थाने ककारः पठितः । ककारस्य व्युत्क्रमेण गकारात् तृतीयाक्षरत्वात्, तृतीयस्य चातिशयार्थत्वात् । तेन खकेश इत्यतिशयितः खगेश इत्यायातम् । तादृशखगेशवांश्च भगवान् गरुडध्वज इति ।

एवं स्वरसतोऽर्थे स्थिते नरहरितीर्थीयत्वेन संशोधकम्मन्यानामभिमतं टिप्पण-मिदं कि भणतीति पश्यत– 'नामैकदेशे नामग्रहणमिति न्यायात् खशब्देन खगशब्दो ग्राह्यः । तथाच सुखकेशवत इति वक्तव्ये छन्दोभङ्गभयात् सुकेशवत इति पठितम्' इत्यादि ।

बालिशं हास्यास्पदं चेदं व्याख्यानम् । वस्तुतस्तु सुखकेशवत इत्येव मूलपाठः । 'सुकेशवतः' इति मूलपाठ इत्ययं प्रथमं बभ्राम । एवं पाठभ्रममातृकाऽर्थभ्रम-परम्परा । अस्पृष्ट्वैव मूलभावम्, मूलाद्योजनदूरे स्थितः, योजयति मूलमहो

किमपिकिमपि अज्ञानविजृम्भितमनल्पं जल्पन् । छन्दोभङ्गभयादिति चाद्भुतं वचः । इयमत्र चतुर्षु पादेषु मात्रागतिः– १२+२०+१२+२० । सुखकेशवत इति पाठ एव मात्रासाम्यं भवति । सुकेशवत इति पाठे द्वितीयचरणे १९ मात्रा एव भवन्तीति नूनं छन्दोभङ्गः स्यात् । अहो छन्दोगन्धविधुरः मूलपाठानभिज्ञः टीकाभावातिदूरः कथमयं स्वयं नरहरितीर्थः स्यात्?

प्रायः संशोधका अपि निद्रालवो भवन्ति । निदर्शनमात्रमिदम् । एवमेतादृशा अनेके दोषा अत्र । असाङ्गत्यमेव नः पुनरपि मुखरयति । नामैकदेशे नामग्रहणस्य दुरुपयोगं पश्यत । खशब्देन खगशब्दो ग्राह्यः । अन्योऽपि मादृशो ब्रूयात्– घशब्देन घटो ग्राह्यः । कशब्देन कन्या ग्राह्या । सर्वं काव्यसम्प्रदायं व्याकुलयत्ययं व्याख्याता । तदज्ञातकर्तृकमिदं व्याख्यानमसाङ्गत्यबाहुल्यादुपेक्ष्यमेव ।

अन्याष्टीकाः

अन्याश्च महाभारततात्पर्यटीकाः सम्पत्यस्माभिरुपलब्धाः–

१. तम्मण्णभट्टकृता टीका । (अयं तम्मण्णभट्टो वा तिम्मण्णभट्टो वेति विभ्रान्ताः केचनान्तराळे तिष्ठन्ति । प्रबन्धुर्नाम्नो ग्रन्थान्ते– अनुजाचार्य इत्यनुवादात् तम्मण्ण इत्येव तन्नाम स्यादिति निश्चीयेत ।)

२. भगवत्कृता (भगवन्तरायकृता) । अयमष्टाविंशतिभकारानेवाऽदाय व्याचख्यावित्यन्येभ्योऽधिकं मूलस्पृक् । अर्थवर्णनेऽपि बहुलं नरहरितीर्थसमीपं गच्छति । स्वयमेव चाऽह मङ्गलाचरणे– 'स्मरन् नरहरिं गुरुं यमकभारतव्याकृतिं तदीयकृतिमाश्रयन् विमलपद्यरूपामहम्' इत्यादि ।

३. नारायणाचार्यकृता टिप्पणी । अयमद्वैतकालानलादिकर्ता नारायणाचार्य इति प्रतीयते । न किञ्चिद् विशिष्य वक्तव्यम् ।

४. यदुपत्याचार्यविरचिता टीका । व्युत्पन्नं व्याख्यानम् । अथापि नातीव मूलभावस्पृक् । नातीव नरहरितीर्थीयानुसारिणी च । यद्यपि ग्रन्थारम्भे

तेन प्रत्यज्ञायि– 'यद्यपि श्लोकरूपाऽस्ति टीकाऽस्य सुलभा न सा । अतस्तामनुसृत्यैव टीकेयं क्रियते मया' इति । एवं प्रतिज्ञायापि ततः क्वचित्क्वचिदपसरतीव । प्रायष्टीकाया मूलस्य च शुद्धपाठानुपलम्भादेव प्रामाणिकेषु पदवाक्यप्रमाणज्ञेष्वपि एतादृशाः प्रमादाः समभवन् । यदुपत्याचार्योऽपि नापवादः । अत एव दृष्ट्वाऽपि प्राचीनटीकाम्, मूले द्वात्रिंशतं भकारान् पठित्वा व्याचख्यौ । अन्यानि च तट्टीकायां कानिचन प्रमादस्थानानि– 'ध्यायेत् तं परमानन्दम्' (१) इति, 'चक्रं कालः परस्य हि' (२) इति, 'स्वाधिकततततमायामस्य' (९) इति, 'विश्व-रुक्पावनोऽप्यानन्दैकतनुः' (२२) इति, 'सति सुखरूपोजः' (६७) इति, 'ज्ञानिसुततिं परमाम्' (६८) इति, 'सुकेशवतः' (७८) इति मूलपाठ इत्यादीनि । महच्च भागधेयं नः यद्यद्यत्वे शुद्धष्टीकापाठो मूलपाठश्च अहो बहोः कालादनन्तरं दिष्टचा लब्ध इति । अपिचैकं वाक्यं यादुपत्येऽन्तर्गडवति– 'अदादिति वक्तव्य (अददादिति) दकारा-भ्यासश्छान्दसः' (६८) इति । व्याकरणेष्वधीती यदुपत्याचार्य एव-मुवाचेति को हि नाम विश्वसेत्! नूनं कैश्चिदव्युत्पन्नैः परस्तादुपक्षिप्तं स्यात् । (अथवैतद् व्याख्यानमपहसितुमेव वेङ्कटार्यो व्याचख्याविव– 'डु दाण् दाने, लङ्' इति ।)

५. अन्यच्चापूर्वं व्याख्यानान्तरं श्रीसुब्रह्मण्यमठीयप्राचीनपुस्तकालये मयाऽचिरादन्विष्टम् । व्याख्याता वेङ्कटार्यः । नातीव नरहरितीर्थ-सङ्गतः । ग्रन्थान्ते चैवमाह–

'श्रीराघवेन्द्रयोगीन्द्रकरुणालब्धसंविदा ।
'वेङ्कटेन कृता टीका प्रीत्यै भूयादियं हरेः ॥

'इति श्रीयमकभारतटीका राघवेन्द्रमुनीन्द्रार्यशिष्यकणलववेङ्कटार्यकृता समाप्ता' इति । एतेनैतट्टीकारचयिता श्रीराघवेन्द्रतीर्थमुनीन्द्रस्यान्तेवासीति स्फुटम-

वसीयते । व्याख्यानमिदं मूलपाठालाभेन क्विश्यदपि व्युत्पन्नं व्याकरणादिविषये नितान्तमुपयोगि च । ७७तमे पद्ये २८भकारा एवेत्ययमपि स्फुटमाह । तथाहि तद्वचनम्– 'विद्युन्मालावृत्तम् । 'विद्युन्माला मो मो गो गः' इति तल्लक्षणात् । प्रतिपादमेकाक्षरन्यूनत्वेऽपि 'नवा एकेनाक्षरेण च्छन्दांसि विलीयन्ते' इति वचनान्न च्छन्दोभङ्गः शङ्कनीयः' इति । अर्थनिर्वर्णनेऽपि किमपि कौशलं दृश्यते– 'भातीति भः । भा दीप्तौ । प्रकाशमानः । भश्चासावश्च अकारवाच्यश्च । तत्सम्बुद्धिः भा । प्रकाशमानत्वे सति सर्वविलक्षणेत्यर्थः । यद्वा भ आ इति पदद्वयम्' इति । 'भासा कान्त्या भासयन्तीति भाभांसि । भासृ दीप्तौ । भाभांसि च तानि भानि च नक्षत्राणि च भाभाभानि । तान्याभासयतीति भाभाभाभाश्चन्द्रमाः' इत्यादि च ।

तथा– 'अहनद् वत्सतनूकम्–' (१८) इत्यत्र तद्व्याख्यानम्– 'अहनत्, शपो लुगभावश्छान्दसः । यद्वा हन्तीति हनः हन्ता (हनवदाचरति हनतीति) आचारार्थे क्विप्' इति । तथा– 'अज्ञानतमःप्रभेदिता–' (२५) इत्यादेर्व्याख्यानम्– 'अज्ञानतमः प्रभिनत्तीति अज्ञानतमःप्रभेदी । (तस्य भावः) प्रभेदिता । तया नित्यं सम्भृता पूर्णा आज्ञा यस्य' इति । 'नहि नहुषोऽलं नहितुम्' (४८) इत्यत्र – 'नह्यतीति नहः । तस्मादाचारार्थे क्विबिति तदन्तात् तुमुन् । नहितुं बन्धकवदाचरितुम्, बद्धुमिति यावत् । तथा हन्तीति हः घातकः । तत आचारार्थे क्विप् । तदन्तात् तुमुन् । हितुं हन्तुमिति यावत्' इत्यादि । (स्फुटं तावदिदं यन्मन्त्रालयगुरोर्महावैयाकरणस्य निगीर्णजीर्णपातञ्जलस्य समुचितोऽयं विनेय इति ।

अपूर्वस्यास्य एकमेव ताळपत्रमयमादर्शपुस्तकं मयोपलब्धम् । बहवश्चात्र लिपिदोषाः । शुद्धमादर्शान्तिरमन्वेष्टव्यं भवति ।

परन्त्वासु नैकाऽपि टीका नरहरितीर्थीयटीकाया नैकट्यमपि टीकत इति महदनुपमं चौन्नत्यं नरहरितीर्थकृतायाः कृष्णप्रकाशिकायाः ।

श्रीकृष्णचन्द्रिका

एवं विद्यमानमपि प्राचीनव्याख्यानजातमविद्यमानप्रायमासीत् । नरहरितीर्थटीकायाः शुद्धपाठस्यानुपलम्भात्, मूलेऽपि पाठसाङ्कर्यात् । तज्जनितात् पाठविप्लवादर्थविप्लवाच्च ।

एवं स्थिते शुद्धपाठनिर्णयाय बहून् वत्सरान् प्रयतमान एवायातयम् । दिष्ट्या चाऽचार्यशिष्यप्रवरेण श्रीहृषीकेशतीर्थेन लिखितः मूलग्रन्थस्य मूलपाठ उपलब्धः । तेनैव लिखितो भाधातुपाठश्च । दिष्ट्याऽस्मत्पस्त्य एव पूर्वाचार्यैः सङ्गृह्य गोपिता नरहरितीर्थीयटीका चोपलब्धा । सा च बाहुल्येन हृषीकेशतीर्थीयपाठानुगुणा प्रायः परिशुद्धा चाऽसीत् । ततोऽन्यान्यानि मुद्रितानि हस्तलिखितानि च पुस्तकानि भूयोभूयः पर्यशीलिषत । बहुशः शुद्धपाठाश्च निरधारिषत । अथापि द्वित्रेषु पद्येषु सर्वत्रापि गलितः पाठः । तत्रानुगुणं पदजातं विरचय्य, अध्येतॄणां सौकर्याय, आवरणचिह्नान्तर्न्यवेशयम् । यथा– 'अनन्तपारामितविक्रमेश–' (७६) इति पद्यस्य व्याख्याने तुरीयचरणविधुर एकः श्लोकः पठ्यते–

> 'प्रतीतौ ममकारास्य निषेधो नम इत्यतः ।
> 'अप्राप्तममकारो यः.......'

अयं च मया पूरितः सम्भावितः पाठः–

> प्रतीतौ ममकारस्य निषेधो नम इत्यतः ।
> 'अप्राप्तममकारो यः (स कथं तन्निषेधति)' इति ।

अन्यत्र सर्वत्र शुद्धपाठः सुकरनिर्णयः सुकरसङ्ग्रहश्चाऽसीत् । एवमर्धं तावदवसितं भारस्य । अथ शुद्धोऽर्थश्चिन्तनीयः । यतः सर्वाण्यपि पूर्वव्याख्यानानि शुद्धपाठविरहेण शुद्धपाठनिर्णयायाप्रभवन्ति , अनिर्णयपङ्के विलुठन्ति सन्ति श्रीनरहरितीर्थीयभावसारस्याद् दूरतरमपासरन् । तन्मूला अनुवादाश्च । तदर्थं

मूलार्थान्वेषणाय पुनर्नूतनतया प्रयतितव्यमासीत् । प्रायत्यत च मया यथाप्रज्ञम् । समच्छिद्यन्त सर्वसंशयाः । तत्फलमिदं महाभारततात्पर्यस्य नरहरितीर्थीयानुसारिणी नूतना, अथापि प्रतनालम्बना, टीका श्रीकृष्णचन्द्रिका । चक्षुष्मतां स्फुटमस्या वैशिष्ट्यम् । ये दुराग्रहग्रहगृहीताः, ये च मत्सरमुषितशेमुषीकाः, ये ऽबोधग्रस्ता वा दैवहतका अन्धबधिरास्तेषां कृते नैष यत्नः ।

नाममीमांसा रूपमीमांसा च

अत्र चित्रकाव्ये बहून्येकाक्षराणि पदानि प्रयुक्तानि । तद् यथा– अः इति ब्रह्मेति श्रुतिप्रसिद्धं तावत् । आ इति चतुर्मुख इति । इः काम इति । ईः लक्ष्मीरिति । उः शम्भुरिति । तदेतद् विनेयानां न केवलम्, क्वचिद् विदुषामपि दुरवबोधं स्यादित्युभयेषामपि सुकरत्वाय काचिन्नूतना सर्वाक्षराणां भगवत्परताभरा निर्वचननिर्भरा एकाक्षरनाममाला मया व्यरचि न्यबन्धि चात्र । यदि च विपश्चितोऽनुमन्यन्ते, सन्तुष्यन्ति च सन्तः कृतकृत्येयमानुष्टुभी कृतिः ।

अत्र किञ्चिद् वक्तव्यमिति भाति । न केवलं नाममीमांसा, रूपमीमांसाऽपि केषाञ्चिद् भवति, विशिष्यैकाक्षरेषु पदेषु । अत्र द्वे तादृशी पदे भवतः– सुन्दरीपीषु, विप्रेम् इति । ईकारान्तः स्त्रीलिङ्गोऽयं सुन्दरीपीशब्दः । एकारान्तः स्त्रीलिङ्गोऽन्याश्चापूर्वो विप्रेशब्दः । केषाञ्चित् इपीः इपीयौ इपीयः इति रूपं वर्णयन्ति । तदसङ्गतम् । ईशब्दवदेवास्य रूपसञ्चारः । लक्ष्मीशब्दवदिति च स्फुटम् । तथा चैवं रूपसञ्चारः– 'इपीः, इपियौ इपियः' इत्यादि । एवं विप्रेशब्दोऽपि विप्रशब्दोत्तरेण ईकारेण निष्पन्नः– 'विप्रस्य ईः विप्रेः' इति । तेन 'विप्रेः, विप्रयौ, विप्रयः' इत्येव रूपसञ्चारः ।

चतस्रो मीमांसाः

अत्र मीमांसाश्च चतस्रः समायोजिषत । ताश्च– मात्राच्छन्दोमीमांसा, शब्दालङ्कारमीमांसा, श्लेषमीमांसा, तारतम्यमीमांसा च । ऋते चामूभ्यश्चतसृभ्यो मीमांसाभ्यो न महाभारततात्पर्यस्याध्ययनसामग्र्यं सम्पद्यते । तदर्थं परिशिष्टे मीमांसाचतुष्टयम् ।

आदौ तावन्मात्राच्छन्दोमीमांसा । वैदिकच्छन्दस्सु यद् वक्तव्यं प्रायस्तत् सर्वमुपनिषच्चन्द्रिकायां व्यस्तारि । लौकिकानामप्यक्षरच्छन्दसां बहु वक्तव्य-मुक्तं श्रीमध्वविजयपरिशिष्टे । मात्राच्छन्दसामपरिचितं प्रपञ्चं प्रपञ्चयितुमयं प्रयासः । तत्राप्यन्यैः काव्येष्वप्रयुक्तानि गीतिच्छन्दांसि, आचार्योपज्ञं चात्रोपयुक्तान् गीतिप्रभेदांश्च विवेचयितुमत्र प्रायतिषि ।

मन्ये छन्दःकुतूहलिनां लयनृत्यदङ्गुलीनां तदिदं सुकरमवबोधाय च स्यात्, अमन्दं विनोदमोदाय च स्यादिति । महाभारततात्पर्यगतानि भगवत्पादकृतान्येव पद्यानि प्राय उदाहारि । यत्र तु पद्यानामलाभस्तत्र मयैवोदाहरणपद्यानि व्यरचिषतात्र न्यबन्धिषत च । तदेवं स्वानन्दाय च च्छन्दोविलासः प्रदर्शितः ।

✻

द्वितीया च शब्दालङ्कारमीमांसा । अर्थालङ्काराः पुनर्मध्वविजयपरिशिष्टे व्यस्तारिषत च पर्यष्कारिषत च । शब्दारङ्कारस्य वैविध्यमीषत् परिचाययितुम्, अत्राऽचार्यपादेनोपयुक्तानां शब्दानामलङ्काराणां प्रभेदान् पुनर्विशेषतः परिचाययितुम्, शब्दालङ्कारमीमांसा चात्र न्यबद्ध्यत । तत्र किञ्चिदपूर्वं चास्ति । कश्चन रहस्यभेदः । तथाहि–

ग्रन्थेऽस्मिन् संहत्याशीतिः पद्यानि । भूमिगतस्य भगवत्पादस्यैकैकं वत्सरं प्रत्येकैकं पद्यमिव । सर्वाण्यपि यमकेन चित्रेण वा सङ्गतानि दृश्यन्ते, पद्यमेकं विहाय । किमेकम्? 'देवानां पतयो नित्यम्...'(७२) इति पद्यम् । नात्र किमपि यमकम्, नात्र किमपि चित्रम्, ऋते प्रायः श्रुत्यनुप्रासम् । इदमेव चित्रम्, यदस्मिन् समग्रे चित्रकाव्ये इदमेकमचित्रं पद्यं निवेशयामास भगवत्पाद इति । न ह्यकारणं महान्तः किमपि कर्तुं प्रवर्तन्ते । तत् केनापि कारणेन भाव्यम् । तत् किं कारणं स्यात्?

किं स्यात्? किं स्यात्? प्रश्न एव चिरं चित्ते पर्यवर्तत । नोत्तरदानाय केनापि प्रायत्यत । अनुवादाः प्रावर्तन्त । प्रवचनानि प्रावर्तन्त । 'अहो रूपमहो ध्वनिः' इति स्वहस्तास्फालितस्वपृष्ठाः केचिदुज्जगुः । प्रश्नस्तु पर्यवर्ततैव ।

बहोः कालादयं शङ्काशङ्कुर्मां चिन्ताव्यग्रमकरोत् । एकदा, अकस्मादेवं प्रत्यभासीत् तत्र स्थितमक्षरन्यासमनुशीलयतः– कश्चनायं बन्धविशेषः स्यादिति । ततः कमाकारमेते वर्णाः सम्पादयेयुरिति विविधा रेखा विन्यासंविन्यासं प्रायतिषि । अद्भुतः स क्षणः, चक्षुषोः पुरतः साक्षाद् भगवदीक्षणसदृक्षः, यदा रहस्यम-भज्यत । सहसा वर्णा रेखान्तर्विन्यस्ता आकारविशेषमभजन्त । अनन्त-पारोऽयमाचार्यपादस्यानुग्रहः । यदाचार्योपज्ञमपूर्वोऽयं नागभोगबन्ध अवि-रक्रियत । परिशिष्टे सचित्रविन्यासं विवृतमेतत् । न केवलं नागभोगबन्धः । अन्यथाऽन्यथा रेखाविन्यासेन प्रयतनेऽन्येऽपि नूतनबन्धविशेषा इतः प्रादु-र्भवेयुः । अपि चेदं निगूढमिव भाति यद् बुद्धस्तुतिरूपमिदं पद्यमपि बुद्धवदेव मन्दमोहनमन्तःप्रशान्तं पिहितबन्धं चेति ।

✻

तृतीया चात्र श्लेषमीमांसा भवति । तुरीया तारतम्यमीमांसा भवति । तदन्ते श्लोकार्धानुक्रमणिकेति परिशिष्टक्रमः ।

श्लेषप्राणं हि यमकम् । अतः केचन मुख्याः श्लेषप्रभेदा श्लेषमीमांसायां विश्लेषिताः । अथात्र किञ्चिद् वैदिकं रहस्यं चाविष्कृतं भवति । शब्दशास्त्रविदां जिज्ञासाऽपि परिहृता भवति । तथाहि पुराणकारा आमनन्ति–

> 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते ।
> विष्णोः सहस्रनामापि निरन्तरशतार्थकम्' इति ।

अथात्र जिज्ञासा । कथमिदं सम्भवति? यतः 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इति भाषाशास्त्रे नियमः ।

सत्यमस्ति नियमः । अनियमे सर्वव्यवहारविप्लवः प्रसज्येत । न किमपि केनापि निर्णीयेत । तस्मादिदं लोकव्यवहारनिर्वाहायावश्यमभ्युगन्तव्यम्, यत् सकृदुक्तं सकृदेवार्थं गमयतीति ।

अथापि नियमः सापवादो भवति। अन्यादृशो लोकव्यवहारो भवति। अन्यादृशश्च काव्यशास्त्रव्यवहारः । यत्रैकेन पदेन एकप्रयोजनपर्यवसाना बह्वर्था वक्तृविवक्षागोचरास्तत्र नायं नियमः प्रसरति। एकार्थपर्यवसायित्वं वा नियमार्थः। वक्तृविवक्षैव हि चरमं निर्णायकम् । कथमन्यथा श्लेषालङ्कारप्रसरः? अर्थभेदव्यवस्थापकस्य स्वरभेदस्यानाश्रयणेन एकप्रयत्नोच्चारणेन काव्येषु किल श्लेषो भूषणमित्याघोषयन्ति । तथा शास्त्रेष्वपि । तेन युक्ता दशार्थता भारतस्य, निरन्तरशतार्थता च विष्णोः सहस्रनाम्नाम् ।

तर्हि कथं वेदे? तत्र हि नियताः स्वराः । ननु स्वराविरोधेनैवार्थत्रयं क्रियते । तथा हि 'अग्नि' इत्यन्तोदात्तं पदम् । तत्रानुदात्तोऽकारः अगस्यागत्वं दृढमित्याह । उदात्त इकारोऽगनेतुर्नेतृत्वमुच्चमित्याह । तथाच अगस्य कदाऽप्यनपगतस्वतन्त्रचलनरहितत्वविशिष्टस्य निः उच्चनेता स्वावरनिष्ठचलननियामकत्वापेक्षयाऽधिकनियामकत्ववानिति पदार्थः । स च तारतम्येन अभिधावृत्त्यैव अग्नौ प्राणे नारायणे च समान इति युक्ता त्र्यर्थता वेदानाम् ।

यथा वा 'यजमानस्य पशून् पाहि' इति । यजमानस्य गोष्ठे पशून् पाहीत्येकोऽर्थः । यजमानस्य वेदान् पाहीति चापरः । 'पान्ति शंसाधनाश्चेति वेदाः पशवः ईरिताः' इति हि स्मरन्ति । 'प्रजया पशुभिः' इत्यत्रापि प्रजा इति पुत्रा उच्यन्ते; प्रजा इति शिष्या उच्यन्ते; प्रजेति प्रज्ञाऽप्युच्यते। अथच क्वचिदेकोऽर्थ एकेन ऋषिणा दृष्टः । सस्वरश्च मन्त्रः । तमेव मन्त्रमन्योऽप्यृषिः पश्यति तेनैव स्वरभेदेन। परन्त्वन्यमर्थं पश्यति। एतदर्थमेव स्वराणां व्यत्ययं बाहुलकेनोशन्ति वैयाकरणाः । तेन पूर्वपदप्रकृतिस्वरत्वेऽपि क्वचित् तत्पुरुषः स्यात् । उत्तरपदप्रकृतिस्वरत्वेऽपि क्वचिद् बहुव्रीहिः स्यात्। वक्तृतात्पर्यं स्वरोऽनुरुणद्धि। न हि विरुणद्धि। अत एव याज्ञिकप्रयोगादृतेऽन्यत्र वेदानामैकस्वर्यं चानुमन्यन्ते वैयाकरणाः । तस्माद् युक्तास्त्रयोऽर्थाः सर्ववेदेषु । तदेवं वेदा अपि वेदान्ता

अपि हि चित्रकाव्यानीव श्लेषयोषाश्लेषप्रिया इत्यवगमयितुमेव भगवानाचार्यश्चित्रकाव्यं श्लेषप्राणं प्रणिनायेति सर्वमतिसुन्दरम् ।

इमामाचार्यगोविन्दः प्रमृष्टां शब्दतोऽर्थतः ।
महाभारततात्पर्यभूमिकां समचीक्लृपत् ॥

शास्त्रचिन्तननिरूढधुराणां चेतसा च वचसा मधुराणाम् ।
भूमिकाश्रनतृषाविधुराणां भूमिकामकृत विष्णुपराणाम् ॥

✻ ✻✻

श्रीमदानन्दतीर्थभगवत्पादविरचितं चित्रकाव्यं

श्रीमहाभारततात्पर्य्यम्

श्रीनरहरितीर्थविरचितया श्रीकृष्णप्रकाशिकया
आचार्यगोविन्दविरचितया श्रीकृष्णचन्द्रिकया च सहितम् ।

[संहितापाठं सपदपाठं च]

संशोधकः सम्पादकश्च

बन्नञ्जेपदोपाह्व आचार्यगोविन्दः

ईशावास्यप्रतिष्ठानम्
उडुपि-बेङ्गळूरु
२००६

29-3-2006

श्रीः

ओ३म् ॥ ध्यायेत्परमानन्दं[1]
यन्मातापतिमयदपरमानन्दम् ।
उज्झितपरमानन्दम्-
पत्याद्याद्याश्रमैस्सदैवपरमानन्दम् ॥ १ ॥

ध्यायेत् । परमानन्दम् । [परम् । आनन्दम् ।] यन्माता । [यत् । माता] पतिम् । अयत् । [अपरमानन्दम्] अपरम् । आनन्दम् । [अपरमा । आ-नन्दम्] ॥ उज्झितपरमानम् । दम्पत्याद्याद्याश्रमैः । सदा । एव । परमानन्दम् । [सदैवपरमानन्दम्] ॥ १ ॥

कृष्णप्रकाशिका

श्रीशं गुरूणां गुरुमाद्ययोनिं वेदैकवेद्यं निखिलेश्वरेश्वरम् ।
नमामि विष्णुं जगदेकवन्द्यं केशादिभिः प्राप्यतमं सुनित्यम् ॥ १ ॥

यो [2]भारतेऽमितसुखानुभवामृतात्मा
नारायणोऽखिलजगज्जननादिहेतुः ।
क्षीराम्बुधेः सुरकृतेऽखिलदुष्टहन्ते-
हागत्य सात्वतपतिः स हि नोऽस्तु चित्ते[3] ॥ २ ॥

---

१. **'ध्यायेत् तं परमानन्दम्'** इति छन्दःशास्त्रगन्धविधुराणां भ्रममूलः पाठः ।

२. **'यो भासते–'** इत्यपि पाठः स्यात् । **'भारते–'** इति तूत्तरश्लोकानुगणम् ।

३. यः भारते प्रतिपाद्यतया स्थितः, क्षीराम्बुधेरिह भारतदेशे आगत्याखिलदुष्टहन्ता बभूव स हि नोऽस्तु चित्ते ।

यो भारतीमतितरामधिकामिमां गां
श्रीबादरायण उतान्यसमस्तगोभ्यः ।
देवासुरेष्टगतिदां स्वपदक्रमेण
प्रीतः स मे गवि सदाऽस्त्वमितात्मबोधः[1] **॥ ३ ॥**

यो भारतीमपहृतामसुरैः सहान्य-
गोभिः शुभां[2] **भगवतीमसुरान् निहत्य ।**
उत्साद्य चात्र कुपथानथ वैष्णवीं तां
चक्रे करोतु स दशप्रमतिर्हि गां नः[3] **॥ ४ ॥**

कृष्णचन्द्रिका

नवतरुणं भवतरणं भूभरहरणं प्रति कृतावतरणम् ।
यायाममराभरणं शरणं जनिताध्वराभरणम् ॥ ✻ ॥

स्मरामितं श्रुतिमितं सुखतीर्थं स्मरामि तम् ।
परं परां बोधयन्तीं तथा गुरुपरम्पराम् ॥ ✻ ॥

अपार्थेनापपाठेन मूलं तत्पञ्चिकामपि ।
दूषयामासुरेके तन्निरासायायमुद्यमः ॥ ✻ ॥

महाभारततात्पर्यं तथा कृष्णप्रकाशिका ।
अपार्थपरिहाणाय सङ्गम्येते परस्परम् ॥ ✻ ॥

---

१. **‘–तप्रबोधः’** इति पाठान्तरम् । यः श्रीबादरायणः भारतीमिमां गां भारतभूमिं स्वपदविन्यासेन अन्येभ्यः समस्तगोभ्यः भूमिभागेभ्योऽतितरामधिकां पुण्यभूमिम् । चक्र इति वक्ष्यमाणमत्राप्यनुवर्तते । **‘चक्रे स मे गवि’** इति पाठे तु स्वरसोऽर्थः । स मे गवि वाचि वसतु । अथच योऽन्यसमस्तवचनेभ्योऽधिकां भारतीं भारताख्यानविषयां वचनततिं चक्रे स मे वाचि वसतु ॥

२. **‘सुगाम्’** इति क्वचित् ।

३. पुराणाद्यन्यवाणीभिः सहापार्थकरणेनासुरैरपहृतां भारतीं वेदवाणीं, तान् कुपथानसुरान् अत्र भुवि तत्ववादेनोत्साद्याथच तमःपातनेन निहत्य, पुनर्विष्णुगामिनीं चक्रे स नः गां वाणीमपि वैष्णवीं करोतु ।

ये भारतेन सततं हि परिव्रजन्ति
भाषासु रीतिशितके चतुरा अनन्तम् ।
तत्पादपङ्कजनिवायुकृतोरुमार्गां-
स्तान् पद्मनाभवरतीर्थगुरून् नमामि[1] **॥ ५ ॥**

ध्यायेत् तं परमानन्दं संसारान्मुक्तये सुधीः ।
यत्प्रमाता विधिः प्राप वृतो देवादिभिः पतिम् ॥ ६ ॥

न विद्यते परो यस्माद् यः स आनन्द इत्यपि ।
उज्झिता अरयो यैस्तु तेषां मानं तनोत्ययम्[2] **॥ ७ ॥**

उक्तमप्यस्फुटं किञ्चिदनुक्तं स्फुटमित्यपि ।
पूर्वाचार्यैर्द्वयमपि स्फुटीकर्तुं प्रयत्यते ॥ ✻ ॥

अथातो महाभारततात्पर्यं व्याख्यास्यामः । कथं महाभारततात्पर्यम्? यद् भगवत्पादो भगवति कृष्ण एव महाभारतस्य महत् तात्पर्यमिति प्रचिकाशयिषन् महाभारतानुस्यूतां कृष्णकथां सञ्जग्राह यमकनद्धैः प्रचुरं गीतिप्रभेदबद्धैः पद्यैः । यथाऽल्पेनैव प्रयासेन महाभारतस्य हृदयमवबुद्ध्येत; यथा वाऽल्पेनैव कल्पेन महाभारतपठनफलमनल्पं सङ्कल्प्येत । तदेतद् ‘यमकभारतम्’ इत्यामनन्ति यमकमुग्धा अर्वाचीनाः । ‘भारतसङ्क्षेपः’ इति पण्डिताचार्यः । तथाहि तद्वचनम्– ‘गोप्यं भारतसङ्क्षेपमकृथा विश्वविस्मयम्’ [म.वि.१५.८३] इति ॥

संसारान्मुक्तये सुधीस्तमेव ध्यायेत् परमानन्दम् । परं सर्वोत्तमं आनन्दरूपं च वा । परा मा ज्ञानम्, परश्चाऽनन्दो यस्य यस्माद् वा । परमानन्दमुद्दिश्य वा । उत्तरत्र ‘यन्माता’ इति यत्पदश्रवणात् तमित्यनुक्तमपि वर्तते । एतेन ये

---

१. ये भारताख्येनाऽलम्बनेन सततमनन्तं नारायणमेव परिव्रजन्ति तान् तस्यानन्तस्य पादपङ्कस्थानीयायां भुवि जातेन वायुना मध्वरूपेण सन्दर्शितोरुवेदमार्गान् पद्मनाभतीर्थान् नमामि । **‘तत्पादपङ्कजन–’** इति क्वचित् । नातिस्फुटमिदं वचनम् । **‘तत्पादपद्मजनि–’** इति पाठः स्यात् । **‘तत्पादपङ्कजभ-वायु–’** इति क्वचित् । तदप्यस्फुटार्थमेव ।

२. **‘मानं करोत्ययम्’** पा.

दम्पत्याश्रमतोऽप्याद्यो ब्रह्मचर्याश्रमः स्मृतः ।
तावेवाऽद्यौ[1] तु येषां हि ते दम्पत्याद्याद्याश्रमाः[2] ॥ ८ ॥

च्छन्दोगन्धविधुराः 'ध्यायेत् तं परमानन्दम्' इत्यनुष्टब्बद्धं व्याख्यानगतं श्लोकपादमेव मूलपाठं भ्रमन्तः, पठन्ति, शोचनीयास्ते अष्टाक्षराया अनुष्टुभः द्वादशमात्राया गीतेश्च भेदमजानन्तः ॥

तं कम्? यन्माता पतिमयत् । यस्य माता प्रमाता विधिः । यदिति भिन्नं वा पदम् । पतिं पातीति पितरं पातारं च अयत् अयात् । या गतौ । शरणं प्राप । तमेव प्राप च मुक्तौ । निश्चितं प्राप्स्यति हि । यत् यस्मात्, तस्मात् तमेव संसारान्मुक्तये ध्यायेत्, अन्योऽपि माता प्रमाता सुधीः । यन्माता यत्प्रमाता मुक्तवर्ग इत्यपि व्याचक्षते । तदा भूतलकारस्य स्वरसोऽर्थः । विधिर्न केवलं स्वयम् । देवादिभिर्वृत एव प्राप । तेऽपि हि प्रमातारो यथाधिकारम् । स्फुटं चैतदुपरि दम्पत्याद्याद्याश्रमैः सुरैरिति । कीदृशं पतिमयत्? अपरम्, आनन्दम् । न विद्यते परो यस्मादित्यपरमनुत्तमम् । आनन्दरूपं च । अनुत्तमानन्दरूपं वा । केचिदेवं व्याचक्षते– 'न विद्यते परमो येषां ते अपरमाः । ये स्वातिरिक्तं ब्रह्म नाङ्गीकुर्वन्ति, ये विष्णोः पारम्यं वा नाङ्गीकुर्वन्ति तान् न नन्दयतीत्यपर-मानन्दः' इति । 'न विद्यते परा उत्कृष्टा मा तत्वज्ञानं येषां तानपि न नन्दयति' इति च । 'अः परमो येषां तानानन्दयति' इति च ॥

ननु यथा ब्रह्मादयस्तमापुः, नान्ये तथा, तत् को विशेषस्तेषु? आह– उज्झितपरमानम् । परशब्दः शत्रुवचनः । उज्झितपरा जितारयः । तेषां मानं ज्ञानं यस्मात् । तान् मानयतीति वा । के तेऽरयः, ये जेतव्याः? आन्तराश्च बाह्याश्च । आन्तराः कामादयः । बाह्यास्तदभिमानिनः कालनेम्यादयः । उभयेऽपि देवैर्विजिताः । येयेऽधिकमधिकमुज्झितपरास्तांस्तानधिकमधिकं मानयतीति ॥

---

१. **'स एवाऽद्यस्तु'** इति स्वरसः पाठः ।

२. **'–येषां ते दम्पत्याद्याद्याश्रमाः'** इति हिरहितोऽपि पाठः स्यात् । **'–दम्पत्याद्यादियाश्रमाः'** इति क्षैप्राक्षरव्यूहेन तुरीयपादस्याष्टाक्षरता । छन्दोगत्यानुगुण्यं च तदा भवति ।

चतुर्भिराश्रमैः पूर्णैर्युक्ता ये हि सुराः सदा ।
सह दैवेन हरिणा वर्तन्ते परमास्ततः ॥ ९ ॥

तेभ्य आनन्ददो विष्णुस्तस्मादेवमुदीर्यते ।
यद्वा यस्माज्जगन्माता पतिं प्राप हरिं सदा ॥ १० ॥

तेषामाराधनमप्यधिकमित्याह– दम्पत्याद्याद्याश्रमैः । दम्पत्योरिदमुचितं दम्पत्यम् । तद् यथा भृतियोग्यो भृत्यः, कृतियोग्यं कृत्यम् । दाम्पत्यमेव वा दम्पत्यम्, दीर्घलोपेन । तद् यथा पतिमयदित्याह । अयादिति वक्तव्यम्, अयदित्याह । एवमिहापि दाम्पत्यमिति वक्तव्यम्, दम्पत्यमित्याह । का गमनिका? स्वातन्त्र्ये व्यत्ययः । भक्तस्य भगवदयनेऽपि भगवानेव स्वतन्त्रो न भक्त इत्ययदित्याह । दाम्पत्यमपि जायया निगृहीतमिति परतन्त्रम्, न ब्रह्मचर्यादिवदेकतन्त्रमिति दम्पत्यमित्याह ॥

दम्पत्यं च तदाद्यं ब्रह्मचर्यं च । ते एवाऽद्ये येषां ते दम्पत्याद्याद्याः । 'दम्पतिशब्देन दम्पत्याश्रमो लक्ष्यते' इत्यपि व्याचक्षते । अथवा किमनेन घट्टकुटीप्रभातेन? दम्पत्योराद्यं ब्रह्मचर्यम्, तदेवाऽद्यमुत्तरेषामिति विग्रहे न काऽपि क्षतिः । केचित् दमिति पत्याद्याद्याश्रमैः इति च भिन्ने पदे इत्यभिप्रेत्य व्याचक्षते– 'भक्तानामभीष्टं ददाति दुरितं द्यतीति च दः । पतिरिति गृहस्थ उच्यते । पत्युराद्यो ब्रह्मचारी । स एवाऽद्यो येषां ते चतुराश्रमिणः । तेषामाश्रमा ब्रह्मचर्याद्याश्रमाः । आश्रमशब्देन आश्रमधर्मा उच्यन्ते । तैराश्रमधर्मैः । एतच्चोपलक्षणं वर्णधर्माणामपि' इति ॥

भवति चात्र द्वयी गतिः । दम्पत्याद्याद्या आश्रमाः सदैव येषां चतुराश्रमिणां सुराणां ते दम्पत्याद्याद्याश्रमा इत्येकः । ते च ते आश्रमाश्चेत्यपरः । प्रथमे सदैव दम्पत्याद्याद्याश्रमैः सुरैः सह यन्माता पतिमयदिति पूर्वान्वयः । सुरा एव हि सर्ववर्णाः सर्वाश्रमाः । तदनन्तरं यथायथं देवगन्धर्वादयश्च ॥

द्वितीये दम्पत्याद्याद्याश्रमैः सदैवपरमानन्दमित्युत्तरान्वयः । चतुर्भिराश्रमैः समेतैर्ये नारायणाख्यं दैवं सपर्यन्ति ते सदैवाः । अत एव परमाः ।

आनन्दरूपमानन्दं स्वगुणं वा यतो हरेः ।
विष्णुरेव परो यस्याः सर्वस्मात् परमा च या ॥ ११ ॥

आनन्दं वा समुद्दिश्य प्राप नारायणं पतिम् ।
एतेन परमानन्दो हरिरेवेति साधितम् ॥ १२ ॥

ननु सर्वे परानन्दाः स्वावरापेक्षया यतः ।
को विशेषस्ततश्चेशे शङ्का [१]नोनुद्यतेऽधुना ॥ १३ ॥

परस्य ब्रह्मरुद्रादेरानन्दपरिमाणकम् ।
उज्झितं यत्परानन्दे सोऽनन्तानन्द एव हि ॥ १४ ॥

अथ वैरिणां मानहरणं येन तं प्रभुम् ।
वैरिशोभाक्रिये येन वोज्झिते तं नृकेसरिम्[२] ॥ १५ ॥

भगवतोऽतिनैकट्याच्च । अत एव विशिष्य तानानन्दयतीति भगवान् सदैव-परमानन्द उच्यते ॥

ननु प्रमातारः प्रकृतिमक्षराख्यामुपासीरन्? साऽपि हि परमा तेषाम् । तत्रापीदमेवोत्तरम्– यत् जगन्माता पतिमयत् अपरमा आनन्दमिति । अकारवाच्यो भगवानेव परमो यस्याः, न विद्यते चान्यः परमो यस्याः सा अपरमा रमाऽपि जगन्माता यदानन्दरूपं पतिमयत् स्वानन्दमुद्दिश्य ततश्च तस्मादेव पत्युः स्वरूपानन्दमयत्, तस्मात् तमेव परमानन्दं ध्यायेत् ॥

किं चात्र मानम्? यद् यस्मात् माता वेदमाता तं जगत्पतिं तथैवायत् प्रत्याययत्, समतीतक्षराक्षर इति, परमानन्द इतीत्येतत् । 'वाचो मा मातरः स्मृताः' इति वचनात् । 'सप्तशिवासु मातृषु' इति च ॥

तदेव प्रकटमाह–उज्झितपरमानम् । परेषां रमाब्रह्मादीनामानन्दे यत् परिमाणमियत्तापरिच्छेदस्तदुज्झितं यस्मिन् यदानन्द इत्येतत् । उज्झितं परमानं उत्तरावधिः यदानन्द इति वा । तस्मात् तमेव परमानन्दं ध्यायेत् ॥

---

१. अपनुद्यत इत्यर्थः ।

२. **'क्षीरोदार्णवशायिनं नृकेसरिम्'** इति नृसिंहपूर्वतापिन्याम् । तदेव श्रौतं रूपं टीकाकृदनुसार ।

तदिदं परमं दैवमिज्यते यैः स्वकर्मभिः ।
वर्णाश्रमोचितैस्तान् हि पाति विष्णुर्न चेतरान् ॥ १६ ॥

सर्वेषां च यथायोग्यं रतिज्ञानगतिप्रदम् ।
रमाचेष्टाप्रदं वा तं ध्यायेन्नारायणं प्रभुम् ॥ * ॥ १७ ॥

यस्यकराळोळं
चक्रङ्काळःपरस्सहिक[१]राळोळम् ।
यस्यगदापवमानः
सन्योव्यासोभवत्सदापवमानः ॥ २ ॥

अथच उज्झितं शत्रूणां मानं येनेति देवशत्रूणां गर्वहरणं ज्ञानहरणं च । अथच मा शोभा, अन इति चेष्टा । तावुज्झितौ शत्रूणां येन । मानहरणेन ते निस्तेजसोऽभवन् निश्चेष्टाश्चेति । विशिष्य चैवं मकारवाच्यो नरकेसरी स्तूयते मङ्गलपद्येऽत्रेति च ज्ञायते । 'नृसिंहादिकमन्यत्तु दुरितादिनिवृत्तये' इति स्मरन्ति । अत एव च प्रतिपादान्ते मकारं निबबन्ध । दकारेण च दण्डी मन्वन्तरस्यास्योपेन्द्रो वामनश्च स्मृतः । टीकायाम् 'नृकेसरिम्' इति छान्दसपद-प्रयोगेण भगवत्पादानुगृहीतस्य स्वग्रन्थस्यापि छन्दस्तुल्यतां सूचयति । तद्यथा गळवान् गळिः, तथा केसरवान् केसरिर्भवति । केशवान् केशिर्भवति । प्रायुङ्क्त च भगवत्पादः– 'अथ हतयोर्गळिकेश्योः' इति ॥

अथच दम्पत्याद्याद्यैश्चतुर्भिराश्रमैः, तदुचितकर्मानुष्ठानेन ये सदैवाः समाराधितपरदेवताः, तानेव केवलं पातीति सदैवपः । रमानन्दश्च सः । रमामानन्दयतीति । रमाया अप्यनं चेष्टां ददातीति वा रमानन्दः । सर्वेषामपि रं रतिम्, मां ज्ञानमनं चेष्टां च ददद् वा रमानन्द उच्यते । बिन्दुरवधारणे । तेन अनदं सन्तमनन्दमाह ॥

अनेनैतदपि सूचितम्– यन्महाभरततात्पर्यं नाम ग्रन्थोऽधिक्रियत इति । महाभारतमङ्गलपद्ये प्रस्तुतानामेव नरनारायणयोर्नरोत्तमस्य देवीसर-

---

१. **'परस्य हि'** इति प्रचलितः पाठः प्रामादिकः ।

यस्य । करालोळम् । चक्रम् । काळः । परः । सः । हि । कराळः । अलम् ॥
यस्य । गदा । पवमानः । सन् । यः । व्यासः ।[वि । आ । सः ।] अभवत् ।
सदापवमानः ॥[सत् । आपवमानः ।] [सदा । पवमानः।]॥ २ ॥

स एव[1] भगवान् विष्णुः परमानन्द इत्यपि ।
बोधयन्तो महान्तोऽथ प्रथमं प्रळये स्थितम्[2] ॥ १८ ॥

वदन्ति श्रीमदाचार्या यस्येत्यादिगिराऽनया[3] ।
स एष भगवान् विष्णुर्यतश्चक्रगदाधरः ॥ १९ ॥

सर्वसंहारकं चक्रं दुर्गारूपं हि यत्करे ।
कालात्मकं [परः][4] कालो नरसिंहो भयङ्करः ॥ २० ॥

स्वत्योर्व्यासस्य चात्रापि प्रस्तावात् । तथाहि परमानन्द इत्युत्कृष्टानन्दः कृष्णः । मातारौ भीमार्जुनौ । मातरौ च देवीसरस्वत्यौ । व्यासोऽपि परमानन्दपदेनैव गदितः । परा मा परविद्या । तया नन्दयति सुधीजनमिति । उक्तं हि– 'परविद्याख्यं चक्रे शास्त्रमनुत्तमम्' इति । भारतकथा चात्र सङ्क्षेपतो भवति कथिता ॥

अनेनैव विषयादयोऽपि निरूपिताः– य एव महाभारते त एवात्रेति । परमानन्दो नारायणो विषयः । परमानन्दरूपो मोक्षः प्रयोजनम् । ध्याता जितकामादिरधिकारी यः स्वाश्रमोचितं विहितमनुतिष्ठति । सम्बन्धश्च यथायथम् ॥

अत्रैवं मात्राणां गतिश्चतुर्षु पादेषु १२+१९+१२+२३ । गीतिप्रभेदोऽयम् । क्वचन गीतिषु स्वच्छन्दा हि मात्राणां गतिर्भवति यथा लयो न विलयमेति । नवा एकया मात्रया छन्दांसि वियन्ति न द्वित्राभ्यां न त्रिचतुराभ्यां वा ॥ १ ॥

१. **'स एष–'** इति पा. २. **'स्थितिम्'** पा.
३. **'–गिराऽमरान्'** इति प्रचलितः पाठः प्रामादिकः ।
४. **'यतः'** इति प्र.पा. । अयं सम्भावितः पाठः ।

अनन्तसुकराळास्यकरश्रीमत्पदाम्बुजः ।
जानानो हि मरुत् सर्वं गदारूपो हि यत्करे ॥ २१ ॥
प्रळयेऽपि स वै देवः श्रीमन्नारायणो वसन्[1] ।
व्याऽभवद् वासुदेवादिरूपेणाग्रे स एव हि ॥ २२ ॥

भगवान् विष्णुः परमानन्द एवेत्युक्तम् । स एव परमानन्दः, सर्वस्यान्यस्य तेन सृष्टत्वादितीदानीमुच्यते । यदा किमपि नासीत् तदाऽपि सन्नयं नारायणः स्वयमेव स्वात्मानं बहुधा ससर्ज; जगच्च बहुचित्रम्, स एव व्यासो बभूव महाभारतरचनायेत्याह– यस्य कराळोळं चक्रम् । यस्य करे आलोळं परिभ्रमणशीलम्, अलोळं दृढं वा, चक्रं स्वयं कालः । कल संहारे । सर्वसंहारकं कालमानिदुर्गारूपम् । स हि परः परमात्मा । ननु कालो नाम भगवानुच्यते 'कालोऽस्मि लोकक्षयकृत्' इति स्ववचनात् । सत्यं सोऽप्युच्यते साऽप्युच्यते व्यवस्थयेत्याह– परः स हि । तथाहि स्मरन्ति–'सा ब्रह्मप्रळये देवी वर्तते चक्ररूपिणी । तस्या नियामको विष्णुः परः कालः स उच्यते' इति भागवततात्पर्ये । स नरसिंहात्मा परो हि कालः । यथा स परमाक्षरः । इयमप्यक्षरपदगदिता । कथं कालः? सर्वसंहर्तृत्वात् कलितसम्पूर्णसद्गुणत्वाच्च । नन्वयं नरसिंह इत्याह– अलं कराळः । भयङ्करः । अलमनन्ततया । अनन्तसुकराळास्यकरश्रीमत्पदाम्बुज इत्येतत् । सर्वं पवते जानातीति पवमानः सर्वविन्मरुद् यस्य गदा भूत्वा करे विलसति । अत्र संहारोपयुक्ते चक्रगदे एव विशिष्य गदिते । प्रळयप्रसङ्गात् । चक्रगदाधराख्यो रूपविशेषश्च मुखतः स्तुतो भवतीति च । तथाहि सहस्रनामसु– 'गुप्तश्चक्रगदाधरः' इति । अथ सृष्टिक्रममाह– सन् यो व्या सोऽभवत् । यः सन् सदा सन्, प्रळयेऽपि सन् सः सिसृक्षया व्याभवत् वासुदेवाद्यात्मना । अथच व्यस्यत इति व्यासो व्यस्तोऽभवत् । अविभक्तमात्मानं विभक्तमिव चक्रे चतुर्धा पञ्चधा दशधा द्वादशधा शतधा सहस्रधाऽनन्तधा च ॥

१. **'–यणोऽवसत्'** पा.

अथवा व्यस्यत इति व्यास इत्युच्यते हरिः ।
विभक्तोऽभवदित्यर्थश्चतुर्धा पञ्चधाऽपि च ॥ २३॥

द्विषड्दशशताद्यात्मा विशेषादेव केवलम् ।
एवं व्यासाभिधानोऽथाभावयत् सदिदं जगत् ॥ २४ ॥

आत्मसर्गः कथितः। इदानीं जीवजडयोः सर्गमाह–अभवत् सत्। सत् सत्यमिदं जगत् अभवत् अभावयत् । तत्राप्यादौ जीवकलामानि सत् प्राणतत्त्वमभावयत् । 'सदिति प्राणः'इति श्रुतेः । ब्रह्मवायू इत्येतत् । 'अभवत्' इति स्वातन्त्र्येऽन्तर्णीतणिच् ॥

इदानीं स्थितिमाह–सन् यो व्यासोऽभवत्। व्यासः चतुर्धा, पञ्चधा, दशधा, द्वादशधा, चतुर्विंशतिधा, अष्टोत्तरशतधा, सहस्रधा चेत्यादिना बहुरूपतया विभक्तः सन् तत्र जगति तत्तद्रूपेण प्रविश्य सन् निषण्णोऽभवत्। पालनार्थम्। एतेन नियमनं च कथितम्। 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतिः। तत एव च आपवमानः । आ समन्तात् पवते रक्षति पावयति च स्वसन्निधानेन सर्वं जगदित्यापवमानः। पुङ् रक्षे। पवते चेष्टयति च। पुङ् गतौ। 'को ह्येवान्यात् कः प्राण्यात्' इत्याद्या श्रुतिः। सदाऽपि प्रळयेऽपि पवमानः रक्षक इति वा। आपवमानं जगदिति वा । आब्रह्मस्तम्बपर्यन्तमित्येतत् । आपवमान इति द्वितीयार्थे प्रथमा। स्वातन्त्र्ये व्यत्ययः। 'सप्तसु प्रथमा' इति सूत्रम् ॥

अथ प्रकृतं व्यासावतारमाह– सन् यो व्यासोऽभवत् । सर्वदा सन्नेव पुनर्व्यासरूपेण प्रकटोऽभवत्। अवतारप्रयोजनमाह– अभवत् सत्। सत् अवसन्नं भरतानां कुलं वैदिकं च वाङ्मयमभावयत् प्रतिष्ठापयामास। सच्छास्त्रं च भारतपुराणाख्यमभावयत् विरचयामास। व्यासपदेनैव वेदविभजनं निगदितम्। कथं कुत्रावतीर्णः? आपवमानः। विभिन्नानामापगानामपां समुदय आपम्। तद् विवेचयामास, विविच्य दर्शयामास इमा अस्या आप इमा अस्या इतीत्यापवो वसिष्ठः। 'ता एवापो ददौ तस्य स ऋषिः संशितव्रतः' इति हि स्मरन्ति।

यस्मादापवमानश्च स्वातन्त्र्ये व्यत्ययो भवेत्[१] ।
एवं सामान्यतः सर्वानवतारान् हरेः प्रभोः ॥ २५ ॥

उक्त्वा सृष्टिं च जगतः सङ्क्षेपादभिधाय च ।
अधुना भारतं वक्तुमाह वासिष्ठपुङ्गवम् ॥ २६ ॥

सन् यो व्यासोऽभवदिति विशेषाद् भारताधिपम् ।
उत्सन्नं भारतं वंशं यो दधार हरिः परः[२] ॥ २७ ॥

अबभिमानिवरुणपुत्रत्वाच्च वसिष्ठमापवमाहुः। तथाहि पौराणं वचनम्–'यं लेभे वरुणः पुत्रं पुरा भास्वन्तमुत्तमम्। वसिष्ठनामा स मुनिः ख्यात आपव इत्युत' इति। तस्य पौत्रे पराशरे सम्भूय तं मानयामास। आपववार्थं तत्कुले व्यासात्मना मानं स्वेच्छया निर्माणमवतरणं यस्येति वा। आप इति देवाः। अपां वृन्दमापम्। देवादिसज्जनसमुदायः। तस्य वं ज्ञानं निर्मिमाणः। सतां ज्ञानाय कृतावतारः। अथ सदापवमान इत्येकं वा पदम्। सन् विद्वानापवो वसिष्ठः। सद् वाऽऽपं देववृन्दम्। ज्ञानस्य निर्माणं नाम विद्यमानस्य स्थिरीकरणम्; नाविद्यमानस्योत्पादनमित्येतत् ॥

अत्र प्रथमपादे करालोळमिति पदम्। द्वितीये च कराळोऽलमिति। रषयोः परो हि लकारः प्रायो ळकारतामापद्यते समाने पदे, अज्मध्यस्थश्च डकारः। यमके लळयोरभेदादक्षरसाम्यायोभयत्रापि ळकारपाठः कराळोळमिति संहितायाम्। पदपाठे तु कर+आलोळम्,कराळः+अलमित्येव पठनीयम्। मूलकोशे 'चक्रं कालः' इत्यत्रापि 'चक्रं काळः' इत्येव पाठः। कालो दिष्टः काळः कृष्णः। 'काळाष्टमी भवेत्' इति ह्याचार्यवचनम्। कृष्णं तमः, तमोभिमानिनी च दुर्गा। प्रळयकालोऽपि काळः। 'तम आसीत् तमसा गूळ्ढमग्रे' इत्यादेः। एवमर्थविशेषं सूचयन् काल इति वक्तव्ये काळ इत्याह। अथच काडः

---

१. **'स्वातन्त्र्ये लुप्तयोऽपि च'**, **'–व्यत्ययोऽपि च'** पा.   २. **'हरिः प्रभुः'** पा.

स एव भारताग्र्यः[1] स्याद् वक्ताऽयं भारतस्य च ।
सर्वदा सन्नयं व्यासोऽवततार हि मानयन् ॥ २८ ॥

अब्विवेकादपवेति शक्रेणोक्तं वसिष्ठकम् ।
तदन्वये स वै ज्ञानदाता देवादिसज्जने ॥ ✻ ॥ २९ ॥

काळो भवति । कड भेदने । काडयति नाशयति सर्वमिति काळः । ळळयोर्-भेदात् स एव कालश्च । यमकेषु पुनरेवमक्षराणां सङ्करो भवति– ळळयो-र्ळडयोर्लडयोर्यजयोर्वबयोः शसयोः षसयोर्नणयोश्चेति वदन्ति । न केवलं यमकेषु । शास्त्रेष्वप्यर्थविशेषलाभाय । यथा पुरिशयानं पुरुषमाहुः । उरुवानुलूलवानाहुः ॥

वस्तुतस्त्वश्रद्धेया धातुपाठा भवन्ति । तद्यथा षच सेचन इत्येके पठन्ति । सेवन इत्यन्ये । यु जुगुप्सायामित्येके पठन्ति । युजु कुत्सायामित्यपरे । युजु जुगुप्सायामित्यन्ये, यु जु जुगुप्सायामित्यप्येके । स्थाने क्षीरस्वमी च वैयाकरणाग्रणीरेवमेवोत्प्रेक्षते–'पाठेऽर्थे चाऽगमभ्रंशान्महतामपि मोहतः । न विद्मः किं नु जहिमः किं वाऽत्राऽदध्महे वयम्' इति । एवं ळकारस्य स्वतन्त्राक्षरत्वमाचार्यैरभ्युपगतम् । वैयाकरणैरधुनातनैस्तत्प्रहाणाळ्ळकारगर्भो धातुपाठ एव विलुप्तः । एवं सति कथङ्कारं निर्णीयेत ॥

अस्यां गीतिकायामित्थं मात्रागतिः-१०+२०+१२+२० । इयं १२+१८+१२+२० मात्राभिः स्वरसाऽपि गीतिका भवति । तद्यथा–

यस्य कराळोळं च-
क्रं कालः परः सहि कराळोळम् ।

अथापि यमकानुसृत्यै दशमात्रः प्रथमपादः । तेन प्रथमपादे द्विमात्रोनाऽपूर्वा विच्छित्तिः ॥ २ ॥

१. **'भारताद्यः'** पा.

यस्यरमानमनोगं
जगृहेविश्वम्भरापिनमनोगम् ।
यस्यपुमानानन्दम्-
भुङ्क्तेयद्धामकपतिमानानन्दम् ॥ ३ ॥

यस्य । रमा । न । मनोगम् । जगृहे । विश्वम्भरा । अपि । न । मनोगम् । [न । मनोऽगम् ।] [न । मनः । अगम् ।] [नमनः । अगम् ।] ॥ यस्य । पुमान् । आनन्दम् । भुङ्क्ते । यद्धाम । [यत् । धाम ।] कपतिमानानन्दम् । [कपतिमान् । आनन्दम् ।] [यद्धामकपतिम् । आ । न । अनन्दम् ।] [कपतिम् । आनानन्दम्] ॥ ३ ॥

रमाऽपि नैव जानाति साकल्याद् यन्मनोगतम् ।
न किञ्चिद् वास्तवं तस्य नाऽगम्यं कस्यचिन्मनः ॥ ३० ॥

सर्वं च मनसा देवी जानन्ती[1] स परः पुमान् ।
भुङ्क्ते स्वपरमानन्दं यतः स्वाप्ययधाम हि ॥ ३१ ॥

व्यासावतारस्य ज्ञानकार्यतां स्फुटयति– यस्य रमा न मनोगं जगृहे विश्वम्भराऽपि । विश्वं समग्रं जगत् मनसा भरमाणा सर्वज्ञाऽपि रमा यस्य मनोगतं न प्रभवति ग्रहीतुं स एष व्यास इति । जगाद हि भगवत्पादः–'यस्माद् ब्रह्मेन्द्ररुद्रादिदेवतानां श्रियोऽपि च । ज्ञानस्फूर्तिः सदा तस्मै हरये गुरवे नमः' इति । स एव हि गुणपूर्ण इत्याह– न मनोगं यस्य । यस्य व्यासस्य मनोगं हृदयङ्गमम्, गुणपूर्णमित्येतत् । तदेव मनो हरति यद् गुणपूर्णम् । तादृशं नास्त्येव । केचित् टिप्पण्याम्–'वा अस्तवम्' इति प्रतृण्णं पठित्वा अगं अगानरूपं अस्तुतिरूपं न किञ्चित् पदमिति व्याचक्षते । अस्वरसमनन्वितं चेदम् । अथ तस्यैव निरवधि सार्वज्ञ्यमित्याह– न मनः अगं यस्य । रमाब्रह्मादीनां सर्व-

१. **'जानती'** पा.

प्रजापशुपतिप्राणश्रियामानन्ददं हरिम्[१] ।
अथवा नमनो यस्याऽनन्तं नित्यसुखं लभेत् ॥ ३२ ॥

चेतनानां मनः यस्य अगं अगम्यं न स एष व्यास इति । आह हि –'कविर्मनीषी' इति । सर्वमनसामपीष्ट इति हि मनीषी । न तन्मनसः कोऽपि न रमाऽपीष्ट इति । यस्य मनोऽगं मनसोऽगम्यं न किञ्चिदस्तीति वा । स पुमान् पुरुष-सूक्तप्रतिपाद्यः परमपुरुषः पूर्णानन्दं भुङ्क्ते । यत् यतः आनन्दः तस्य धाम स्वरूपमेव । न कदाऽपि बाह्यम् । स्वानन्दभोजिनां मुक्तानां धाम शरणमिति वा । कीदृशं धाम? कपतिमानानन्दम् । क इति ब्रह्मा । पतिरिति पशुपतिः । नामैकदेशग्रहणम् । 'पत्युरसामञ्जस्यात्' इति हि भगवानेवाऽह । मा रमा । अन इति प्राणः । तानतिशयज्ञानदानेनाऽनन्दयतीति तादृशम् । य एतान-प्यानन्दयति तस्य कथं परत आनन्द इति ॥

सृष्टिसंहारयोः परमस्य साक्षादुपकरणभूतौ कपती । स्रष्ट्री मा । सृष्टस्य चेष्टाप्रदः प्राण इति निर्देशक्रमः ॥

अथ चार्थान्तरम् । नमनोऽगं यस्य पुमानानन्दं भुङ्क्ते । यस्य नमनः नन्ता प्रह्वीभवन् स्तोता पुमान् भक्तः, न गच्छतीत्यगमनश्वरम्, तन्नन्त्रा विनाऽ-न्यैरगम्यम्, तन्नमनेन विनाऽन्यैरुपायैरगम्यं च, मौक्तमानन्दं भुङ्क्ते । कीदृशस्य तस्य ? यद्धाम कपतिमानानन्दम् । यस्य धाम स्वरूपम्, कपतिमानानां प्रजा-पतिपशुपतिश्रीप्राणानाम्, अनं चेष्टां ज्ञानं च ददातीति तादृशम् । किमुतान्येषां नन्तॄणाम्? यस्य धाम तेजः सामर्थ्यमिति वा । यस्य धाम चिदात्मकं वैकुण्ठमन्दिरमिति वा ॥

यद्वा कौ ब्रह्मवायू । अहिपति-विपति-पशुपति-सुरपति-रतिपतयः पतयः । ब्रह्मा वैशम्पायनाविष्टः । वायुः शुके । शेषः पैले । वीशः सुमन्तौ । पशुपतिः स्वयं शुकः । सुरपतिर्जैमिनिगतः । कामो रोमहर्षणगतः । सर्ववेदमुख्यमानिनी च रमा

---

१. **'–नन्ददं परम्'** पा.

अगम्यं हेतुभिर्वाऽन्यैर्यस्य धाम चिदात्मकम् ।
प्रजापशुपतिप्राणश्रियां गतिमतिप्रदम् ॥ ॐ ॥ ३३ ॥

परमेषुयदातेजः
परमेषुचकारवासुदेवोजः ।
मानधिबिभ्रत्सुमनो
मानधिमासीन्नवासुदेवोजः ॥ ४ ॥

परमेषु । यदा । तेजः । परम् । एषु । चकार । वासुदेवः । अजः ॥[अयः ॥] मानधि । बिभ्रत्सु । मनः । मा । अनधिमा । आसीत् । नवासुदेवः । अजः । [जः] । [यः]॥ ४ ॥

वेदानां विभक्तारं स्वभर्तारं साक्षात् सिषेवे । कपतिमानामनश्रेष्टा ज्ञानमयी प्रवृत्तिः, ज्ञानमेव वा, आनन्दश्च यस्मात् । कपतीनां मानानन्दौ ज्ञानानन्दौ यस्मादिति वा । एवं व्यासदेवसपर्यालौल्यादागताः सर्वेऽपि देवाः सङ्गृहीताः । एवमर्थविशेषलाभायैव पतिरिति नामैकदेशग्रहणम् ॥

यस्य भक्तः पुमान् आनन्दरूपं यद्धाम वैकुण्ठं भुङ्क्ते । कीदृशः पुमान्? कपतिमान् मोक्षेऽपि केन ब्रह्मणा पत्या पतिमानेव । कीदृशं धाम? आनन्दम् । अकारवाच्यब्रह्मविषया चेष्टा आनः । तमेव सर्वदा ददाति । अथच पुमानानन्दं भुङ्क्ते । यत् यस्मात् स भगवतो धाम । भगवन्तं सदा हृदये दधत् । अथच यस्य हरेर्वैकुण्ठाख्यं धामैव धाम येषां ते यद्धामकाः मुक्ताः । तेषां सर्वेषां पतिं नारायणं आ अनन्तकालं भुङ्क्ते उपजीवति । न कदाऽप्यनन्दं दुःखं भुङ्क्ते । अथवा स पुमानानन्दं भुङ्क्ते । यत् यस्मात् धाम सर्वाधारं कपतिं ब्रह्मणोऽपि पितरम्, अनस्य प्राणस्य भक्ता आनाः । तानानन्दयतीत्यानानन्दस्तं भगवन्तं भुङ्क्ते उप-जीवतीत्यादि ॥

अत्रैवं मात्राक्रमः–१२+१८+१२+२० इति क्रमेण चतुर्षु पादेषु ॥ ३ ॥

परमेष्ठ्वेषु रुद्रेप्रजापश्रीषु[१] देवराट्।
ज्ञानरूपं परं तेजश्चकार ज्ञानदेवनः ॥ ३४ ॥

शुभावहः स देवानां तेन ज्ञानार्णवं मनः।
बिभ्रत्स्वत्युत्तमज्ञाना बभूवैका रमा सदा ॥ ३५ ॥

व्यासावतारं संस्तुवन्नेव कृष्णावतारं प्रस्तौति । वा ज्ञानम् । तद् देवानां सुदेवयति सम्यग् गमयतीति वासुदेवः कृष्णद्वैपायनः । अत एवायन्ते शुभं मोक्षाख्यमनेन देवा इत्ययः देवानां शुभावहः । यजयोरभेदादज इत्यय उच्यते। 'अयः शुभावहो विधिः' इति पठन्ति। विधिरिति न राज्ञामाज्ञा। शुभावह इति पर्याप्तम्। स यदा यस्मात् एषु पूर्वप्रस्तुतेषु परमेषु श्रीब्रह्मवायुरुद्रादिषु देवोत्तमेषु परं तेजो ज्ञानरूपमाविश्चकार तस्मादाविष्करणात् मानधि ज्ञानार्णवं मनो बिभ्रत्सु तेषु मा रमा अनधिमा। न विद्यन्ते अधिमाः अधिकज्ञाना यस्याः। ब्रह्मादिभ्योऽप्यत्युत्तमप्रमा रमाऽसीत् ॥

अथचाजोऽजनिर्व्यासदेवो योगिनामुत्तमज्ञानसिद्ध्यर्थं वासुदेवोऽपि नवासुदेव आसीत्। चक्षुरादीनि पञ्च वागादीनि पायुवर्जं चत्वारीति नवानामसूनां देवो देवनं विजयः यस्मात् यस्य प्रसादात् स नवासुदेवः। नहि पायुजयो नाम विशिष्य साधनम्। विसर्गविषयत्वेन पायूपस्थयोरेकत्वविवक्षया नावसव इत्यपि वदन्ति । अनेन कपिलवासुदेवोऽपि स्तुतः । दत्तादयश्च ज्ञानकार्यावताराः ॥

चक्षुरादीनि पञ्च मनोबुद्धिरहङ्कारश्चित्तमिति चत्वारीति वा नवासवः। अथ च नवासवो मुख्यप्राणरूपाणि नव । प्राणापानव्यानोदानसमाना नागकूर्मकृकल-देवदत्ताश्च । तथाह्युक्तम्– 'धनञ्जयमृते चैव वायोस्तु नव मूर्तयः' इति । तत्प्रीणनमेव तद्विजयः। तदापि यस्मात् यस्य प्रसादात् ॥

---

१. **'–प्रजापादिषु'** पा.

इत्थमत्युत्तमज्ञानसिद्ध्यर्थं योगिनां सदा।
नवासुविजयो यस्य प्रसादात् स तथोच्यते ॥ ३६ ॥

परमेषु सुरेष्वेषु स्तोतुं क्षीराब्धिशायिनम्।
भूभारहरणायातिशुद्धं ज्ञानार्णवं मनः ॥ ३७ ॥

अथानेनैव कृष्णावतारमुपक्षिपति। अजति क्षिपत्यसुरांस्तमसीत्यजोऽसुराप्रियो भगवान् एषु परमेषु ब्रह्मादिषु भूमाववताराय भगवन्तं नारायणं प्रार्थयितुं ज्ञानार्णवं मनो बिभ्रत्सु यदा परं तेजस्तेजोमयं स्वरूपमाविश्चकार तदा मा रमैव अधिकमाविष्कृतभगवत्स्वरूपाऽऽसीत्। अनधिका अत्यधिका मा प्रमा साक्षात्काररूपा यस्या इति। न विद्यतेऽधिकतमो यस्याः परदर्शिषु साऽनधिकतमा वा । अत्युत्तमा । अनधिकतमामेवानधिमामाहुः । यथा महिळामदासं महिदासम् । अत एव अजः वसुदेवादजातोऽपि वासुदेवो बभूव । शुद्धसत्त्वमयदेवमनस्सु भात इति वासुदेवः। न वसुदेवजात इति। तथाहि भागवते– 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इति चतुर्थस्कन्धे शम्भुवचनम् । विशुद्धं सत्त्वमन्तःकरणम् । भगवानत्र वसति द्योतते चेति । वसुदेवे प्रतीयत इति वसुदेवस्यायं वासुदेव इत्यर्थः ॥

अथ च वः ज्ञानरूपः असूनामिन्द्रियाणामसोः प्राणस्य चायं देव इति प्राणेश्वरो वासुदेवः । ज्ञानरूपोऽसुः प्राणावतार इति वासुर्भीमः । तेन सह दीव्यति क्रीडतीति वासुदेवः। लीलामात्रमवतारो नाम भगवतः। तस्य च प्रधानाङ्गं मारुतिरित्येतत्। वासुना भीमेन दीव्यत्यसुरान् विजिगीषतीति च वासुदेवः। तेन व्यवहरति लोकरीतिमनुसरन्निति च वासुदेवः। 'अस्मिन् युद्धे महावीर त्वयि भारः समाहितः' इत्यादि। तेन दीव्यते द्योत्यते प्रकटीक्रियते लोकेष्विति च वासुदेवः। श्रूयते हि–'गुहा सन्तं मातरिश्वा मथायति' इति। वासुना दीव्यते सदा स्तूयत इति च वासुदेवः । वासोरप्यधिकं देवः कान्त इति वासुदेवः । वासुना सह दीव्यति गच्छतीति च वासुदेवः । नित्यसाहचर्यात्। 'यस्मिन्नुत्क्रान्त

बिभ्रत्सु परमं तेजश्चकारात्मप्रकाशनम्[१] ।
यदा तदाऽधिका तेषां श्रीरासीदसुराप्रियः[२] ॥ ३८ ॥

अजातोऽपि हरिः सोऽयं वासुदेवोऽभिधीयते ।
वसुदेवाख्यसंशुद्धमनसो विषयत्वतः ॥ ३९ ॥

ज्ञानरूपोऽसुदेवोऽयमथवा ज्ञानरूपिणा ।
असुरानसुमुख्येन भीमेनैव जिगीषति ॥ ४० ॥

सहितः क्रीडते तेन तेन व्यवहरत्यपि ।
तेन द्योतोऽस्य लोकेषु स्तूयते तेन सर्वदा ॥ ४१ ॥

उत्क्रमिष्यामि' इत्यादेः । जरासन्धं निग्रहीतुं भीमेन सह गच्छति । अर्जुनरथे प्रकटोऽपि परेषामप्रकटो भीमेन सह गच्छति युद्धरङ्गे । 'एहि मन्यो दक्षिणतो भवा मे' इति श्रवणात् । अन्यैरपि भीमेन वायुना तत्प्रसादेनैव दीव्यते गम्यतेऽवगम्यते प्राप्यते चेति वासुदेवः । 'स एनान् ब्रह्म गमयति' इति श्रवणात् । अर्जुनोऽपि भीमसोदरतयैव भगवन्तं प्राप । न तथा वाली । सर्वेऽप्येतेऽर्था धातुपाठात् स्फुटमवगम्यन्ते–'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु' इति प्राचीनो धातुपाठः । अर्वाञ्चस्तु स्वप्नमोदमदानधिकं पठन्ति ॥

एवं बहुधा स वासुदेवो गीयते । अथापि नवासुदेवः । वसुदेवस्यापत्यमिति वासुदेवो न भवतीति । यतोऽजः । वसुदेवाज्जातोऽभिव्यक्तोऽपि न शुक्लशोणितसंयोगेन जात इति ॥

नवासुदेवः जः इति च च्छेदः । ज इति जनार्दनः । योऽन्येषां जननमर्दयति तं कथं वसुदेवो जनयति । ज इति जगज्जनकः । यो ब्रह्मादीनामपि पिता तस्य कथं वसुदेवः पिता?

---

१. **'–प्रदर्शनम्'** पा.

२. **'–सीदसुरप्रियः'** इति केचित् । असुभिरिन्द्रियैः रमन्त इति, असुना प्राणेन तत्प्रसादेन रमन्त इति वा असुरा देवाः । तेषां प्रिय इति च व्याचक्षते ।

तस्माच्च कमनीयोऽयं तेनैव सह गच्छति ।
अन्यैरपि स वै गम्यस्तत्प्रसादेन नान्यथा ॥ ४२ ॥

एवं स वासुदेवः स्यान्नान्यापत्यत्वतः क्वचित् ।
नवासुदेव एवायं हृषीकाणामधीश्वरः ॥ ४३ ॥

नवासवोऽपि मुक्ता वा जरानुपहतेन्द्रियाः ।
तैरयं क्रीडते देवः स्वीयैर्वा नूतनेन्द्रियैः ॥ * ॥ ४४ ॥

सोजनिदेवक्यन्ते
यस्मादनुकम्पनावदेवक्यन्ते ।
अवदन्देवक्यन्ते
भुवनंहिसुरास्सदैवदेवक्यन्ते ॥ ५ ॥

सः । अजनि । देवक्यन्ते । यस्मात् । अनुकम्पनावत् । [अनु । कम्पनावत् ।] एव । क्यन्ते ॥ अवदन् । देव । क्यम् । ते । भुवनम् । हि । सुराः । सदैवदे । अव । कि । अन्ते ॥ ५ ॥

नवासुदेव एवं यः स एवाऽविर्बभूव ह ।
समीप एव देवक्याः न मलोत्थः कथञ्चन ॥ ४५ ॥

अथापि पूर्वमुक्तदिशा नवसङ्ख्यानामसूनामयं देव इति नवासुदेवो हृषीकेशः । नवाः नित्यनूतनाः जरानुपहता असव इन्द्रियाणि येषां ते मुक्ता नवासवः । तेषामप्ययं देवः । मुक्तानां परमा गतिः । तैः सह दीव्यति क्रीडतीति वा । नित्यनूतनैः स्वरूपेन्द्रियैः दीव्यति क्रीडतीति च ॥

अथ च ज इति यः । वबयोरिव यजयोप्यैक्यात् । वङ्गा हि यदिति वक्तव्ये जदिति वदन्ति । पर्यन्तमिति वक्तव्ये पर्जन्तमिति । ततश्च यः वासुदेवोऽपि नवासुदेवः सोऽजनि देवक्यन्त इत्युत्तरेणैकान्वयः ॥

१२+१८+१२+१८ इति पादेषु मात्राक्रमः ॥ ४ ॥

अथवा देवकात्काराद् दैत्या देवकिनो मताः ।
तेषामन्ताय भगवान् बभूव मधुसूदनः ॥ ४६॥

यस्मात् क्यन्तेऽवदन् देवाः कं सुखं तद्वतां हि यः[1] ।
अन्तोऽपरिमितानन्दो यतो वाच इति श्रुतेः[2] ॥ ४७ ॥

तत्रावोचन् कृपा तस्य यथाऽऽत्मसु[3] भवेत् तथा ।
कम्पनावच्च वचनं यथा स्यादिति वा भवेत् ॥ ४८॥

कम्पमाना अवोचंस्त इत्येतदुदितं भवेत् ।
अथवा कम्पमानाः स्युरसुरा अवदंस्तथा ॥ ४९॥

नवासुदेवो यः सोऽजनि देवक्यन्ते । देवक्याः समीपे केवलम् । न गर्भमलसम्पृक्त इत्येतत् । किमर्थम्? देवकिनां दैत्यानामन्ते नाशनिमित्तम् । देवान् कात्कुर्वन्ति तिरस्कुर्वन्ति ये ते देवकिनो दैत्याः । तद् यथा कलेः कात्करणात् कल्की । देवानां प्रार्थनफलमस्यावतरणमित्याह– यस्मात् क्यन्ते सदैवदे सुराः अवदन् । कं सुखम् । किनः सुखिनः । तेषामन्तः परा काष्ठा । तस्मिन् पूर्णानन्दे । देवानामीप्सितं सदैव ददातीति सदैवदः । दैवेन हरिणा सहिताः सदैवाः तद्भक्ता ज्ञानिनः । तेषामीप्सितदो वा सदैवदः । तस्मिन् हरौ तत्समीपे अवदन् प्रार्थयामासुः । कथमवदन्? अनुकम्पनावत् । यथा प्रयोजकत्वेन भगवदनुकम्पासम्पृक्तं स्वप्रार्थनं स्यात् तथा । यथा भगवाननुकम्पेत सत्सु तथाऽवदन्निति । सत्सु स्वयमनुकम्पायुक्ता अवदन्निति वा । कम्पना कम्पः । तद्वत् यथा स्यात् तथाऽनुगुणं वचनमवदन्निति वा । अप्राकृततेजोदर्शनेन गौरवातिशयेन च कम्पमाना अवदन्नित्येतत् । अनु प्रार्थनानन्तरमेवासुराणां हृदयं भयेन कम्पनावद् यथा स्यात् तथेति वा । यस्मादवदन् तस्मादेव हि सोऽजनि देवक्यन्ते । किमवदन्? देव स्वामिन्, भुवनं ते क्यं हि । कमिति खमिति च सामान्यत इन्द्रियमुच्यते । विशिष्य मनः । तव मनसा यम्यते

---

१. **'तद्वतां हरिः । अन्तेऽपरि–'** पा. २. **'इति श्रुतिः'** पा.
३. **'यथा सत्सु'** पा.

कमिन्द्रियं मनो यत् ते तन्नियम्यं जगत्त्विदम् ।
को विरिञ्चोऽथवा तेन नियम्यं क्यमुदीर्यते ॥ ५० ॥

सदैव यः स देवेभ्यो ददाति प्रार्थितं महत् ।
तस्मिन् सदैवदे विष्णाववदन् विबुधा इदम् ॥ ५१ ॥

अव देव जगन्नाथ भुवनं किं यथा भवेत् ।
नृजन्मभिः सुखस्यान्ते दैत्यैः प्राप्तेऽरिहन्निति ॥ * ॥ ५२ ॥

नीतोवसुदेवेन
स्वततेनसगोकुळंसुवसुदेवेन ।
तत्रयशोदातनयम्-
मेनेकृष्णंस्वकीयमवदातनयम् ॥ ६ ॥

नीतः । वसुदेवेन । [अवसुदेवेन ।] स्वततेन । सः । गोकुळम् । सुवसुदे । अवे । न । [सुवसु । देवेन ।] [सुवसुदेवेन] ॥ तत्र । यशोदा । तनयम् । मेने । कृष्णम् । स्वकीयम् । अवदातनयम् ॥ ६ ॥

नीतोऽसौ वसुदेवेन स्वतातेनाथ गोकुलम् ।
कंसस्य सुकरं दातुमागते ह्यवमेऽनुजे ॥५३ ॥

नियम्यते इति क्यम् । त्वदिच्छानियतं हि । को ब्रह्मा तेन नियम्यत इति वा क्यं हि तवेदं भुवनं अव रक्ष । अरक्षितं रक्ष्यते । नन्विदं सुरक्षितम्? नेत्याहुः– क्यन्ते । कि अन्ते इति च्छेदः । अन्तिरन्तकः । अन्ते दुष्टकुलान्तक, अन्ते जगतः सुखस्यान्ते विनाशे वा दैत्यैः प्राप्ते सतीदानीं प्रार्थ्यसे, पुनः किं सुखि ते भुवनं यथा स्यात् तथाऽवेति ॥

१२+२०+१२+२० इति मात्राक्रमः । उत्तरयोश्च गीत्योः ॥ ५ ॥

वसुदेवेन गोकुलं नीत इति जनश्रुतिमात्रम् । स्वयमेव स्वात्मना नीत इति तु परमार्थ इत्याह– नीतो वसुदेवेन । अव इत्यवमो नन्दः । नन्दस्य

बद्धेनाऽपि हरिर्नीतो गोकुलं सधनं प्रति।
स्वयं ततेन देवेनानुगृहीतेन न स्वतः ॥ ५४ ॥

आख्यं वा वसु यत् तेन यस्य क्रीडादिसप्तकम्।
स ब्रह्माऽवसुदेवः स्यात् स्वतातोऽपि स उच्यते ॥ ५५ ॥

स्वः स्वतन्त्रो हरिस्तातो यस्य तेन विरिञ्चिना।
देवेन गोकुलं नीतो यत्र नन्दो वसूत्तमः ॥ ५६ ॥

एवं सर्वेश्वरं विष्णुं यशोदा पितरं विधेः।
भर्त्रा [१]सुवसुदेवेन सह मेने स्वकं सुतम् ॥ ५७ ॥

अवदाता विमुक्ताः स्युस्तेषामपि च नायकम्। ॥ * ॥

वैश्याप्रभवत्वात्, अनुजत्वाच्चावमः। आह हि भगवत्पादः–'शूरतातसुतस्य वैश्याप्रभवो हि गोपः' इति। शूरतातस्यैकस्यां जायायां शूरः। अपरस्यां नन्दपिता। शूरभ्रातुस्तस्मान्नन्दगोपः। शूराद् वसुदेव इति तौ भ्रातरौ भवतः। अथवा शूर एव तातसुतः। कृष्णतातः वसुदेवः सुतोऽस्य। तेन शूरस्य क्षत्रि-यायां जायायां जातो वसुदेवः। वैश्यायां नन्दगोपः। एवमवेऽवमे नन्दे सुव-सुदे सति। सुवसु न्याय्यं करं कंसस्य दातुं गते सति। तत इति तातः। 'तत कस्मै मां दास्यसि' इति श्रवणात्। 'अहं भवस्ते तत एष महर्षिः–' [भाग.५.१.११] इति स्मरणाच्च। स्वतातेन वसुदेवेन स कृष्णः गोकुळम्, गावः कुडन्ति, 'कुड बाल्ये', क्रीडन्त्यत्रेति गवां विहारस्थानं गोकुलं प्रति नीत इति न। स्वतः कारायां बद्धः कथं सुतं नीयात्? तथाचायं परमार्थः– स्वयं स्वतन्त्रेण सर्वत्र विततेन च देवेन तदनुग्रहेणैव वसुदेवेन सुवसु शोभनं धनं समृद्धसम्पत् गोकुलं स नीत इति। कृष्णोऽपि चतुर्मुखप्रार्थनां मानयन् गोकुलं जगामेत्याह– नीतः अवसुदेवेन। आख्यं धनमवसु। 'अः इति ब्रह्म' इत्यैत-रेयी श्रुतिः। तेन दीव्यति क्रीडति, तेन जगद् विजयते, तेन विश्वव्यवहारं

१. '**सवसु–**' पा.

ववृधेगोकुलमध्याद्-
योदेवोविश्वमद्भुताकुलमध्यात्।
तत्रचपूतनिकाया
वधमकरोद्यन्निजास्सुपूतनिकायाः ॥ ७ ॥

ववृधे। गोकुलमध्यात्। [गोकुलम्। अधि। आत्।] यः। देवः। विश्वम्। अद्भुताकुलम्। अध्यात् ॥ तत्र। च। पूतनिकायाः। वधम्। अकरोत्। यन्निजाः। सुपूतनिकायाः ॥ ७ ॥

अङ्गदृष्ट्यैव भगवान् ववृधे सोऽपि गोकुले ॥ ५८ ॥

[१]विष्णुर्देवोऽन्यथा विश्वमध्यादत् कथमद्भुतम्।
आकुलं चाथवा तस्माद् गोकुलं ववृधेऽधिकम् ॥ ५९ ॥

निर्वर्तयति, तेन द्योतते, तद् द्योतयति प्रकटयति देवेषु, तदेव स्तौति, तदनुग्रहेणैव चान्यैः सर्वजीवैः स्तूयते, तदेव कामयति, तेनैव गच्छत्यवगच्छति च सर्वमित्यवसुदेवश्चतुर्मुखः। स्वः स्वतन्त्रो विष्णुस्ततस्तातोऽस्येति स्वततेन तेन देवेन, 'ततो व्रजं व्रज' इति तत्प्रार्थनयेति यावत्, स कृष्णः स्वयमेव स्वात्मानं सुवसु गोकुलं नीतः। सु शोभनः, उत्तमः इत्येतत्, वसुर्द्रोणनामा यत्र नन्दो बभूव तत् सुवसु नन्दपालितम्। तत्र गोकुले ब्रह्मणः पितरं, अवदात-नयम्, अवदाताः परिशुद्धा मुक्ताः तान् नयतीति मुक्तानामपि नायकम्, अथ चावदातनयं परिशुद्धनीतिम्, परिशुद्धां लोकनीतिं दर्शयितुमेव कृतावतार-मित्यर्थः। कृष्णं यशोदा स्वभर्त्रा सुवसुदेवेन वसूत्तमेन नन्देन सह स्वकीयं तनयं मेने। अहो दुरत्यया भगवतो माया ॥ ६ ॥

स ववृधे गोकुलमध्यं प्राप्य। ल्यब्लोपनिमित्ता पञ्चमी। सप्तम्यर्थे वा पञ्चमी। गोकुलमध्ये। ववृधे अङ्गदृष्ट्या। यो विष्णुर्देवः अद्भुतं बहुचित्रं

१. 'विष्णुर्देवो–' इति क्वचित्।

29-3-2006

अकारवाच्यश्च योऽसौ गोकुलप्रतिपक्षगम् ।
अद्भुतं चाऽकुलं चापि सर्वमध्याददञ्जसा ॥ ६० ॥
जघान पूतनां तत्र यस्य भक्ताः स्वभावतः ।
शापतो नीचकायाश्च पूतकाया भवन्ति हि ॥ ६१ ॥
पूर्वं पुंसां समूहो वा यद्भक्तानां विशुद्ध्यति । ॥ * ॥

सम्भ्रमाकुलं च जगदध्यात् सञ्जहार । यः सर्वमन्ते विश्वं संहरति स कथं विश्वमध्ये स्वयमेकः सन् वर्धेत । अतोऽभिवृद्धमिवात्मानं दर्शयामास केवलम् । य इति यच्छब्दो वा यशब्दो वा । य इति विष्णुः । 'अकयप्रविसम्भूम-सखहा विष्णुवाचकाः' इति ह्यभिदधति । अध्याददिति वक्तव्ये अध्यादित्याह । तेन सकलस्य विश्वस्यादनं तस्य कियदित्याह । वस्तुतस्तु आत् अकारवाच्यात् तस्मादेव गोकुलमधिकं ववृधे । योऽसौ कंसप्रहितं गोकुल-प्रतिकूलं मायाबलेनाद्भुतं स्वयं भयाकुलं च विश्वमखिलं रक्षोजातमध्यादत् । तेन गोकुलमधि ववृधे । अत्रापि दकारलोपेन दानवसूदनं तस्य लीलामात्रमित्याह । अधि आ अत्तीति अध्यादिति वा । 'गोकुलमल् अधि आद्यो देवः' इति च प्रतृण्णं पठन्ति । अधिगोकुलं गोकुले आद्यो देवो ववृध इति व्याचक्षते । 'गोकुलम् अधि आ द्योदेवः' इत्यन्ये । स्वःपतिः आ गोकुलमधि आ गवा ईषद्दर्शितानामज्ञानां कुलमधिकृत्य, अज्ञदृष्ट्यनुसारेण ववृध इति चार्थं वर्णयन्ति । नातिस्वरसमेतत् । तदालं सिकतानिष्पीडनेन । वयं तु प्राचीनटीकानुसारेण काव्यास्वादनलोलाः । तत्र तावत् प्रथमं वलीलानाटक-नान्दीत्वेन पूतनिकाया वधमकरोत् । चकारादनुत्थानं तमश्च गमयामास । अत एव कुत्सयामास कुत्सिता पूतना पूतनिकेति । पूनान् विनष्टान् तनोतीति पूतना । 'पूञो विनाश इति वक्तव्यम्' [वा.८.२.४४] इति निष्ठानत्वम् । पूतानपनयतीति वा ॥

ननूर्वशी चाऽसीत् पूतनिकायाम् । किं साऽपि तमः प्राप? नेत्याह– यन्निजाः सुपूतनिकायाः । यस्य निजा भक्ता निकायाः शापवशात् निकृष्टकाया आसुरं

अधुनोच्छकटंळोळी
पादाङ्गुष्ठेनवातपेशशकटंळोळी ।
अतनोद्रक्षामस्य
स्वाज्ञानाद्गोपिकासदेरक्षामस्य ॥ ८ ॥

अधुनोत् । शकटम् । ळः । [लः ।] ली । [ळी ।][अली ।] पादाङ्गुष्ठेन । वातपेशशकटम् । [वा । आतपेशशकटम् ।] लोळी ॥ अतनोत् । रक्षाम् । अस्य । स्वाज्ञानात् । गोपिका । सदा । ईरक्षामस्य ॥ ८ ॥

शकटं पातयामास तद्गं रक्षो बभञ्ज ह ॥ ६२ ॥

नैतच्चित्रं यतो विष्णुर्विनाश्य सकलं जगत् ।
शेतेऽनन्तं समादाय तद्भोगे लीन एव हि ॥ ६३ ॥

कायमाविष्टा अपि स्वभावतः सुपूता एव हि पूर्वम् । सुपूताश्च ते निकायाश्चेति । अत एव सुपूतो निकायो वैकुण्ठाख्यो निलयो येषां तादृशा एव । सर्वत्राप्येतदतिदिशति– सुपूतनिकायाः । सुपूतो निकायः समूहो येषां तादृशा बहवो निजाः । ये शापग्रस्ता अपि मुक्तशापाः सुपूता बभूवुः ॥ ७ ॥

शकटं पादाङ्गुष्ठेनाधुनोत् पातयामास । तद्गं च तन्नामानमसुरं अधुनोत् । निधनं प्रापयामास । कः ? ळः ळकारवाच्यः ळाळुकः । डवत इति डो ळः । सर्वगतः । डुङ् गतौ । वायुश्च ळः । नियम्यतया तद्वान् ळी । अथच लापयति विनाशयति सर्वं प्रळय इति लः । विलाप्य च लीलाशयनाय शेषं लात्यादत्त इति च लः । आदाय तद्भोगेऽलीनोऽपि लीन इव लीलया शयान इति ली । शेषशयनः । यः सर्वमन्ते संहरति तस्य शकटसंहारः कियान्? वातं पिबन्ति वातपा नागाः । तेषामीशः शेषः । स एव शकटः शंरूपः कटः, सुखमयं शय्यास्तरणम्, तं स्वाधिष्ठानेन लोळयति रमयतीति लोळी । लोडृ उन्मादे । उन्माद उद्धर्षः । अथच वा आतपेशशकटमिति च्छेदः । वेत्यस्य पादाङ्गुष्ठेन

वातं पिबन्ति ये तेषामीशः शेषः शमात्मकः ।
कटो ह्यास्तरणायासौ रमयत्येव तं हरिः ॥ ६४ ॥

आतपेशोऽथवा सूर्यस्तद्रथं लोळयत्यसौ ।
अकाराख्यस्य वै विष्णो रक्षां सा गोपिकाऽकरोत् ॥ ६५ ॥

अज्ञानाद्धि स्वसम्बद्धादीरक्षामस्य सर्वदा ।
ईरः क्षामः कृशो यस्मादीरक्षामस्ततो हरिः ॥ ६६ ॥

स्वः स्वतन्त्रस्तदज्ञानाद् गोपी तं रक्षतीति वा ।
ईरक्षो ह्ययमीं लक्ष्मीं सर्वदा रक्षति प्रभुः ॥ ६७ ॥

अमो ह्यमितसामर्थ्यात् तस्य रक्षाऽन्यतः कुतः । ॥ ✻ ॥

वा पादाङ्गुष्ठेनैवाधुनोदिति पूर्वान्वयः । आतपेशः सूर्यः । तस्य शकटं रथं लोडयति भ्रामयतीति लोळी । तस्य शकटासुरधूननं कियत्? स्ववेगेन वातस्य पेशको गरुडः । तं स्वशकटं लोळयतीति वा । शकटभङ्गेन भीता गोपिका स्वगतादज्ञानात्, स्वस्य स्वतन्त्रस्य भगवतोऽज्ञानाद् वा, अस्य अकारवाच्यस्य, अस्य बालकृष्णस्य रक्षामकरोद् विप्रैः स्वस्त्ययनं वाचयित्वा । कीदृशस्य? सदा ईरक्षामस्य ईरः समीरः क्षामः कृशो यस्मात् । न केवलं वायोरप्युत्तमः । किन्तु ईरक्षः अमश्च । ईकारः लक्ष्मीवचनः । 'तां पद्मिनीमीम्' इति हि श्रुतिः । तां रक्षतीतीरक्षः । स्वयं चामः अमितः कालतो देशतो गुणतः शक्तितश्च । तस्य रक्षाऽन्यतः कुतः? ईरमपि क्षपयन्नमितशक्तिरिति वा । मूलकोशेष्वत्र लकारस्थाने सर्वत्र ळकारः पठ्यते । ळो ळीति । लोळीति तु डस्थाने ळः । प्रथमस्य ळत्वे कारणं मृग्यम् । ळकारवाच्यस्य ळाळुकस्य स्मरणमिति सुन्दरम् । पूर्वार्धे ळकाराभ्यां ळाळुकः, उत्तरार्धे क्षकाराभ्यां नृसिंहश्च स्मृतौ भवत इत्यतिसुन्दरम् ॥

अत्र १२+२३+१२+२२ इति मात्राक्रमः ॥ ८ ॥

मुखलाळनलोळातन्-
मुखगञ्जगदचष्टसाळनलोळातत् ।
नाध्यैन्मायामस्य
जगत्प्रभोस्स्वधिकततततमायामस्य ॥ ९ ॥

मुखलाळनलोळा । तन्मुखगम् । जगत् । अचष्ट । सारणलोलातत् [साडनलोळातत्] ॥ न । अध्यैत् । मायाम् । अस्य । जगत्प्रभोः । स्वधिकततततमायामस्य ॥ ९ ॥

मुखं लाळयती विष्णोर्मुखे जगदचष्ट सा ॥ ६८ ॥

साळनं सारणं तच्च लोलं चातच्च कथ्यते ।
सपालकं चलत् तस्माद् व्यतिरिक्तं च सर्वदा ॥ ६९ ॥

नाध्यगच्छद्धरेरस्य महिमानं जगत्प्रभोः ।
अत्युत्तमो ह्यतिव्याप्तो यस्याऽयामोऽर्भकस्य च ॥ ✻ ॥ ७० ॥

कृष्णमुखलाळनलोळा यशोदा सर्वं जगत् तन्मुखगतमपश्यत् । लाळनं लाडनम् । लड उपसेवायाम् । प्रीत्या रमणमुपसेवा । कीदृशं जगत्? साळनलोळातत् । अळनमरणं शरणम् । 'स्मृत्वा हरिस्तमरणार्थिनम्' इति हि भागवते । पालकमभिमानिदेवजातम् । तेन सहितं लोळं चरमतदचरं चेति चराचरात्मकं जगत् । अथ साळनं साडनम् । अज्मध्यस्थगस्य डकारस्य ळकारं हि बह्वृचा गदन्ति । अड उद्यमे । तेन साळनं साडनं स्वस्वव्यापारनिरतं चेतनजातम् । लोडतीति लोळं त्रिवृत्करणेन व्यालोळं भूतत्रयम् । लुड विलोडने । अततीत्यातत् सर्वसञ्चारि सर्वगतं चाऽकाशवाय्वात्मकं भूतद्वयम् । एवं चेतनाचेतनात्मकं जगदचष्ट । चक्षिङ् व्यक्तायां वाचि । अयं दर्शनकर्मा च इति वैयाकरणाः । तथाहि श्रुतिः– 'विश्वा रूपाऽभि चष्टे शचीभिः' (ऋ.१०.१३९.३) इति । यत्र व्यक्तवचनमर्थस्तत्रायं प्रायेणाऽङ्पूर्वः । अथापि साऽस्य

तस्यसुशर्म्माण्यकरो
दरिणोगर्ग्गस्सदुक्तिकर्म्माण्यकरोत्।
अवदन्नामानमयं
जगदादिंवासुदेवनामानमयम्॥ १० ॥

तस्य । सुशर्माण्यकरः । [सुशर्माणि । अकरः ।] दरिणः । गर्गः । सदुक्तिकर्माणि । अकरोत् ॥ अवदत् । नाम । अनमयम् । जगदादिम् । वासुदेवनामानम् । अयम् । [अजम् ।] ॥ १० ॥

सुसुखिप्राप्यविष्णुर्यत्करेऽसौ गर्ग ईशुतुः ।
शङ्खपाणेः सदुक्तीश्च जातकर्मादि चाकरोत् ॥ ७१ ॥

सुशर्मा विष्णुरण्यो यत्करेणेत्यपि योजना ।
सुशर्माणि च कर्माणि ह्यः[१] करे यस्य सोऽथवा ॥ ७२ ॥

जगत्प्रभोः,स्वधिकः तततमः व्याप्ततमः आयामो देहविस्तारः यस्य तादृशस्य मायां महिमानं नाध्यगच्छत् । विसस्मारेत्येत् । 'परो मात्रया तन्वा वृधान' इत्याद्या श्रुतिः ॥

१२+२०+१२+२० इति मात्राक्रम आचतुर्दशं पद्यम् ॥ ९ ॥

शर्म सुखम् । अधिकानन्दा देवादयः सुशर्माणः । तैरण्यः प्राप्यो भगवान् सम्प्रति कृतबालरूपो यस्य करे स सुपर्वाण्यकरो गर्गः सात्त्वतां पुरोधाः । सुशर्माऽऽनन्दमयो विष्णुः । स प्राप्यः यस्य करेणेति वा । सुशर्मभिरेवाण्यः करो यस्येति वा । सुखशालिनां सतामेव हस्तप्राप्य इत्यर्थः । सुशर्माणि अकर इति भिन्ने वा पदे । अः परं ब्रह्म करे यस्य स गर्गः दरः करेऽस्येति दरिणः शङ्खपाणेः सुशर्माणि स्वस्य मोक्षान्तसुखावहानि सदुक्तिसहितानि कर्माण्यकरोत् । वेदमन्त्रसहितानि जातकर्मादीनि कर्माणि । सदुक्तयः कृष्णवासुदेवादि-

१. **'हि अः'** इति पदच्छेदः ।

सुशर्मभिः करो यस्य प्राप्योऽसौ गर्ग एव हि ।
सोऽवदद्ध्यनमं नित्यं यमयन्तं च कारणम् ॥ ७३ ॥

जगतो वासुदेवाख्यमजातमपि कुत्रचित् । ॥ * ॥

तस्य सखाबलनामा
ज्येष्ठो भ्राताथयन्निजाबलनामा ।
यस्यचपर्यङ्कोयं
पूर्वतनोविष्णुमजसपर्यङ्कोयम् ॥ ११ ॥

तस्य । सखा । बलनामा । ज्येष्ठः । भ्राता । अथ । यन्निजावरणा । [यन्निजा । वलना ।] मा । [अमा] ॥ यस्य । च । पर्यङ्कः । अयम् । पूर्व-तनः । विष्णुम् । अजसपर्यम् । कः । अयम् ॥ ११ ॥

यः सखा तस्य च ज्येष्ठो भ्राता स बल ईरितः[१] ॥ ७४ ॥

नामानि वा । तदा चायं गर्गः अवदन्नाम अवदत् किल । किम्? अनमयं जगदादिमवदत् । अयं अजं वासुदेवनामानमवदत् । कथमनमयः । कमपि न नमति यमयति च सर्वमिति । प्राणमुख्यो वा । 'स उ प्राणस्य प्राण 'इति हि श्रुतिः । चेष्टामयो वा । 'स्वाभाविकी ज्ञानबलक्रिया च' इति च । अनमान् अनन्तॄन् नियच्छतीति वा । तं जगदादिं जगतः कारणमवदत् । जगदादौ वासुदेवादिचतूरूपी हि बभूव । अत एव अयं शुभावहम्, अयत इत्ययं सर्वगतम्, अथच अयं अजं वसुदेवादजातमपि वासुदेवनामानमवदत् ॥ १० ॥

तस्य सखा ज्येष्ठश्च भ्राता बलनामा गर्गेणोक्तः । कस्मात् सखा? सह ख्यायत इति रामकृष्णाविति । प्रेमास्पदतया च । यदनुससार तं मधुरातः प्रयाय गोकुलम् । अथ तस्मादेव ज्येष्ठः । यदयं तमनु जायते स्म । यस्य हरेः निजावलना निजावरणा अन्तरङ्गपरिवारभूता मा रमा । वल संवरणे । आत्मीया वलना

१. **'भ्राता बल इतीरितः'** पा.

29-3-2006

गर्गेणैव सखित्वं तत्प्रियत्वान्नो समत्वतः ।
अवताराग्रजत्वात् तु ज्येष्ठत्वं नोत्तमत्वतः ॥ ७५ ॥

यदावरणरूपा मा जगन्माताऽप्यनन्तधा ।
स्वयं च यस्य पर्यङ्कः कोऽयं ब्रह्मार्चितं प्रति । ॥ ✻ ॥ ७६ ॥

तेनहतोवातरयस्-
तृणचक्रोनामदितिसुतोवातरयः ।
हरमाणोवालतमं
स्वात्मानङ्कण्ठरोधिनावालतमम् ॥ १२ ॥

तेन । हतः । वातरयः । तृणचक्रः । नाम । दितिसुतः । अवातरयः ॥ हरमाणः । बालतमम् । स्वात्मानम् । कण्ठरोधिना । अवाडतमम् ॥ १२ ॥

तेन कृष्णेन निहतो वायुवेगो दितेः सुतः ।
अवातरय एवासौ भूत्वा श्वासनिरोधतः ॥ ७७ ॥

हरमाणोऽणुदेहं च स्वतन्त्रात्मानमम्बरे ।
अवाट् च सोऽतमश्चेति ह्यवालतम ईरितः ॥ ७८ ॥

स्वतो न वाहको यस्य व्याप्तं मानं च यस्य तम् । ॥ ✻ ॥

स्वयम्बरणा भार्येति वा । साऽपि मा अमा अमिता देशकालाभ्यां समना । अनन्तरूपा च । किम्पुनरयम्? अथायमिदानीं ज्येष्ठोऽपि पूर्वतनः पर्यङ्को हि मूलरूपे । अजेनापि सपर्यते पूज्यत इत्यजसपर्यः । एवं रमाविरिञ्चाराध्यं नारायणं प्रति कोऽयं कियानिति ॥ ११ ॥

तेन कृष्णेन कण्ठं रुन्धानेन वातरयः वायुवेगस्तृणचक्रस्तृणावर्तो नाम दितिसुतः श्वासनिरोधेन अवातरयः सन् हतः । बालतमम् अतिबालम् अणुदेहं स्वात्मानं स्वतन्त्रं परमात्मानं हरमाणः अपहरन् । अबालतमम् । योऽवाट् अतमश्च तम् । अवाडतमम् । डस्य लः अवालतमम् । वाड् वाहकः । नास्ति

सोवनिमध्येरङ्गन्
अरिदरयुग्बालरूपमध्येरङ्गन् ।
अमुषन्नवनीतमदः
स्वगोकुलेगोपिकासुनवनीतमदः ॥ १३ ॥

सः । अवनिमध्ये । रङ्गन् । अरिदरयुक् । बालरूपम् । [वाडरूपम् ।] अधि । आ । ईरम् । गन् । [अधि । ईरम् । आगन् ॥] अमुषत् । नवनीतम् । अदः । स्वगोकुले । गोपिकासु । नवनी । [गोपिकासुनवनी ।] इतमदः । [नवनीतमदः]॥ १३ ॥

बालरूपं ततोऽधीति चाऽ ईरमिति च द्वयम् ॥ ७९ ॥

गन्नित्येव पदच्छेदस्तत्रेत्थं योजना मता ।
स चारिदरयुग् विष्णुर्बालरूपं समीरणम् ॥ ८० ॥

अधिरुह्य समन्ताद् गन् कौ रङ्गन्नमुषद्धयदः[1] ।
वाहकोऽसावरूपश्च बालरूपः समीरणः ॥ ८१ ॥

कश्चिद् स्वतो यस्य वोढा सोऽवाट् । अता सन्तता मा मानं यस्य । मा मानं परिमाणं ज्ञानं वा । सर्वगतः सर्वज्ञो वा । तादृशं बालतममप्यबालतमम् । यो वातरयमप्यवातरयं चकार ॥ १२ ॥

अरीणां दरो येन तेन पाञ्चजन्येन युक्तः । 'गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा' इत्यादेः । शङ्खभृद् गाश्चारयन् गोपालबालः प्रथितः यं भक्ता विठ्ठलमाहुः । अरिदराभ्यां चक्रशङ्खाभ्यां युक्तो वा । स हि कृष्णमन्त्रदेवता । अरयः दरयुजः भयभाजो येनेति वा । अरिदरयुक् स कृष्णः बालरूपमीरं समीरमधिरुह्य आ समन्ताद् गन् गच्छन् अवनिमध्ये रङ्गन् क्रीडन् अदः नवनीतममुषत् । अधि ईरम् आगन् इति वा पदपाठः । आगन् आगच्छन्नित्यर्थः । तद्यथा

---

१. **'–मुषत् पयः'** पा.

शुनश्चिच्छेपमितिवदागन्नित्यथवा पदम् ।
अथापि स्तूयते विष्णुर्गोपिकाभिः सुरैरपि ॥ ८२ ॥

नित्यं प्राप्तपरानन्दो नवनी स्तुतिमान् मतः[1] । ॥ ✻ ॥

शुनःशेपं चिदिति पठितव्ये ‘शुनश्चिच्छेपम्’ इति पठन्ति। नराशंसं वेति पठितव्ये ‘नरा वा शंसम्’ इति । कथं बालरूपः समीरः? मूलरूपे साक्षात्पुत्ररूप इति बालरूपः। बलानां समुदयो बालम्। तद्रूप इति बालरूपः। वायुर्हि बलदेवता। अथच पूर्वमवाडित्याह न वोढा कश्चन भगवत इति । अथापि कश्चिदस्ति तद्वोढेतीदानीमाह– बालरूपम् । भगवतो वाड् वाहकः अरूपश्चेति वाडरूप एव वालरूपस्तम् । यदि नवनीतादि उपरिभागे निधापयन्ति मैतत् कृष्णोऽ-पहार्षीदिति तदा पीठिकोलूखादीनधिरुह्य, कमपि गोपबालं वा, उत्पतन् पय आदि जहार । वस्तुतस्तु आदृश्यो वायुरेवैनमुवाह । न पीठिका पीठिका । पीठिकागतो वायुः पीठिका । नह्युलूखलमुलूखलम् । उलूखलगतो वायु-रुलूखलम् । न गोपबालो बालः । बालगतो बालरूपो वायुरेव गोपबालः । ज्ञानिनस्तं वायुवाहनमरिदरयुजं साक्षादकुर्वन्निति । ‘वरदो वायुवाहनः’ इति हि स्तुवन्ति। बालरूपं गोपजनं स्वेन सह गन् गमयन् इति च। उभयार्थला-भायैव गन्नित्याह । किमदो नवनीतम्। यत् स्वीये गोकुले गवां कुले च गतं नवं नूतनतया नीतं अदः पयः, गोपिकासु गतं पयो दधि हैयङ्गवीनं च नव-नीतम्। अयममुषत्। अत्तीत्यदो वा। नवनीतं जहार। हृत्वा जघास चेत्यर्थः। अथापि नवनी । नवनं स्तुतिः । तद्वान् नवनी भगवतो बाललीलावीक्षण-विस्मितैः सुरैः स्तुतः । गोपायन्तीति गोपिका इति देवता अप्युच्यन्ते । यासां नवनीतममुषत् ताभिरपि गोपिकाभिः साभिमानं मनसा स्तुतः । ‘गोपिकासु’ इति तृतीयार्थे सप्तमी । गोपिकासु गोपीजनमध्य इति च । गोपिकासुनवनी इत्येकं वा पदम्। गोपिकाभिः सुनवनी सुष्टुतः। नवनं स्तवनम्। णु स्तुतौ। इतः

१. **‘–मान् यतः’** पा.

तन्माताकोपमिता
तमनुससारात्मवादवाकोपमिता ।
जगृहेसानमनन्तं
देवन्तच्चिन्तयैवसानमनन्तम् ॥ १४ ॥

तन्माता। कोपम्। इता। तम्। अनुससार। आत्मवादवाकोपमिता॥ जगृहे। सा। अनमनम्। तम्। देवम्। तच्चिन्तया। एव। सानम्। अनन्तम्॥ १४ ॥

अज्ञैः कृष्णे हि[1] दोषोक्तौ सकोपा तेषु गोपिका ॥ ८३ ॥

ससारानु हरिं दोषराहित्यख्यापनाय[2] हि ।
यथा कर्मादिवादांस्तु परित्यज्याऽत्मवादिनी ॥ ८४ ॥

निखिला वेदवागेनं निर्दोषाशेषसद्गुणम्[3] ।
जगद्व्यापारसहितमन्यानमनमीश्वरम् ॥ ८५ ॥

नित्यं प्राप्तः मदः हर्षः यस्य । नित्यं प्राप्तपरानन्दः । अथच गोपिकासु नवं नूतनतया नीतमदः प्रापितहर्षः। अयं पयो दधि नवनीतं जहारेति न चुकुपुः। प्रत्युताहो भागधेयं न इत्यन्तर्जहृषुः॥ १३ ॥

कृष्णो नवनीतं मुष्णातीति श्रावंश्रावं दोषोद्भावकेषु कोपमिता तन्माता यशोदा कदाचित् कृष्णेन लीलया दधिमन्थभाजने भग्ने तमनुससार बन्द्धुम्। कथम्? आत्मवादवाकोपमिता । आत्मवादिनी वेदवाक् आत्मवादवाकः । आत्मानं वदन्तो वाका वचनानि यस्यामिति वाऽत्मवादवाका वेदवाक् तयोपिमिता । सा यथा कर्मादिवादान् विहाय भगवन्तमेवानुसरति तथा। जगृहे च सा। कम्? अनमनं कमपि न नमतीति तम्। सर्वेशम्। देवं मात्रा क्रीडन्तम्। दिवु क्रीडा-याम्। सानम्। अन चेष्टायाम्। जगद्व्यापारसहितम्। अनन्तं गुणतः। अथ च सानं सधावनम् । मातुः पुरतो भीतवत् धावन्तम् । तदपि तच्चिन्तयैव । तस्य

१. **‘कृष्णेऽतिदोषो–’** इति क्वचित्। २. **‘त्यस्थापनाय’** पा. ३. **‘निर्दोषानन्तसद्गुणम्’** पा.

जग्राह जगृहे सैवं गच्छन्तं पुरतो हरिम् ।
तदिच्छयैव– ॥ * ॥

अथसान्तरितामानं
विष्णुंविश्वोद्भवन्तदा[३]न्तरितामानम् । ३
अनयद्दामोदरतां
योरमयत्सुन्दरीन्निजामोदरताम् ॥ १५ ॥

अथ । सा । अन्तः । इता । अमानम् । [मानम् ।] विष्णुम् । विश्वोद्भवम् । सदा । अन्तरितामानम् ॥ अनयत् । दामोदरताम् । यः । अरमयत् । सुन्दरीम् । निजामोदरताम् ॥ १५ ॥

–साऽथान्तः प्राप्ताऽज्ञानं हि गोपिका ॥ ८६ ॥

व्याप्तं पूर्णबलं सर्वप्रणेतारं च सर्वदा ।
अस्योद्भवादिकर्तारं यस्यान्तरुदरे स्थिताः ॥ ८७ ॥

स्वेच्छयैव । न भीत्या । इदमिदानीं मातरं विनोदयामीति चिन्तयन्नेवं विजहारेति ॥ १४ ॥

अथ सा यशोदा अन्तर्मनसि अमानमिता अज्ञानं प्राप्ता, येन कृष्णं बन्द्धुं प्रयेते, अथ च कृष्णेन मानं माननां इता प्राप्ता, तस्या मातृत्वं मानयन् हस्तग्राह्यो बभूवेत्येतत्,अथ तस्मादेवान्तः मानं चित्तसमुन्नतिमिता गता, अहोऽयमग्राह्योऽगृह्यतेति । अथ च गृहीतं तं निगृहीतं मन्यमाना दामोदरतामनयत् दामभिरुदरे बद्ध्वा बन्धायोग्यम् । तदेवाऽह–विष्णुमित्यादि । विष्लृ व्याप्तौ । विष्णुं व्याप्तम् । विष्णुं सर्वदा सर्वप्रणेतारं पूर्णबलं च । 'णकारो बलम् । षकारः प्राण आत्मा' इति हि श्रुतिः । अनन्तमन्तवन्तमिव बबन्ध । पूर्णबलं दुर्बलं बालमिव बबन्ध । सर्वप्रणेतारं प्रणेयमिव बबन्ध । अहो लीला भगवतः । विश्वस्य

---

१. '**–द्भवं सदा–**' पा.

आ च मा च तथाऽनश्चान्तरितामान एव सः ।
यद्वा यस्योदरे विश्वमारमाप्राणमर्पितम् ॥ ८८ ॥

एवमन्तरितामानं बन्धायोग्यं च सर्वदा ।
दामोदरत्वमनयन्मानं प्राप्ताऽमुना हि सा ॥ ८९ ॥

बध्नाति या गुणैस्त्रेधा देवदानवमानवान् ।
साऽपि तद्गुणबद्धा मा को वै बध्नाति तं प्रभुम् ॥ * ॥ ९० ॥

चक्रेसोऽर्ज्जुननाशम्-
प्राप्नोति[१]चयत्स्मृतिस्सदाऽर्ज्जुननाशम् । १
तौचगतौनिजमोकस्-
तेनैवनुतेनयन्निजोनिजमोकः[२] ॥ १६ ॥

उद्भवं जनकम् । विश्वजनकं स्वजातमिव बबन्ध । अन्तरितामानम् । आकारश्चतुर्मुखवचनः । अकारवाच्यादागत इति । मा माता रमा । अनः । प्राणः । आमानाः यस्यान्तरुदरे गताः, मां चानं चाभिव्याप्य आमानं आरमाप्राणं विश्वं यस्यान्तरितमिति वा । तमहो जगदुदरमुदरे बबन्ध । भक्तानां सदा अन्तरितं नाशितममानमज्ञानं येनेति च शक्यं व्याख्यातुम् । अथापि सम्प्रति लीलाविशेषाविष्कारेण यशो दातुं यशोदां मोहपाशेन बबन्ध । अहो बद्धा स्वयमबध्नां कृष्णमिति मतिमिता । सदा परमात्मदर्शनादिना प्राप्तस्वानन्दभोगा लोकसुन्दरी रमा । तां त्रिगुणैर्लोकबन्धनीमपि यः स्वगुणैर्बद्ध्वाऽरमयत् तं को नु बध्नीयात् । अथापि तमहो देवकी गुणैर्बबन्ध ॥

१२+२२+१२+२० इति छन्दोगतिः ॥ १५ ॥

अन्यान् यो मोचयति शापादपि संसारतापादपि स कथं स्वयमन्यैर्बद्ध्यत इतीदानीमाह– चक्रे सोऽर्जुननाशम् । चक्रे सोऽर्जुनद्रुमयोर्भङ्गम् । तेन शाप-

---

१. '**प्राप्नोतियत्स्मृतिः**' इति, '**प्राप्नोति च तत्स्मृतिः**' इति च पा. २. '**यन्निजानिजमोकः**' पा.

चक्रे । सः । अर्जुननाशम् । प्राप्नोति । च । यत्स्मृतिः । सदा । अर्जुनना । शम् ।। तौ । च । गतौ । निजम् । ओकः । तेन । एव । नुतेन । यत् । निजः । निज-मोकः । [अनिजमोकः।]।। १६ ।।

शापतः सृतितश्चान्यान् मोचयन् नहि बन्धभाक् ।
चक्रे सोऽर्जुननाशं यद् यत्स्मर्ता धवळः पुमान् ।। ९१ ।।

शुद्धः सुखमवाप्नोति धवळोऽर्जुन उच्यते ।
तद्वृक्षगौ च यौ देवौ नारदस्य प्रसादतः ।। ९२ ।।

एष्यत्कृष्णपदस्पर्शं स्मरन्तावुपलभ्य तम् ।
स्तुत्वा तस्य प्रसादेन स्वं स्थानं स्वर्गतौ हि तौ ।। ९३ ।।

चशब्दात् तत्र यौ दुष्टौ स्वमोको निरयं गतौ ।
निजो हरेस्तदीयः स्यादनिजस्तद्द्विडुच्यते ।। ९४ ।।

भगवत्क्रियययैवैतद् यन्निजं[1] निजमोचनम् । ।। * ।।

मोक्षम् । प्राप्नोति च यत्स्मर्ता अर्जुनना धवळः शुद्धः सात्त्विकः पुरुषः सदातनं शं सुखं मौक्तम् । यस्य स्मरणमात्रेण जन्मसंसारबन्धनाद् विमुच्यते । तस्य शापमोचनं नाम कियत् । तौ द्रुमगतौ नळकूबरमणिग्रीवौ तेनैव कृष्णेन स्तुतेन तदनुग्रहेण निजं नाकाख्यमोकः स्थानं गतौ । चकारादन्यौ च तदाविष्टौ गतौ निजं निरयाख्यमोकः । यत् यस्मात् निजस्य भक्तस्य मोकः नित्यानन्दो मोक्षः निजः स्वाभिविकः । तदर्थं च निजभक्तयोः अनिजाभ्यां स्वस्मिन्नविष्टाभ्याम-सुराभ्यां धुनिचुमुभ्यां मोकः मोचनं विश्लेष इत्येतत्, निजः स्वाभाविकः । अनिजस्य भगवद्द्विषः मोकः नित्यदुःखं तमश्च निजः स्वाभाविकः । तत्तत्स्वभावानुगणं द्वयमपि भगवदिच्छानियतम् ।।

१२+२०+१२+२० इति छन्दोगतिः ।। १६ ।।

---

१. **'यन्निजानिजमोचनम्'** पा.

अथवृन्दावनवासं
गोपाश्चक्रुर्जगत्क्षितावनवासम् ।
तत्रबकासुरमारः
शौरिरभून्नित्यसंश्रितासुरमारः ।। १७ ।।

अथ । वृन्दावनवासम् । गोपाः । चक्रुः । जगत्क्षिता । अवनवासम् ।। तत्र । बकासुरमारः । शौरिः । अभूत् । नित्यसंश्रितासुरमारः । [नित्यसंश्रितासुः । अमारः]।। १७ ।।

गोपगोपीगवां वृन्दस्यावनं यत्र वै हरेः ।। ९५ ।।

यद्वा तद्वृन्दसंसेव्यमा समन्ताद् यदञ्जसा ।
वृन्दैरासेव्यमानो वा यत्र सन्निहितो हरिः ।। ९६ ।।

उत्पातभीता गोपा अथ व्रजं विहाय वृन्दावने वासं चक्रुः । कथं वृन्दावनम्? गोपगोपीगवां वृन्दस्य अवनं यत्र हरेः सकाशात् तद् वृन्दावनम् । तेषां तासां च वृन्देन आ समन्तात् वन्यते सेव्यत इति वृन्दावनम् । वृन्देन आवननीय आसेव्यमानो भगवानत्र गत इति च वृन्दावनम् । जगत्क्षिता जगन्निवासेन हरिणा सह । क्षि निवासे । जगत् क्षिणोतीति जगन्निरासेन वा हरिणा । योऽसुरजगदिह विहरन्निरसितुमुवास । कीदृशं वृन्दावनवासम्? वनवासमप्य-वनवासम् । उत्पातैरवनार्थमन्विष्टं गोपवृद्धानामिष्टं च वासम् । स्थूलदृशामेतत् यदुत्पातैरवनं नाम । अन्तरङ्गं निमित्तमाह– अवनवासम् । अकारवाच्यस्य हरेः वनं जलमवनमुच्यते । ननु सर्वमपि तस्येति वनमवनं भवति । पृथिव्यपृथिवी, तेजोऽतेजो, वायुरवायुर्विश्वमविश्वम् । न भवति विशेषविवक्षया । एवं हि बोद्धारो भावयन्ति । सर्वमपि वनं तदीयमित्यवनम् । अथाप्यवनमित्याह । तेन विशेष-प्रतिपत्त्या भवितव्यमिति । का प्रतिपत्तिः? काळिन्दीजलम् । सा हि भगवतो जाया । तेन तज्जाययाऽभिन्यमानं जलं विशिष्य तज्जलं भवति । अथ च तज्जलं

तद्धि वृन्दावनं [१]गोपास्तत्राऽवासमचीक्लृपन् ।
जगत्क्षिता सहाकारवाच्यस्य वनशब्दिते ॥ ९७ ॥

उदके कालियस्थाने वासो वासेन येन सः ।
उच्यतेऽवनवासेति जघ्ने चात्र बकासुरम् ॥ ९८ ॥

मरणं यत्परित्यागः स मुख्योऽसुर्यमाश्रितः ।
नित्यमेव स वै कृष्णः श्रियं च रमयत्यसौ ॥ * ॥ ९९ ॥

अहनद्वत्सतनूकं
योपाल्लोकंस्वयत्नवत्सतनूकम् ।
सोऽपाद्वत्सानमरः
सहाग्रजोगोपवत्सवत्सानमरः ॥ १८ ॥

विषदूषितमित्यवननीयमेवाऽसीत् गवां च गोपानां च । तत्र काळीयदमनार्थं वासः येन वृन्दावनवासेन नैकट्यात् सुशको बभूव तादृशम् । अवने वासो यस्मादिति । तत्र वसन् शौरिः बकासुरं मारयामास । योऽयं नित्यसंश्रितासुर-मारः । यमाश्रित्य असुर्मुख्यप्राणः प्रभवति, स नित्यसंश्रितासुः रमारमणश्च । नित्यसंश्रिते असुरमे रमयति वा । योऽसोरप्यसुः सोऽसुरान् व्यसूंश्चकारेति किं चित्रम् । असुरा अपि शलभा इव नारायणाग्नौ निपेतू रमाया मायामोहिता इति । नित्यसंश्रितासुः– अमारः इति वा प्रतृण्णम् । असतामममां अज्ञानं राति, सतां नाशयति चेति । रीङ् क्षये । असुरमारकोऽपि सतां न मारक इति वाऽमारः । अकारवाच्यस्य स्वस्य विद्या वा अमा । शोभा वा । तया च रमते । छन्दोगतिः पूर्ववदापश्चविंशं पद्यम् ॥ १७ ॥

---

१. **'गोपा यत्र वास–'** पा.

२. **'अहनत्'** शपा लुगभावश्छान्दसः । यद्वा हन्तीति हनः हनता (हनवदाचरति हनतीति) आचारार्थे क्विप्' इति श्रीराघवेन्द्रयोगिनां शिष्येण वेङ्कटार्येण कृतायां टीकायाम् ।

अहनत् । वत्सतनूकम् । यः । अपात् । लोकम् । स्वयत्नवत् । सतनूकम् ॥ सः । अपात् । वत्सान् । अमरः । सहाग्रजः । गोपवत्सवत् । सानमरः ॥ १८ ॥

अतो वत्सासुरादींश्च जघ्ने स मधुसूदनः ।
ऊ रुद्रः को विरिञ्चस्तावल्पौ विष्णोः सदैव हि ॥ १०० ॥

ताभ्यां सहैव यो लोकस्तं यो रक्षत्ययत्नतः ।
स कृष्णो वत्सपालोऽभूदजरोऽप्यमरोऽपि च ॥ १०१ ॥

गोपसूनुवदेवात्र बलभद्रेण संयुतः ।
अनः प्राणो रमा मा तत्सहितं लोकमेव यः ॥ १०२ ॥

रमयति – ॥ * ॥

सविभुश्श्रीमानहिके
ननर्त्तयस्यश्रमानमामानहिके ।
अकरोन्नद्युदकान्तं
कान्तन्नीत्वोरगंसनाद्युदकान्तम् ॥ १९ ॥

वत्सस्य तनूरिव यस्य तनूस्तं वत्सासुरं चाहन् । यः सुष्ठु अयत्नवत् अना-यासेन सतनूकं लोकमपात् । उः शिवः । को ब्रह्मा । तनू भगवतः सकाशादल्पौ भगवतधिष्ठानतया तनुस्थानीयौ उकौ तनूकौ । 'यस्याऽत्मा शरीरम्' इति श्रवणात् । ताभ्यां जगतः सृष्टिविलयहेतुभ्यां सहितं सतनूकं जीवलोकम् । सः सर्वलोकपालकः गोपबालवत् सहाग्रजः वत्सान् तर्णकानपात् । स्वयम-मरोऽपि मुग्धोऽयं गोपपोतः प्रजात इति अमान् अज्ञान् रमयन् । न केवल-मज्ञान् । सानमरः । अनः प्राणः । मा रमा । ताभ्यां सहितं प्राज्ञजातमपि लीलामानुषवेषेण तोकलीलया च रमयन् । आनमनमानमः । भक्तिप्रह्वता । तेन सहिता भक्ताः सानमाः । तान् बाललीलाभी रमयन् वा ॥ १८ ॥

सः। विभुः। श्रीमान्। अहिके। ननर्त। यस्य। श्रमानमा। मा। न। हि। के॥ अकरोत्। नद्युदकान्तम्। कान्तम्। नीत्वा। उरगम्। सः। ना। आद्युदकान्तम्॥ १९॥

–एष वै कृष्णो ननर्ताहिशिरस्यलम्।
जगत्येकार्णवे यस्य महाहिशयनस्य न　　॥ १०३॥

श्रमेणाऽनमति कापि शोभा ह्येतत्कुतोऽद्भुतम्।
स परः पुरुषः कान्तं यामुनोदं तदन्तकम्　　॥ १०४॥

चकार तमहिं नीत्वा द्वीपं रमणकं प्रति।
समुद्रो ह्याद्युदं त्वन्ते यस्य स द्वीप एव तम्　　॥ ❋॥ १०५॥

हत्वाधेनुकमूढम्-
बलात्प्रलम्बश्चखेट्सधेनुकमूढम्।
व्रजमावीदमृताशः
पीत्वावह्निश्चरस्थिरादमृताशः॥ २०॥

हत्वा। धेनुकमूढम्। बलात्। प्रलम्बम्। च। खेट्। सधेनुकम्। ऊढम्॥ व्रजम्। आवीत्। अमृताशः। पीत्वा। वह्निम्। चरस्थिरादम्। ऋताशः॥२०॥

स विभुः अहेः काळियस्य के शिरसि ननर्त। अथापि श्रीमानक्षुण्णशोभः। कुतः? के प्रळयपयस्यपि यस्य मा शोभा श्रमेण आनमा क्षुण्णा न भवति हि। तस्य काळियफणे नर्तनं कियन्नाम। यमुनानद्युदकस्यान्तमन्तकं विषेण दूषयित्वा नाशकं काळियमुरगं आद्युदकान्तं रमणकद्वीपं नीत्वा यमुनोदकप्रान्तं कान्तं कमनीयं सर्वोपादेयमकरोत्। स ना परमपुरुषः। आद्युदकमिति समुद्र उच्यते। यस्यान्ते प्रान्ते परितः समुद्रो भवति स द्वीप आद्युदकान्तः॥ १९॥

खमाकाशम्। तदभिमानी विघ्नेशः। तस्येष्टे खेट्। विनायकवरबलात् अवध्यं धेनुकं नाम मूढमसुरं प्रलम्बं च मूढमसुरं बलात् बलद्वारा तमाविश्य हत्वा

प्रलम्बं धेनुकं मूर्खं हत्वा तद्वरदाधिपः।
बलाविष्टेन रूपेण स्वयं च सह धेनुभिः　　॥ १०६॥

स्वसंश्रितं[1] व्रजं कृष्णो जुगोपामृतभोजनः।
पीत्वाऽग्निं सत्यसर्वाशश्चराचरभुजं हरिः　　॥ ❋॥ १०७॥

गिरिणारक्षापिकृता
व्रजस्यतेनस्वरक्षरक्षापिकृता।
शक्रायव्यञ्जयता
स्वांशक्तिंविश्वमात्मनाव्यञ्जयता॥ २१॥

गिरिणा। रक्षा। अपि। कृता। व्रजस्य। तेन। स्वरक्षरक्षापिकृता॥ शक्राय। व्यञ्जयता। स्वाम्। शक्तिम्। विश्वम्। आत्मना। अव्यम्। जयता॥ २१॥

व्रजस्य तेन रक्षाऽपि गिरिणा हरिणा कृता।
स्वरानन्दः स[2] एवाऽऽख्यस्तस्मै क्षीरं क्षरन्ति याः　　॥ १०८॥

सधेनुकं सगोगणं स्वयमूढं धृतं स्वसंश्रितं व्रजमावीत् दवानलं च पीत्वा द्विः। काळिन्दीतीरे मुञ्जाटव्यां च। कीदृशम्? चरस्थिरादम्, चराचरभुजम्। कीदृशः? अमृताशः। अमृतमानन्दः। 'विद्ययाऽमृतमश्नुते' इति प्रयोगात्। नित्यानन्दभोजनः। न वह्निपानेन काचन तस्य व्यथा। वह्निं पिबन्नपि अमृतमेवाश्नाति। अथच ऋताशः सत्यसङ्कल्पः। भगवत एवेयं लीलामयीच्छा। यया दवानलं प्रादुश्चकार च पपौ च। ऋतमवितथं सर्वं जगदश्नातीति वा। तस्य कियदिदं वह्निपानं नाम॥ २०॥

गिरिणाऽपि गोवर्धनेन स्वकरकलितेन तेन हरिणा व्रजस्य रक्षा कृता। न केवलं धेनुकं प्रलम्बं च हत्वा, गिरिं धृत्वाऽपि। आसुरी पीडा प्रथमा। दैवी

---

१. **'स्वयन्त्रितम्'** पा.

२. **'स एव आख्यः'** इति च्छेदः। **'स एवाश्च'** इति पाठान्तरम्। तदा **'स एव अश्च'** इति च्छेदः।

स्वरक्षरा हि ता गावस्तत्क्षयाय प्रचोदिताः।
इन्द्रेण वारिवाहाः स्वरक्षरक्षा इतीरिताः ॥ १०९ ॥

तेषामापिः स एवेन्द्रः पाता कृष्णेन तत्कृता।
यद्वा स्वरक्षरो वायुः क्षापी रुद्रस्तु तत्कृता ॥ ११० ॥
स्वसामर्थ्यं व्यञ्जयता शक्राय जयताऽखिलम्।
स्वेन रक्ष्यम्– ॥ * ॥

पश्चिमा। रक्षाऽपि प्रथमं दैत्यानां शासनेन, इह तु देवानामनुशासनेन। तमिमं प्रमेयविशेषमपिनाऽह। कीदृशेन तेन? स्वरक्षरक्षापिकृता। स्वरित्यानन्दरूपः अकारवाच्यश्चेति स्वरो नारायणः। तस्मै क्षरन्ति क्षीरमिति स्वरक्षरा व्रजधेनवः। ताः क्षपयन्तीति प्रवृत्तासारनीरा नीरदाः स्वर-क्षर-क्षा उच्यन्ते। तेषामापिरापयिता पाता चेन्द्रः स्वर-क्षर-क्षापिः। तमपि करोति सृजति कृन्तति संहरति वा तादृशेन। इन्द्रस्यापि जनिमृती यदायत्ते। तमेतं किमिन्द्रस्तत्प्रहिता वा मेघाः कुर्युः ॥

अथच स्वरः स्वरमणो हरिः। तं क्षरति सन्ततं ज्ञानिनामुपदिशति मूलरूपेण चावताररूपेण चेति स्वरक्षरः प्राणः। क्षपयत्यन्ते जगदिति क्षापी संहारशक्तिः शिवः। जगत्सृष्टिसंहारकृतावपि तौ करोति कृन्तति च। का कथा देवेन्द्रस्य? तादृशेन हरिणा। सर्वजगद्गिरणाद् गिरिणा च गिरिगतेन ॥

नन्वसुरहननं नाम जानीम। सुरपतिस्तु भगवति कृतमतिः। किमिदमपूर्वं तस्यापि मानहननम्। कोऽभिसन्धिः? आह– शक्राय स्वां शक्तिं व्यञ्जयता। विस्मृतभक्तिरिव विस्मृतभगवच्छक्तिरिव स किल प्रावर्तत। तस्य स्वां शक्तिं स्मारयता तेन च स्वभक्तिं विस्तारयता व्रजस्य रक्षा कृता न केवलम्। देवव्रजस्य विशिष्येन्द्रस्यापि रक्षा कृता किल। अपिच विश्वमखिलम्, न केवलं व्रजः, आत्मनाऽव्यं रक्ष्यम्, नान्येनेति शक्राय व्यञ्जयता, जयता सर्वोत्तमेन सर्वरक्षकेण व्रजस्य रक्षाऽपि कृता। आत्मना रक्ष्यं विश्वं स्वरूपमहिम्नैव

रेमेगोपीष्वरिहा
समन्मथाक्रान्तसुन्दरीपीष्वरिहा।
पूर्णानन्दैकतनुः
सविश्वरुक्पावनोप्यनन्दैकतनुः ॥ २२ ॥

रेमे। गोपीषु। अरिहा। सः। मन्मथाक्रान्तसुन्दरीपीषु। [समन्मथाक्रान्तसुन्दरीपीषु।] अरिहा। [अलिहा।] ॥ पूर्णानन्दैकतनुः। सः। विश्वरुक्पावनः। [विश्वरुक्। पावनः।] अपि। अनन्दैकतनुः ॥ २२ ॥

–स वै कृष्णो रेमे गोपीषु शत्रुहा ॥ १११ ॥

हन्ता रुद्रवरोन्मत्तशङ्खचूडाख्यदुर्मतेः।
सुन्दर्यस्ता इपियश्च सुन्दरीपिय ईरिताः ॥ ११२ ॥

विजयत इति चाऽऽत्मनाऽव्यं जयता। विश्वविजयिनो लीलामात्रमिन्द्रविजयो नाम ॥ २१ ॥

अरिहा यो व्रजस्यारीन् हतवान् स कृष्णः एवमरिप्रहाणेन निरातङ्कासु गोपीषु गोपभार्यासु वेणुनादविस्मृतस्वजनकार्यासु आत्मारामोऽपि रेमे रासोल्लासेन। अपिच स कृष्णः मन्मथाक्रान्तसुन्दरीपीषु गोपबालासु च रेमे। मन्मथाक्रान्तासु सुन्दरीषु इपीषु च। इः कामः पाता यस्य तदिपि स्त्रीगुह्यम्। तस्य ईः शोभा यासां ता इपियः तासु अक्षतयोनिषु इपीषु। तासां वासो जहार विजहार च तासु। अथ पुनररिहा रुद्रवरमत्तं शङ्खचूडाख्यं गुह्यकाधमं जघान। नन्वात्मारामः कथं रेमे? अरिहा अलिहा असेवनेन अनास्वादनेन। लिह आस्वादने। नतु कामपरवशतया। किन्तु तासां कामभक्तिपरवशतया ता आस्वादयामास। न स्वयमासस्वदे। स्वयमनाक्रान्तस्ता मन्मथाक्रान्ता इति तासु रेमे। अपिच रिडिति निन्दा। रिह निन्दायाम्। अरिहा अनिन्दया, अनिन्द्यतयेति यावत्, रेमे। अपिच ताः सुन्दर्य इन्दिराविष्टा इति तासु रेमे।

इपिश्रियो हि यासां ता इपियः परिकार्तिताः ।
स्त्रीगुह्यमिपिशब्दोक्तमिः [१]पाता सोऽस्य यत् ततः ॥ ११३ ॥

आक्रान्ता मन्मथेनैताः कन्या अक्षतयोनयः ।
रेमे तासु च गोविन्द उद्वाह्य वरतः [२] पुरा ॥ ११४ ॥

अलिहाऽसेवयैवेशः स्वयं सेव्योऽखिलैर्जनैः ।
यत्पूर्णानन्दसान्द्रैकतनुः कामादिरोगहा ॥ ११५ ॥

यद्वा सम्पूर्णविज्ञानप्रकाशः पावनः परः ।
सर्वेषां च गतिज्ञानप्रदोत्तमतनुः प्रभुः ॥ * ॥ ११६ ॥

अथहतयोर्ग्गळिकेश्योः
श्वफल्कजप्रापितःपुरीङ्गळिकेश्योः ।
भङ्क्त्वाधनुराजवरं
जघानतेनैवचस्वयंराजवरम् ॥ २३ ॥

इन्दिरा हि सुन्दरी प्रस्तुता । 'योऽरमयत् सुन्दरीम्' इति । अथच मन्मथेन सहिता समन्मथा सकामा भक्तिः । तयाऽक्रान्तासु सुन्दरीषु रेमे भक्तिवशंवदः । तस्माद् युक्ता तस्याऽत्मारामता । तदाह– पूर्णानन्दैकतनुः । केवलपूर्णानन्दस्वरूपः । पूर्णानन्देनाभिन्ना तनुरस्येति वा । सारत्वाच्च सः । अपिच विश्वाभ्यो रुग्भ्यः कामाद्युपद्रवेभ्यः अपगमय्य स्वभक्तान् पावयति यः स कथं कामेन स्वयमुपद्रुतः स्यात्? विश्वरुक् पूर्णज्ञानप्रकाशः सर्वपावनश्चेति वा । यत् सर्वज्ञस्तस्मात् तासां भक्त्यतिशयं जानन्नेव तासु रेमे । यः सर्वपावनस्तत्सङ्गेन कथं तासां पावित्र्यं विहन्येतेति । अथच अनन्दैकतनुः चेतनजातस्य अनं गतिं मतिं च ददती एका सर्वोत्तमा तनुरस्येत्यनन्दैकतनुः । तेन तत्प्रेरणयैव तासां सकामा मतिस्तदनुगणाश्च चेष्टा इति ॥ २२ ॥

---

१. **'पातेशोऽस्य'** पा. २. **'वरदः पुरा'** पा.

अथ । हतयोः । गळिकेश्योः । श्वफल्कजप्रापितः । पुरीम् । गळिकेशी । ओः ॥ भङ्क्त्वा । धनुः । आजवरम् । जघान । तेन । एव । च । स्वयम् । राजवरम् । [राजबलम्]॥ २३ ॥

गळिः केशी च यौ दैत्यसूदनेन निषूदितौ [१] ।
तिर्यग्भ्यः कुत्सितौ नित्यं दैत्यौ शिववरोद्धतौ ॥ ११७ ॥

इति ज्ञापयितुं सम्यक् प्रकृत्योर्व्यत्ययः कृतः ।
गळिकेश्योरिति ह्यत्र व्यत्ययः कुत्सने स्मृतः ॥ ११८ ॥

गळिनौ सुगळौ केशौ गळिकेशीति केशवः ।
स्तुवत्सुकण्ठब्रह्मेशवानित्येवाभिधीयते ॥ ११९ ॥

गडिरिति गळिरिति चाऽख्यायते कर्षणादिकर्मस्वनियुक्तोऽदान्तश्च वृषः । गळ इति गळकम्बळ उच्यते । यां सास्नामाहुः । तद्वान् गळिः । गळे केशवान् केशिरश्वः । पदज्ञाः केशादिनिं पठन्ति । तेन केशवान् केशी भवति न केशिः । अथापि तेन प्रकृत्योर्नकारान्तयोर्व्यत्ययेन नलोपेन तस्यापि गुणलोपमाह । तिर्यग्भ्योऽपि हीनगुणः कुत्सिततम इति । तद्यथा कुत्सितो गळी गळिर्बभूव । गळकम्बळवान् हि गळी भवति न गळिः । तेन प्रकृत्योर्नकारान्तयोर्गळिन्निति केशिन्निति, इह पुनर्व्यत्ययेन कुत्सायामिकारान्तता कृता गळिकेश्योरिति । तथाच गळिरित्यरिष्टनामा वृषाकृतिरसुरः । केशिस्तन्नामा हयाकृतिः । 'अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम्' [१०४.१५३] इति ब्राह्मे । तयोः कृष्णेन हतयोः । अथ श्वफल्कतनयेनाक्रूरेण मधुरां पुरीं प्रापितः । गळिकेशी गळिनौ भगवत्स्तवनेन प्रशस्तगळौ स्तुवत्कण्ठौ केशौ ब्रह्मेशानावस्य स्त इति गळिकेशी हि केशवः कृष्णः । यदर्थोऽयमवतारस्तदिदानीं सम्पत्स्यत इति सोत्कण्ठौ महता कण्ठेन तं तुष्टुवतुरिति । अहो चित्रमिदं यदयं गळिकेशी हत्वा स्वयं गळिकेशी बभूव । ओः शिवस्य धनुः, शिवेन कंसाय दत्तम्, यन्निमित्तोऽय-

---

१. **'निसूदितौ'** इति स्वरसम् ।

ओ रुद्रस्य धनुर्भङ्क्त्वा तच्छब्देन जघान ह।
कंसं राजवरं यद्वा धनुःखण्डेन तद्बलम् ॥ १२० ॥

अजो ब्रह्माऽथ रुद्रः स्यादाजस्तद्वरवद् धनुः। ॥ ※ ॥

मृद्नन्गजमुग्रबलं
सबलोरङ्गंविवेशसृतिमुग्रबलम्।
हत्वामल्लौबलिनौ
कंसञ्चविमोक्षितौततौलौबलिनौ ॥ २४ ॥

मृद्नन्। गजम्। उग्रबलम्। सबलः। रङ्गम्। विवेश। सृतिमुक्। रबलम्। [रवरम्।] ॥ हत्वा। मल्लौ। बलिनौ। कंसम्। च। विमोक्षितौ। ततौ। लौ। [रौ।] बलिनौ [वरिणौ।] ॥ २४ ॥

मर्दयंस्तु गजं रुद्रवरयुक्तं बलान्वितः ॥ १२१ ॥

मुत्सवः, भङ्क्त्वा। न केवलं शिवेन दत्तम्। किन्तु आजवरम्। अजस्यायं सुत इत्याजः शिवः। अथच आकारो ब्रह्मवचनः। तस्माज्जात इत्याजः शिवः। तस्य वरः यस्य तदाजवरं धनुः शिववररक्षितम्। तद् भङ्क्त्वा तेनैव भग्नेन धनुषा तद्रक्षार्थं नियुक्तं राज्ञः कंसस्य वरं बलं जघान। वबयो रलयोश्चाभेदात्। तेनैव नादेन राजवरं राजश्रेष्ठं च स्वयं जघान हतप्रायं चकार। निश्चितमेष्यदपि अतीतत्वेन भण्यते। स्ववधमासन्नं कंसो मनसा निश्चिकायेति भावः ॥ २३ ॥

उग्रबलं गजं कुवलयापीडं मृद्नन्। उग्रस्य वरबलोपेतं च। सबलभद्रः सृतिमोचको मुकुन्दः रबलं रमणीयतया व्यूह्य सन्नद्धबलम्। रवरं विस्मयिनां जनानां रवेण रमणीयम्। रबं रवं सर्वतो लातीति वा। तथा रवरं रमणीयं वरेण भक्तानुग्रहणरूपेण, 'भूभारहरणाय मयैव कंसो घानिष्यते' इति भगवता दत्तेन वरेण। अत्र हि सम्प्रति तत् सम्पत्स्यते। तेन च वरेण रमणीयं रवरं मल्लरङ्गं विवेश। तत्र बलिनौ मल्लौ चाणूरमुष्टिकौ सबलः हत्वा। स्वयमेकं बलेन

मल्लरङ्गं विवेशाऽथ रमणीयं वरेण ह।
भक्तानुग्रहणेनैव मोचयामास तातकौ ॥ १२२ ॥

रमणौ वरिणौ वाऽथ मल्लौ कंसं निहत्य च।
तद्बन्धतः– ॥ ※ ॥

प्रादात्सान्दीपनये
मृतपुत्रञ्ज्ञानदीपसन्दीपनये।
गुर्वर्त्थेज्ञानतमः
[1]प्रभेदितानित्यसम्भृताज्ञानतमः ॥ २५ ॥

प्रादात्। सान्दीपनये। मृतपुत्रम्। ज्ञानदीपसन्दीपनये ॥ गुर्वर्थे। अज्ञानतमः-प्रभेदिता। नित्यसम्भृताज्ञानतमः ॥ २५ ॥

–स वै सर्वविद्याधीशः सुराधिपः ॥ १२३ ॥

चैककमित्येतत्। तथा कूटकोसलौ स्वयमेव हत्वा, कंसं च हत्वा, चकारात् छलं मल्लं कंसानुजांश्च बलाविष्टेन रूपेण हत्वा, ततस्तौ तातौ पितरौ तेन विमोक्षितौ कारायाः। तनुतः प्रीतिमिति ततौ मातापितरौ। कीदृशौ ? लौ बलिनौ। ला आदाने। आत्तकृष्णौ मनसा। सदा तमेव स्मरन्तौ। रौ च भगवतो लीलेयमिति कारायामपि रममाणौ। सदा कृष्णध्यानबलयुतौ। तपोबलयुतौ च। वरिणौ च वरेण प्राप्तकृष्णौ ॥ २४ ॥

ज्ञानदीपं ये सन्दीपयन्ति शिष्येषु गुरवस्तानपि नयतीति तेषामपि नायकाय, वेदाद्या वा ज्ञानदीपसन्दीपास्तान् शिष्येषु नयतीति वा ज्ञानदीपसन्दीपनये सान्दीपनये आचार्याय गुर्वर्थे गुरुदक्षिणार्थं मृतं पुत्रमुज्जीव्य प्रादात् ॥

---

१. 'अज्ञानतमः प्रभिनत्तीति अज्ञानतमः प्रभेदी। (तस्य भावः) अज्ञानतमःप्रभेदिता। तया (नित्यं) सम्भृता पूर्णा अखण्डिता आज्ञा यस्य सः सम्भृताज्ञः। अज्ञाननिवर्तकत्वेनाखण्डिताज्ञ इत्यर्थः' इति वैयाकरणानां प्रियं विवरणं वेङ्कटार्यटीकायाम्।

29-3-2006

प्रादाच्च सान्दीपनये सुतं तस्मै मृतं हरिः।
ज्ञानदीपस्य ये सम्यग् दीपकास्तान् नयेत् तु यः ॥ १२४ ॥

स्वयं च सकलाज्ञानतमश्छेत्ता हरिः सदा।
सम्यग्भृता च यस्याऽज्ञा तया यच्चरणौ नतौ ॥ १२५ ॥

रमा विद्यास्वरूपाऽऽसौ गुरुवृत्तिमदर्शयत्। ॥ * ॥

जित्वामागधराजं
तोषितमकरोत्सदात्मयोगधराजम्।
अनुकुर्वन्निजसदनं
चक्रेरम्याम्पुरंसुबोधनुजसदनम्[1] ॥ २६ ॥

जित्वा। मागधराजम्। तोषितम्। अकरोत्। सदात्मयोगधराजम्। [सदा। आत्मयोगधराजम्।]॥ अनुकुर्वन्। निजसदनम्। चक्रे। रम्याम्। पुरम्। सुबोधनुजसदनम्॥ २६ ॥

अजेयत्वं जरासन्धे दत्वा भीतश्चतुर्मुखः ॥ १२६ ॥

यदि मद्वचनं कृष्णोऽनुसरेत् तर्हि नोऽनयः।
इति मागधराजं तं जित्वा चक्रे सुतोषितम् ॥ १२७ ॥

ननु को हि नाम गुरुस्तस्य यश्चतुर्मुखाय सर्वविद्या अध्यापयामास? का च गुरुदक्षिणा? अवितथमाह भवान्। इदं तु नरलोकविडम्बमात्रमित्याह– अज्ञान-तमः प्रभेदिता। भेत्ता च भेदयिता च। अपिच नित्यं शिरसि धृताज्ञया सकल-विद्यास्वरूपया रमयाऽप्यानतचरणः। नित्यसम्भृताज्ञा आनता मा यस्येति। किमहो तस्यापि कश्चिदुपदेष्टा॥ २५ ॥

मागधानां राजानं जरासन्धं जित्वा आत्मजमजं तोषयामास। यो जरासन्धस्य वरमजेयत्वं ददौ। तेन वरेण स किल सतामध्वनि कण्टको जातः। निष्कण्टकः

१. **‘रम्यं पुरं सुबोधनिजसदनम्’** पा.

स्वसुतं वैष्णवं योगं धत्ते यः सर्वदोत्तमम्।
तमजं ये सुबोधेन प्रादुर्भूताः स्वरूपतः ॥ १२८॥

ते सुबोधनि(?नु)[1]जास्तेषां सच्चेष्टा यत्र तत् सदा[2]।
निजं हि सदनं विष्णोस्तद्वद् द्वारावतीं पुरीम् ॥ १२९ ॥

चक्रे– ॥ * ॥

सम्प्रति सम्पन्नः सतामध्वेत्यहो वरभञ्जनेन वरदाता विधाता समाधत्त। जरासन्धवधस्यायमोङ्कार इति। कीदृशमजम्? सदा, सन्तं वा निर्दोषमुत्तम-मात्मनो योगं वैष्णवं ज्ञानयोगं धरतीति तादृशम्। अत एव वरं तादृशं ददौ; भगवता तद्भञ्जने कृते च तुतोष। निजसदनं वैकुण्ठमनुकुर्वन्, वैकुण्ठानुरूपं कुर्वन्, तदनुरूपां पुरीं भूतळेऽपि चिकीर्षन् चक्रे रम्यां पुरं द्वारावतीं नाम। कीदृशं निजसदनम्? सुबोधनुजसदनम्। स्वभावानुगुणं जाता नुजा उच्यन्ते, अल्लोपेन। सुबोधेन येऽनुगता जाताः प्रादुर्भूताः ते सुबोधनुजाः। प्रादुर्भूत-स्वरूपज्ञानाः। तेषां सन् अनः सती ज्ञानानन्दमयी चेष्टा यत्र तादृशम्। तद्वत् पुरीं च सुबोधनुजानां भगवदवतारकार्यानुगुणं भुवि जातानामपरोक्षदृशां देवानां सदनं सद्म चक्रे॥

ननु किमिदं व्याख्यानम्? सुबोधेन अनुगता जाता इति व्याख्यायते। मूले तु सुबोधनुजेति पठ्यते। नतु सुबोधानुजेति। सत्यं न पठ्यते। अत एव व्याख्यायते। व्याख्यानतो हि विशेषप्रतिपत्तिमभ्युपयन्ति। ननु तर्हि जातोऽ-

१. यद्यपि नरहरितीर्थीये **‘सुबोधनिजाः’** इत्येव सर्वत्र पाठः समुपलभ्यते। तेन **‘सुबोधनिजसदनम्’** इत्येव तत्सम्मतः पाठ इत्यापाततः प्रतीयते। परन्तु व्याख्यानशैली पाठान्तरं पोषयति। यदि **‘सुबोधनिजसदनम्’** इत्येव श्रीनरहरितीर्थसम्मतः पाठोऽभविष्यत्, तदा **‘सुबोधा ये निजास्तेषां सच्चेष्टा यत्र ’** इत्येवव्याख्यास्यत्। नहि **‘प्रादुर्भूताः स्वरूपतः’** इति निजपदव्याख्यानं स्वरसतः सम्भवति। नु अनु स्वरूपानुरूपम्, नु निश्चयेन वा जाताः प्रादुर्भूता इति तु स्वरसम्। जनी प्रादुर्भावे। तेन **‘ते सुबोधनुजास्तेषाम्–’** इत्येव प्राचीनपाठः स्यादिति युक्तमुत्पश्यामः। एवं पूर्वत्रापि **‘–तमजं ये सुबोधानु–’** इत्यपि पाठः स्यात्। यत्र साक्षाच्छिष्ययोर्द्वयोः पाठ एव विप्रतिपत्तिस्तत्रार्वाक्तनाः कथं निर्णिनीषन्ति। महान्तः प्रमाणम्।

२. **‘तत् सदः’** पा.

प्रसभंसगजबलस्य
क्षत्रस्योच्चैस्समगधराजबलस्य ।
मानंशिशुपालवरं
हत्वाभैष्मीमवापशिशुपालवरम् ॥ २७ ॥

प्रसभम् । सगजबलस्य । क्षत्रस्य । उच्चैः । समगधराजबलस्य ॥ मानम् । शिशुपालवरम् । हत्वा । भैष्मीम् । अवाप । शिशुपालवरम् ॥ २७ ॥

–राजसमूहस्य गजादिचतुरङ्गिणः ।
मागधेशयुतस्यापि मानं हत्वाऽऽप रुग्मिणीम् ॥ १३० ॥

जातः स्यात् । व्याख्यानमव्याख्यानम् । न स्यात् । वक्तृतात्पर्यमनुसृत्य हि व्याख्यानं भवति । प्रकरणाच्च वक्तुस्तात्पर्यमध्यवसीयते । तद्यथा वगाहनमवगाहनं भवति । पिधानमपिधानं भवति । वधिरवधिर्भवति । धिकमधिकम् । तथा नुजोऽनुजो भवति । सूचितमेतत् स्वयमेवोत्तरत्र भगवत्पादेन ‘पूर्णगुणैर्धिक’ इति प्रयुञ्जानेन । अन्यथा ‘पूर्णगुणाधिक’ इत्येव प्रायोक्ष्यत् । एतनैतद् विज्ञायते यदवाप्योरिवान्वध्योरप्यल्लोपो वक्तव्य इति । नु निश्चयेन वा जाता नुजाः । अथवा तुष्यतु भवान् । सुबोधाः जातापरोक्षाः सुबोधेन वाऽपरोक्षज्ञानेन ये निजाः मुक्ताः तेषां सदनमित्येवार्थः । अतितरां निजा एव नुजा उच्यन्ते । ‘तृतीयोऽतिशये’ इति हि स्मरन्ति । वक्ष्यति च टीकामुपरि– ‘उकारः स्यादिकारार्थे तृतीयोऽतिशये’ (१५३) इति ॥

१२+२०+१२+२१ इति छन्दोगतिः ॥ २६ ॥

सगजमश्वरथपत्तिमयं बलं यस्य । मगधराजस्य बाहुबलेन सेनाबलेन च सहकृतस्य क्षत्रियचयस्य उच्चैर्मानं गर्वं चित्तसमुन्नतिं वा । प्रसभं हत्वा विनाश्य भैष्मीमवाप । कीदृशं मानम्? शिशुपालवरम् । शिशुपाल एव भैष्म्या वरो यत्र

शिशुपालो वरो भैष्म्याः [1]कृतोऽस्माभिर्वरोन्नतेः ।
अजादीनामितीत्थं तु मानस्तेषां बभूव ह ॥ १३१ ॥

शिशवो वासुदेवस्य लोकपाला अजादयः ।
वरस्तेषां कारणं च यस्मिन् स हि तथोच्यते ॥ ✻ ॥ १३२ ॥

हंसोडिभकश्चपला-
वमुनासंसूदितौयवनकश्चपला ।
कीर्त्तिर्विमलाविरता
प्रतताविश्वाधिपावनीलाविरता ॥ २८ ॥

हंसः । डिभकः । चपलौ । अमुना । संसूदितौ । यवनकः । च । पला । [परा] ॥ कीर्तिः । विमला । विरता । [अविरता ।] प्रतता । विश्वाधिपावनी । ईलाविः । [ईराविः ।] अता ॥ २८ ॥

हरिणा हंसडिभकौ यवनश्च निषूदिताः[2] ।
परा च कीर्तिरमला विशिष्टा हि रताः सुराः ॥ १३३ ॥

तादृशम् । शिशुपालाय भैष्मी दातव्येति निश्चित्य तदर्थं मदोद्धतं क्षत्रमिति । पुनश्च शिशुपालवरम् । भगवतः शिशवो जीवलोकस्य पालाश्चेति ब्रह्मादयः शिशुपाला उच्यन्ते । तेषां वरोऽपि कारणं यत्र माने तादृशम् । ब्रह्मादिभिर्लब्धेन वरेण समेधितस्तेषां मान इत्येतत् । अशिशुपालवरमिति प्रतृण्णं पठन्तो भ्रान्ताः ॥

१२+२० १२+२० इति मात्राक्रमः । उत्तरपद्ये च ॥ २७ ॥

चपलौ हंसडिभकावपि सोदरावनेन संसूदितौ । यवनकश्च पला पलाय्य गुहान्तः संसूदितः । उपसृष्टिरपि क्वचिद् धात्वर्थेन गर्भिणी भवति । यथा पुरस्तात् अधिरुह्येति वक्तव्येऽधीत्येवाह– ‘अध्येरं गन्’ इति । तथाऽत्र पलाय्येति

---

१. **‘भैष्म्या मतो–’** पा.   २. **‘निसूदिताः’** इति स्वरसम् ।

यस्यां सा विरता तेन सा प्रविस्तारिता शुभा ।
पावयित्री च विश्वस्मादधिकं सर्वमेव च[१] ॥ १३४ ॥

ईरेणाऽविश्च सर्वत्र सन्तता हि महात्मनः । ॥ * ॥

सत्याजाम्बवतीर्य्या
भार्य्याविन्दाद्याभानुसाम्बवतीर्य्याः ।
प्रद्युम्नम्मोदरतः
प्रापज्येष्ठंहरिस्सुतम्मोदरतः ॥ २९ ॥

सत्याजाम्बवतीर्याः । भार्याः । विन्दाद्याः । भानुसाम्बवतीः । याः ॥ प्रद्युम्नम् । मोदरतः । प्राप । ज्येष्ठम् । हरिः । सुतम् । मोदरतः ॥ २९ ॥

सत्या जाम्बवती चाऽर्ये यासां ताः प्राप केशवः ॥ १३५ ॥

वक्तव्ये पलेत्येवाह । यथा चात्रैवोत्तरार्धे आविष्कृतेति वक्तव्ये आविरित्येवाह– 'ईलाविः' इति । बहुलं चैवंविधाः प्रयोगाश्छन्दस्सु भवन्ति– 'आविः सन्निहितम्' इत्यादयः । अथच तेन पला परा कीर्तिः प्रतता । निर्मला, अविरता निरन्तरा, विरता वा, वयः विशिष्टा सुरा अप्यत्र रता इति । 'वयः सुपर्णाः' इत्यादि-श्रवणात् । प्रतता विस्तारं गमिता लोकत्रयेऽपि तेन हरिणा । विश्वस्य अधि-पावनी । विश्वस्मात् पावनादधिकं च पावनी । ईरिति लक्ष्मीवचनः । या लक्ष्म्या पुत्रत्वेन लाळित इति ईलो वायुः । रलयोरभेदादील ईरः समीरो वा । तेन मूल-रूपेणावताररूपेण चाविष्कृता । अत एवाता सततं तता । अत सातत्यगमने । पुनरपि स्वयं तेन हरिणा प्रतता प्रकर्षेण विस्तारं गमिता लोकत्रयेऽपि ॥ २८ ॥

सत्यभामा जाम्बवती च ईर्ये प्रमुखतया प्रथमं कीर्तनीये यासाम् । ईर्ये इत्यार्ये वा । तृतीयोऽतिशये । यासां ते ज्येष्ठे श्रेष्ठे प्रेष्ठे च ता विन्दाद्याः, नामैक-देशग्रहणम्, याः मित्रविन्दाद्याः पञ्च । नीळा भद्रा काळिन्दी लक्षणा

१. 'च सर्वस्मादधिकं सर्वमेव वा' पा.

मित्रविन्दादिका भार्या भानुसाम्बवतीः प्रभुः ।
प्रद्युम्नाख्यं सुतं ज्येष्ठं हरिः प्राप रमोदरात् ॥ १३६ ॥

मोदे रतो हि भैष्म्याख्यविषयोत्थे सुखे सुखी । ॥ * ॥

यत्परिवारतयेशा
जातादेवनृपात्मनारतयेशाः ।
यद्धरितंविषसर्प्प-
प्रभृतिध्वान्तन्नमारुतिंविषसर्प्प ॥ ३० ॥

यत्परिवारतया । ईशाः । जाताः । देवाः । नृपत्मना । अरतयेशाः । [रतयेशाः] ॥ यद्धरितम् । विषसर्पप्रभृतिध्वान्तम् । न । मारुतिम् । विषसर्प ॥ ३० ॥

चान्याश्चतस्रः । अथ याश्चापराः षोडशसहस्राणि शतं च । भानुसाम्बाभ्यां पुत्रवतीस्ता भार्याः प्राप हरिः । भानुः सत्यभामासूनुः । साम्बो जाम्बवत्याः । ननु सत्यं सत्याजाम्बवत्यौ भानुसाम्बवत्यौ । कथं विन्दाद्याः? नायं दोषः । सर्वेषामपि पुत्राणां सर्वा अपि मातरो भवन्ति । ननु सुमित्रा रामेणापि सपुत्रा । भरतेनापि । अथच भानुसाम्बपदाभ्यां सर्वेऽपि कृष्णतनया उप-लक्ष्यन्ते । तद्यथा काकेभ्यो दधि रक्ष्यतामित्याह । न काका एव निवार्यन्ते । मार्जारादयोऽपि निवार्यन्ते येभ्योयेभ्यो दधि रक्षितव्यम् । तथा भानुसाम्बौ कृष्णभार्याणां पुत्रावित्याह । न भानुसाम्बावेव गृह्येते । चार्वाद्याः श्रुताद्या अन्येऽपि गृह्यन्ते । यान्यान् ताः प्रासुवन्त । भानुसाम्बादिभिः पुत्रवतीरित्युक्तं भवति । अथ पुनर्भैष्म्या सह मोदे विषयभोगे रतः, वस्तुतस्तु स्वानन्दरतः हरिः माया भैष्मीरूपाया उदरतः ज्येष्ठं सुतं प्रद्युम्नं प्राप ॥

अत्र द्वितीयपादे एका मात्राऽधिका१२+२१+१२+२० इति ॥ २९ ॥

कथिता नारायणकथा । अथ नरोत्तमः सनरः प्रस्तूयते । तेन पाण्डवीयां कथामुपक्रमते । यस्य परिवारतया जगतामीशितारोऽपि देवाः प्रायो नृपात्मना

29-3-2006

परिवारतया यस्य जाता देवा नृपात्मना ॥ १३७ ॥
ईशास्ते सर्वलोकानां येषामीशोऽरतो मरुत्।
येन पूर्णं नहि प्राप विषसर्पादिजं तमः ॥ १३८ ॥

भीमम्– ॥ ✻ ॥

येनहिडिम्बबकाद्या
रक्षोधीशानिपातिताबबकाद्याः।
भीमेप्रीतिममेयां
व्यञ्जयतातेनशेषपातिममेयाम्॥ ३१ ॥

येन । हिडिम्बबकाद्याः । रक्षोऽधीशाः । निपातिताः । बबकाद्याः ॥ भीमे । प्रीतिम् । अमेयाम् । व्यञ्जयता । तेन शेषपाति । ममे । याम् ॥ ३१ ॥

–येनैव कृष्णेन हिडिम्बाद्या निपातिताः।
रक्षोऽधीशाश्च मांसादाः प्रीतिं व्यञ्जयताऽसमाम् ॥ १३९ ॥

जाताः। कुरुकुले च यदुकुले च बहुलम्। कीदृशाः? अरतयेशाः। अरतः अकारे भगवति रतः यो वायुर्भीमात्मा। स ईशो येषाम्। प्रधानाङ्गं हि मारुतिः। 'यो वायौ' इति कोशकाराः पठन्ति। 'रतयेशाः' इति वा प्रतृण्णम्। ज्ञानरूपत्वाद् यकारे कृष्णे रताः रतयाः। कृष्णभक्ताः। तेषामीशाः। येन भरितं पूर्णं मारुतिं भीमसेनं विषसर्पादिना मोहादिकं तमो न विषसर्प विससर्प, न प्राप। स हरिरिति पूर्वेणान्वयः॥

१२+२०+१२+२० इति च्छन्दोगतिरापश्चत्रिंशम्॥ ३० ॥

भीमे अमेयाममितामतुलां प्रीतिं व्यञ्जयता येन कृष्णेन, तेन भीमेन निमित्तेन, भीमं निमित्तं कृत्वा, बबकं मांसमाद्यं येषां ते मांसादाः हिडिम्बबकाद्या रक्षोऽधीशा निपातिताः। यश्च कृष्णः यामिमां प्रीतिं शेषपाति, शेषश्च पः पशुपतिश्च ताभ्यामतिशयो यथा स्यात्तथा तयोर्यादृशी प्रीतिस्ततोऽप्य-

भीमे तेनैव भीमेन निमित्तेन हता इति।
शेषोऽनन्तः पती रुद्र आभ्यामतिशयो यथा ॥ १४० ॥

तथा यां निर्ममे प्रीतिं भीमसेने जनार्दनः। ॥ ✻ ॥

अथकृष्णावरणेतान्
प्राप्तान्राज्ञोशृणोत्सदावरणेतान्।
द्रष्टुंयातस्सबल-
स्ताश्चानैषीत्पृथासुतांस्ततस्सबलः॥ ३२ ॥

तानिन्द्रस्थलवासां-
श्चक्रेकृष्णःपरोनिजस्थलवासान्।
स्वबलोद्रेचितमानै-
र्जुगोपधर्म्मश्चतैःपराचितमानैः॥ ३३ ॥

अथ । कृष्णावरणे । तान् । प्राप्तान् । राज्ञः । अशृणोत् । सदावरणेतान् । [सदा । आवरणेतान् ।] ॥ द्रष्टुम् । यातः । सबलः । ताम् । च । अनैषीत् । पृथासुतान् । ततः । सबलः ॥ ३२ ॥ तान् । इन्द्रस्थलवासान् । चक्रे । कृष्णः । परः । निजस्थलवासान् ॥ स्वबलोद्रेचितमानैः । जुगोप । धर्मम् । च । तैः । पराचितमानैः ॥ ३३ ॥

तिशायिनीं निर्ममे भीमे स हरिरित्येकान्वयः। बलात् हिंसित्वा बकन्ति खादन्तीति बबकं मांसम्। विशिष्य नृमांसम्। कामङ्कामं खादन्ति वा। ब कामने। बान्ति बकन्ति चेति। 'बबकं मांसमज्ज्रयोः' इति चाभिधानं पठन्ति ॥ ३१ ॥

अथ परः परमेश्वरः कृष्णः ये पूर्वं रुग्मिणीहरणे प्राप्तमुखभङ्गाः तानेव राज्ञः कृष्णास्वयंवरे तद्वरणार्थं प्राप्तानशृणोत्। कीदृशान्? सत्सु विषये सदा

द्रौपदीवरणे चाथ प्राप्तान् राज्ञोऽशृणोद् हरिः ॥ १४१ ॥

तानेव भग्नमाना ये रुग्मिणीहरणे पुरा ।
सत्सु चाऽऽवरणोपेतानतस्तज्ज्ञानवर्जितान् ॥ १४२ ॥

स्वयमप्यगमत् तत्र द्रष्टुमेव बलान्वितः ।
तां कृष्णामनयत्कृष्णः पाण्डवांश्च गजाह्वयम् ॥ १४३ ॥

ततो गजाह्वयात् कृष्णः सवरो वरदानतः ।
पार्थानिन्द्रस्थलस्थांस्तांश्चकार[१] परमेश्वरः ॥ १४४ ॥

स्वभृत्येषु स्थितो यस्मादाज्ञारूपो रवो हरेः ।
तत्रैवास्यन्ति ये नित्यं न चलन्ति कुतोऽपि तान् ॥ १४५ ॥

निजत्वेन स्थितं विश्वं वाय्वादीनां महात्मनाम् ।
तस्यांशे लवशब्दोक्त आसीनानिति वा भवेत् ॥ १४६ ॥

आवरणोपेतान् । सति सत्ये वा विषयेऽज्ञानावरणोपेतान्, सत्यं मिथ्येति मिथ्यैव च सत्यमिति मन्यमानान् । रुग्मिणीहरणेन कृतेऽपि पाठने महता कालेनापि अनधिगततथ्यान् । आह हि स्वयं भगवान्– 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इति । श्रुत्वा च कृष्णावरणं तेषां च बालिशतां द्रष्टुं नतु लक्ष्यं वेद्धुम्, यातः सबलभद्रः । अथ च तां कृष्णां तांश्च जितकृष्णान् पृथासुतान् द्रष्टुं कुम्भकारगृहं यातः । कथं पश्चापि पृथासुताः? दत्तोत्तरमेतत् । विन्दाद्या भानुसाम्बवत्यो यथा तथेति । अथच त्रयः प्रसूताः सुताः द्वौ माद्र्या समर्पिताविति पश्चापि सुता एव । सबलः अनन्तेन स्वरूपसामर्थ्येन सहितः । अथ सबलः सवरः । पाण्डवेभ्यो दातुं गृहीतप्रभूतार्हणः । अथचोद्वाहमङ्गले पुनर्द्रष्टुं यातः । ततः उद्वाहानन्तरं तां तांश्च ततः पश्चालनगरात् हस्तिनपुरं अनैषीत् । ततः पुनस्तानिन्द्रप्रस्थवासांश्चक्रे । तेन स्वयमभिषिच्य धर्मराजाय दत्तमिति निजस्थलम् । अपिच निजेषु भृत्येषु तिष्ठतीति निजस्थो लवः रवः भगवदाज्ञारूपः,

---

१. **'–स्थांश्च चकार'** पा.

हरिः स्वबलसंवृद्धैः पार्थैर्धर्मं जुगोप तैः ।
उत्तमैरार्जितो मानो येषां तैर्जितशत्रुभिः ॥ * ॥ १४७ ॥

वालिवधानुनयाय
प्रणयीसख्यंसुसन्दधेनुनयाय ।
वासवजेनविशेषात्
तेनैवपुनर्नृजन्मजेनविशेषात् ॥ ३४ ॥

वालिवधानुनयाय । प्रणयी । सख्यम् । सुसन्दधे । नु । नयाय ॥ वासवजेन । विशेषात् । तेन । एव । पुनः । नृजन्मजेन । विशेषात् ॥ ३४ ॥

श्रुतिस्मृती इत्येतत् । स्वयमेवाऽह हि 'श्रुतिस्मृती ममैवाऽज्ञे' इति । तत्राऽसत इति निजस्थलवासास्तान् । श्रुतिविहितकर्मनिरतान् । तत्रैव अस्यन्ति प्रतिष्ठिता भवन्ति वा । असु क्षेपणे । क्षेपणं स्थापनम् । अपिच वाय्वादीनां नियम्यत्वेन निजं स्वीयं सत् तिष्ठतीति निजस्थं निखिलं जगत् । तस्य लवे एकदेशे इन्द्रप्रस्थे आसीनान् । देवोत्तमानां भीमार्जुनादीनां भुवनत्रयमपि स्वं स्थलम् । अथापि भगवदिच्छया तदेकदेशमिन्द्रस्थलं स्वीकृत्य न्यूषुरिति । एवं तान् इन्द्रस्थलवासांश्चक्रे । तैर्धर्मं जुगोप च । चकारेणेदमप्याह यद् धर्मं जुगोप निरास चाधर्ममिति । तैः कैः? स्वबलोद्रेचितमानैः । स्वबलेन स्वसन्निधानप्राप्तबलविशेषेण उद्रेचितं उत्सेकं प्रापितं मानं बलपरिमाणं येषां तैः । अत्युद्रिक्तबलैः । स्वबलेन उद्रेचितः मानश्चित्तसमुन्नतिर्येषामिति वा । अथच पराचितमानैः । पराः उत्तमा आचितमानाः सञ्चितसम्मानाश्चेति तादृशैः । पराचितः पराकृतः परेषां मानोऽभिमानो यैस्तैरिति वा । 'परीक्ष्य लोकान् कर्मचितान्' इति प्रयोगात् । परेषामचितः निरस्तः मानो यैरिति वा । जितशत्रुभिः ॥ ३२–३३ ॥

पूर्वावतारे विना स्वस्मिन्नपराधं केवलं सुग्रीवेण सख्यं सन्धातुमिव यो वालिनो वधः, तेन च यस्तस्य सम्भावितो मनःक्लेशस्तदपनोदेनानुनयायेव तत्प्रतिकर्तुं तेनैव वालिना नु सम्प्रति नृजन्मनि जातेन वासवजेन अर्जुनेन

वालिनो यो वधः पूर्वमपराधं विना कृतः।
तत्क्लेशवारणायेशः प्रीत्या सख्यं सुसन्दधे ॥ १४८ ॥

तेनैव वालिनेन्द्रेण नृषु जातेन तस्य च।
नहि खेदस्तथाऽपीशो न्यायादनुनिनाय तम् ॥ १४९ ॥

न खेदकारणं तस्य सर्वलोकैककर्तरि।
योह्यन्तेऽत्ति गरुत्मन्तं शेषं च नृहरिः स्वयम् ॥ ✻ ॥ १५० ॥

मातुःपरिभवहान्यै
राज्ञाद्युसदामितश्चपरिभवहान्यैः[1] ।
अभवन्नरकमुरारि-
र्योवासीदत्समस्तनरकमुरारिः ॥ ३५ ॥

सख्यं दृढं सन्दधे विशेषात् प्रणयं प्रदर्शयन्। यद्यपि विदितभगवल्लीलस्य न वालिनः खेदः। तथाऽपि नयाय लोकनीत्यनुसृत्यै तमनुनिनाय। अपि च यो विशेषात्, विं गरुडं शेषं च योऽन्तेऽत्ति नृसिंहस्तस्य वस्तुतः कोऽयं वासवानुनयो नाम विना भक्तवत्सलतया। गरुडमार्गः शेषमार्ग इति द्वावेव हि पन्थानौ। ताभ्यां द्वारभूताभ्यां सर्वान् देवानत्तीत्यर्थः ॥ ३४ ॥

द्युसदां स्वर्गसदां राज्ञा इन्द्रेण, अन्यैश्च मुनिभिः शरणमितः। किमिति? देवमातुरदितेः कुण्डले अपहृत्य जनितस्य परिभवस्य निरासाय इन्द्रेण, तपोभङ्गजनितपरिभवनिरासाय मुनिभिः शरणमितः। परिभवहा भक्तानां परिभवस्य हन्ता, परितो भवस्य संसारस्य चापहन्ता हरिः कुण्डलयोरपहर्तुर्नरकस्य तमनुगतस्य मुरस्य चारिर्वधकृदभवत्। तेन नरकारिरिति मुरारिरिति जगति विदितोऽभवत्। तदेव प्रकटमाह– यः समस्तनरकमवासीदत्। यः सर्वनराणां कमिन्द्रियं मनआख्यमाससाद। आसाद्य च तैरवगतमहिमाऽसीत्। हन्तायं नरकमुरयोर्हन्ता चिन्तामणिरिव भक्तचिन्तासन्तापहृदिति हृदि

१. **'–भवहान्यै'** पा.

मातुः। परिभवहान्यै। राज्ञा। द्युसदाम्। इतः। च। परिभवहा। अन्यैः॥ अभवत्। नरकमुरारिः। यः। अवासीदत्। [वा। आसीदत्।] समस्तनरकम्। उरारिः। [इळाळिः।]॥ ३५ ॥

इन्द्रः स्वर्गसदां राजा तेनेतः शरणं हरिः।
पराजयविनाशाय मातुरन्यैश्च केशवः ॥ १५१ ॥

मुनिभिः परितो हन्ता भवस्य नरकादिहा।
अभवद् यो हि तेनैव[1] महिम्ना स नृणां च कम् ॥ १५२ ॥

इन्द्रियेशं मनः प्राप यस्येळाऽऽळिः स वै हरिः।
उकारः स्यादिकारार्थे तृतीयोऽतिशये यतः ॥ १५३ ॥

महेळा कोलमहिळा या हीळामाविशद् रमा।
अथवा सत्यभामाऽऽळी साऽपि भूरिति हीरिता ॥ ✻ ॥ १५४ ॥

निधाय नरैराराधितोऽभवत्। ' यः वा आसीदत्' इति वा च्छेदः। न केवलं नरकस्य मुरस्य चायमरिः। सर्वेषामपि सत्प्रतीपानामित्याह– उरारिः। उना शम्भुना वरमासाद्य रमन्त इति उरा असुराः। तेषां समेषामप्ययमरिः। अपिचानेनैव विशेषणेन वर्णविपर्ययेणार्थविशेषानप्याविश्चकार। तथाहि– तृतीयोऽतिशय इति नयेन इकारस्थान उकारः। ळस्य च रेफः। तेन इळाळिरिति सम्पद्यते। उकारस्तृतीयो वर्ण इळाया अतिशयमाह। महतीयं महीति। इळेति महीमानिनी देवतोच्यते। महत्ता च भूरूपाया रमायाः सन्निधानपदता। इळा च वराहमहिळा। या वराहान्नरकमसूत। अहो वराहोऽस्यां नरकमुदपादयत्। उदसादयच्च कृष्णो भूत्वा तमेव। सत्यमुक्तं भगवता– 'न मे द्वेष्योऽस्ति न प्रियः' इति। अपिच इळेति महीगता महिता रमैवोच्यते। श्रीर्भूर्दुर्गेति हि त्रीणि रूपाणि भवन्ति तस्याः। तत्र द्वितीयं भूरिति रूपं सत्यभामा बभूव। सैवाऽळिः प्रिया जाया तस्येति इळाळिः। सत्यभामासहायः। सा किल सहचरी बभूव नरकं हन्तुं प्राग्ज्योतिषं गन्तुर्भगवतः ॥ ३५ ॥

१. **'यो ह्यनेनैव'** पा.

नीतोदिविदेववरै
रेमेसत्यासमन्वितोदेववरैः।
सर्वर्त्तुवनेशशिना
निशिसत्यांवासरेवनेशशिना॥ ३६ ॥

नीतः । दिवि । देववरैः । रेमे । सत्यासमन्वितः । अदेववरैः ॥ सर्वर्तुवने । शशिना । निशि । सत्याम् । वासरे । वने । अशशिना ॥ ३६ ॥

स जगाम दिवं देवैरर्चितः[1] सत्यया सह ।
असुरोच्चबलैर्यद्वा वरो येषाम एव तैः ॥ १५५ ॥

अर्चितः स ततो गच्छन् रेमे नित्यसुखाम्बुधिः ।
सदा सर्वर्तुसम्पद्भिः संसेव्ये नन्दने वने ॥ १५६ ॥

शशिना निशि सत्यां वै वासरे सति भानुना ।
शशवान् नहि भानुर्यद् वासरस्य स कारणम् ॥ ※ ॥ १५७ ॥

देववरैः दिवं नीतः, पूजां च प्रापितः दिवि सत्यासमन्वितो रेमे । कीदृशैः? देववरैरप्यदेववरैः । अदेवेभ्योऽसुरेभ्यः ज्ञानेन बलेन च वरैः । अथच अकार-वाच्यो वासुदेव एव वरो वरणीयो येषां तादृशैः । सर्वर्तुभिः सकृत् सम्पत्त्या सर्वर्तुषु वा वननीये नन्दने वने रेमे । कथम्? निशि सत्यां शशिना शीत-भानुना । वासरे सति अशशिना अशीतभानुना ॥

ननु स किलाशशी भवति योयो न भवति शशी । कथं भानुरेव । ननु न सोऽसुरो भवति योयः सुरो न भवति । किन्तु सुरविरोद्धारोऽसुरा उच्यन्ते । एवं निशाकरः शशी भवति । दिवाकरश्चाशशी । प्रसङ्गाच्चार्थविशेषे पर्यवसानं भवति । व्याख्यानतश्च विशेषं विज्ञास्यसि । तद्यथा पार्थाय सुभद्रा दत्तेति । नहि येये पार्थास्ते सर्वे गृह्यन्ते । किन्तु धनञ्जयः । अपिच शशमिति सौरतं

---

१. **'–रर्चितम्'** इति प्रचलितः पाठः प्रामादिकः ।

सुरतरुमापालिमतात्
प्रकाशयञ्छक्तिमात्मनःपालिमतात्।
सुरवरवीरेषुदरी
प्रधानजीवेश्वरःपरेषुदरी॥ ३७ ॥

सुरतरुम् । आप । आलिमतात् । प्रकाशयन् । शक्तिम् । आत्मनः । पालिमतात् ॥ सुरवरवीरेषु । दरी । प्रधानजीवेश्वरः । परेषुदरी ॥ ३७ ॥

अमरोत्तमवीरेषु निजां शक्तिं प्रकाशयन् ।
सत्यभामामताच्छङ्खपाणिः प्राप सुराङ्घ्रिपम् ॥ १५८॥

लोकानां पालका ये तु तद्वान् पाली शचीपतिः ।
अध्यादत् तन्मतं कृष्णो जित्वा तान् सुरपुङ्गवान् ॥ १५९ ॥

प्रधानस्य च जीवानामीश्वरः परबाणभित् ।
प्रधानजीवा ब्रह्माद्यास्तेषामीशोऽथवा भवेत् ॥ ※ ॥ १६० ॥

सुखमुच्यते । तद्दानाच्छशवान् शशी भवति निशाकरः । दिवा च तदनव-काशादशशी भवति दिवाकरः ॥

अत्र १२+२०+१२+१८ इति च्छन्दोगतिः । उत्तरपद्ये च ॥ ३६ ॥

आलिः सखी सत्यभामा तन्मतमनुसृत्य सुरतरुं पारिजातमाप । सुरवर-वीरेषु आत्मनः शक्तिं प्रकाशयन् तान् सर्वान् विजित्य पालिमतात् । पाला लोकपाला देवा अस्य सन्तीति पाली पुरन्दरः । तन्मतमत्ति नाशयतीति तादृशः । दरी दरधरः । शङ्खनादघोषितनाकलोकविजयः । प्रधानस्य प्रकृतेः जीवानां चेश्वरः । क्षराक्षरपुरुषयोरीश्वरः पुरुषोत्तम इत्येतत् । 'प्रधानपुरुषेश्वरः' इति च विष्णुसहस्रनामसु । प्रधानजीवा ब्रह्माद्यास्तेषामीश्वर इति वा । शत्रु-बाणविदारणः । बाणैः शत्रुविदारणो वा । परेषु शत्रुषु दरयतीति दरी जनित-दरः । परेषु देवेष्वपि विषये दरी । 'भीषाऽस्माद् वातः पवते–' इत्यादि-श्रवणात् ॥ ३७ ॥

पुरमभियायारिदरी
दत्वाभद्राम्पृथासुतायारिदरी।
शक्रपुरीमभियातः
प्रादाद्वह्नेर्वनंसतामभियातः॥ ३८॥

पुरम्। अभियाय। अरिदरी। दत्वा। भद्राम्। पृथासुताय। अरिदरी॥ शक्र-पुरीम्। अभियातः। प्रादात्। वह्नेः। वनम्। सताम्। अभिया। अतः॥ ३८॥

शङ्खचक्रधरः कृष्णः पूर्वं[१] द्वारावतीं ययौ।
अर्जुनाय सुभद्रां च दत्त्वा शक्रपुरीं ययौ ॥ १६१॥

सुयोधनाय वाचा तां बलदत्तां सुरारिभित्।
ततो गत्वा वनं कृष्णो ददौ खाण्डवमग्नये ॥ १६२॥

तत्रत्यानामभीत्यैव जरितार्यादिनां सताम्।
तत्र युद्धागतानां वाऽभिया शक्रादिनां सताम् ॥ * ॥ १६३॥

शिवभक्तप्रवराद्यम्-
पुमान्नसेहेगिरीशविप्रवराद्यम्।

अरिदरी चक्रशङ्खपाणिः, अरिदरी सुरशत्रुविदारणः विशिष्य च सुभद्रा मयैव वोढव्येति दुर्योधनदुराशाविदारणः, तस्मै कृतवाग्दानस्य बलभद्रस्या-सुरावेशविदारणः कृष्णः पुरं द्वारावतीमभिगत्य ततः पृथासुतायार्जुनाय भद्रां कल्याणीं सुभद्रां प्रदाय पुनः शक्रपुरीमिन्द्रप्रस्थमभिगतः वह्नेः खाण्डवं वनं प्रादात्। सतां तत्र वने सतां ज्ञानिनां जरितार्यादीनामतो वह्नेरभिया। अभय-दानेन। सतां युद्धायाऽगतानां सतां इन्द्रादीनां वा॥

१२+२०+१२+२० इति च्छन्दोगतिः ऐकचत्वारिंशम्॥ ३८॥

---

१. 'पुनर्द्वारवतीम्' पा.

तंस्वात्मेन्द्रवरेण
व्यधुनोद्भीमेनधूतरुद्रवरेण॥ ३९॥

शिवभक्तप्रवराद्यम्। पुमान्। न। सेहे। गिरीशविप्रवरात्। यम्॥ तम्। स्वात्मेन्द्रवरेण। व्यधुनोत्। भीमेन। धूतरुद्रवरेण॥ ३९॥

परमः पुरुषो विष्णुर्न सेहे यं स्वयं प्रभुः[१]।
तं भीमेन जघानाऽत्मभक्तश्रेष्ठेन मागधम् ॥ १६४॥

शिवभक्तवरेष्वाद्यं हरचण्डवरादलम्।
येषां रुद्रवरास्तेऽपि हता भीमेन राक्षसाः ॥ * ॥ १६५॥

यस्याज्ञाबलसारैः
पार्थैर्दिग्भ्योहृतन्धनम्बलसारैः।
जित्वाक्ष्मामविशेषाम्-
प्रसँह्यभूपान्त्समस्तकामविशेषाम्॥ ४०॥

गिरीशस्य च विप्रस्य च चण्डमुनेः वरबलादुद्वृत्तं शिवभक्तप्रवरेष्वाद्यं यं जरासन्धं पुमान्, असाधारण्येन व्यपदेशा भवन्ति, परमपुरुषः न सेहे। अथापि न स्वयं जघान, तं भीमेन व्यधुनोत्। कीदृशेन? स्वतन्त्रः आत्मा अन्तर्यामी इन्द्रः स्वामी येषां तेषु तेषां वा वरेण। स्वयमेव वा स्वात्मा। स्वभक्तश्रेष्ठेन। स्वयं नारायणः आत्मा स्वामी येषां ते स्वात्मानः स्वभक्ताः। तेषामिन्द्रा इन्द्रादयः। ततोऽपि वरेण वा। शिवभक्तप्रवरेष्वाद्यं स्वभक्त-प्रवरेष्वाद्येनाजीघनदित्येतत्। रुद्रवरकवचितं तं कथं व्यधुनोत् ? आह– धूतरुद्रवरेण। रुद्रवरकञ्चुकिता अन्येऽपि जरासन्धसमानयोगक्षेमा अभूव-न्नित्यप्याह– धूतरुद्रवरेण। रुद्रस्य वरो येषां तेऽन्येऽपि रुद्रवरोपेता बहुधा येन निरस्तास्तेन भीमेन व्यधुनोत्॥ ३९॥

---

१. 'प्रभुः। भीमेन निजघानाऽत्म–' पा.

यस्य । आज्ञाबलसारैः । पार्थैः । दिग्भ्यः । हृतम् । धनम् । बलसारैः ॥ जित्वा । क्ष्माम् । अविशेषाम् । प्रसँह्य । भूपान् । समस्तकामविशेषाम् ॥ ४० ॥

यस्याऽज्ञया बलं सारो येषां तैः पाण्डवैः पृथक् ।
दिग्भ्यो धनमुपानीतं सरद्भिः सैनिकैः स्वकैः ॥ १६६ ॥

जित्वा प्रसह्य नृपतीन् वशे कृत्वा वसुन्धराम् । ॥ * ॥

अथपार्थान्क्रतुराजम्-
प्रापयदमरेट्सरुद्रशक्रतुराजम् ।
पूजातेनावापि
च्छिन्नश्चैद्यस्सृतिङ्गतेनावापि ॥ ४१ ॥

अथ । पार्थान् । क्रतुराजम् । प्रापयत् । अमरेट् । सरुद्रशक्रतुराजम् ॥ पूजा । तेन । अवापि । छिन्नः । चैद्यः । सृतिम् । गते । नावा । अपि ॥ ४१ ॥

प्रापयामास देवेशः क्रतुराजं पृथासुतान् ॥ १६७ ॥

अजेरशिवशक्राद्या यत्रेज्याः परितो हरिम् ।
अग्रपूजाऽमुनैवाऽप्ता प्रतिपक्षोऽत्र चेदिपः ॥ १६८ ॥

यस्याऽज्ञया बलं बाह्यं सारोऽन्तःसत्त्वं च येषां तैः । यस्याज्ञाबलमेव येषां जीवनसार इति वा । पार्थैः भीमादिभिः पृथक्पृथक् स्वकेनस्वकेन बलेन चतुरङ्गिणा सह सरद्भिः दिशां विजये नानादिग्भ्यः धनमाहृतम् । कथम्? भूपान् प्रसह्य जित्वा तेन क्ष्मां च जित्वा । कीदृशीम्? अविशेषाम् । अयं देशविशेषो जितोऽयं च जित इति यत्र विशेषव्यपदेशो न सम्भवति । समग्रां क्ष्माम् । समस्ताः काम्यभोगविशेषा यस्यां तादृशीं च ॥ ४० ॥

अथ पार्थान् क्रतुराजमश्वमेधं प्रापयत् सर्वामरवन्दितः सर्वयज्ञभोक्ता कृष्णः । कीदृशमश्वमेधम् ? रुद्रः शक्रः तुरो वायुरजश्च । 'तुरं भगस्य

हतस्तेनैव हरिणा तम एव प्रपेदिवान् ।
तस्य संसर्गदोषेण स्वभृत्ये कुसृतिं गते ॥ १६९ ॥

तत्तारणाय नावा– ॥ * ॥

निहतौसौभकरूशौ
शीतोभातश्चयेनतौभकरूशौ ।
अजयद्रुद्रश्चरणे
बाणार्थेवनतिपतितकचन्द्रश्चरणे ॥ ४२ ॥

निहतौ । सौभकरूशौ । शीतः । भातः । च । येन । तौ । भकरूशौ ॥ अजयत् । रुद्रम् । च । रणे । बाणार्थे । अवनतिपतितकचन्द्रम् । चरणे ॥ ४२ ॥

–अथ तेनान्यावपि पातितौ ।
करूशसाल्वपौ येन लोकाह्लादकरः शशी ॥ १७० ॥

आह्लादितस्तथा भातो लोकस्येति दिवाकरः ।
भकश्चन्द्रो रुशड्भानुः रुशद्धत्सेति हि श्रुतिः ॥ १७१ ॥

धीमहि' इति श्रुतिः । तैः सहितमिज्यत्वेन हरिपरिवारतया । सोमाधिकारिणां शतदेवानामेतदुपलक्षणम् । शते तावत् तुरा इति मरुतः पञ्चाशत्, एकादश च रुद्रा मुखत एवोक्ताः । शक्र इत्यन्येषामादित्यानामुपलक्षणम् । तत्र तेनाऽग्रपूजाऽवापि । तेनैव छिन्नश्चैद्यः शिशुपालः,योऽग्रपूजां व्यरुणत् । द्वौ हि तत्र जीवौ । द्वयी च तयोर्गतिरित्याह– सृतिं गते नावाऽपि । तत्र शापतः सृतिं गते स्वभक्ते जये नावा पापतारणतरिणाऽपि हरिणा सुपथश्छिन्न एव चैद्यगतोऽसुर इति । अन्यस्मिन्नपि सात्त्विके जने सृतिं गते नौभूतेन ॥ ४१ ॥

अथ तेन सौभः साल्वः करूशपतिः दन्तवक्रश्च निहतौ स्वयम् । येन तौ नभसि गतौ भकरूशौ चन्द्रसूर्यौ शीतो भातश्च भवतः । कथं भकरूशौ? भ आनन्दे । आह्लादकत्वाद् भकश्चन्द्रः । भानि नक्षत्राणि भानवन्ति करोतीति

रुश एव हि रूशः स्यादधिकं रोचते यतः ।
न हि रुद्रवरोन्मत्तानहनत् केवलं हरिः ॥ १७२ ॥

किन्तु तं च रणे रुद्रमजयद् बाणहेतुतः ।
तत्प्राणरक्षणायातं यस्य मौलिगतः शशी ॥ १७३ ॥

पतितश्चरणे विष्णोरवनत्या महात्मनः । ॥ ✻ ॥

असृजज्ज्वरमुग्रतमः-
क्षयप्रदोलीलयाधिवरमुग्रतमः ।
क्रीडामात्रंविश्वम्-
प्रकाशयन्नात्मनस्सविहरकमात्रंविश्वम् ॥ ४३ ॥

असृजत् । ज्वरम् । उग्रतमःक्षयप्रदः । लीलया । अधिवरमुक् । रतमः ॥ क्रीडामात्रम् । विश्वम् । प्रकाशयन् । आत्मनः । सविहरकमात्रम् । [सः । विहरकमात्रम् ।] विश्वम् ॥ ४३ ॥

तन्मध्ये दर्शयन् युद्धं लीलयाऽऽत्मजनं ज्वरम् ॥ १७४ ॥

वा भकः । रुश दीप्तौ । अतिशयेन रुशन् रूशः सूर्यः । तथाहि श्रुतिः– 'रुशद्वत्सा रुशती श्वेत्याऽऽगात्–' [ऋ.१.११३.२] इति । रुशती दीप्ता श्वेत्या श्वेतवर्णा उषाः रुशन् दीप्तः सूर्यो वत्सो यस्यास्तादृश्यागादिति । शीत आह्लादितः । भातः प्रकाशितः । न केवलं रुद्रवरमत्तान् । किन्तु अजयद् रुद्रं च रणे । बाणरक्षार्थमागतम् । के शिरसि यश्चन्द्रः सोऽवनत्या विष्णोश्चरणे पतितो यस्य तम् । व्योमकेशं हि तमाचक्षते । विष्णुपदं च व्योम ॥

१२+२०+१२+२१ इति च्छन्दोगतिः ॥ ४२ ॥

स कृष्णः तत्र रुद्रेण सृष्टस्य ज्वरस्य प्रतिज्वरमसृजत् । तदपि लीलया । न ज्वरभयात् । उग्राणामसुराणां तमआख्यं क्षयं निवासं प्रददाति नित्यं ददातीति

अजयत् प्रतिज्वरं सृष्ट्वा कथञ्चित् तद्व्यथां विना ।
इत्युग्रपदवाच्यानां दैत्यानां दुष्टचेतसाम् ॥ १७५ ॥

तमोनिवासदो देवो यद्वोग्रो रुद्र उच्यते ।
तदज्ञानतमश्छेत्ता ह्युषाया अधिको वरः ॥ १७६ ॥

अनिरुद्धो हि बाणेन बद्धस्तन्मोक्षदो हरिः ।
मा रमा सा रता यस्मिन् रतमः सोऽभिधीयते ॥ १७७ ॥

विश्वं सर्वमपि क्रीडामात्रमात्मन एव सः ।
प्रकाशयन्नतीता ये वर्तमाना अनागताः ॥ १७८ ॥

विपा हराः प्रजेशाश्च ते कात्स्न्र्येनापि यत्र तत् ।
यद्वाऽधीनं मम सदा मद्विरोधे कथञ्चन ॥ १७९ ॥

गरुत्मद्धरकश्रीभिरत्रातमिति दर्शयन् ।
अजयद् बाणमीशेशः सर्वं तत्प्राणरक्षणात् ॥ १८० ॥

मद्वशत्वेन तैस्त्रातमिति वाऽर्थः स्फुटं भवेत् । ॥ ✻ ॥

तादृशः । तथा उग्रस्य शिवस्य यदज्ञानरूपं तमः तस्य क्षयप्रदो विनाशकः । सर्वेषामसतामुग्रेण तमसाऽज्ञानेन क्षयप्रदो विनाशकृत् । सर्वेषां च सतां उग्रस्य तमस एव विनाशकृत् । रुद्रज्वरेण सृष्टस्योद्धणस्य मोहाख्यस्य तमसः क्षयकृच्च । उषाया गुणाधिकमधिकृतं च वरमनिरुद्धं बाणबन्धान्मोचयन् अधिवरमुक् । रता मा यस्मिन् रतमो रमापतिः । रन्तृतमो वा रतमः । रमणीयतमो वा मायां प्रमायां रतत्वाद् वा । मा वेदवाचो रता अस्मिन्निति वा । 'वाचो मा मातरः' इति स्मरणात् । विश्वं सकलमपि विश्वं जगत् आत्मनः क्रीडामात्रमिति प्रकाशयन् । वयः गरुडाश्च,हराश्च, काश्च ब्रह्माणश्च वायवश्च विहरका अतीता अनागता वर्तमानाश्च । तेषां कात्स्न्र्यं विहरकमात्रम् । तेन सहितं सविहरकमात्रं विश्वम् । स इति भिन्नं वा पदम् । कृत्स्ना विहरका यत्र तद् विहरकमात्रं विश्वम् । अथच विना गरुडेन, हरेण,केन ब्रह्मणा वायुना वा, मया रमया वा

यस्यावेशोरुबलान्-
न्यहनत्पार्थोऽसुरान्प्रजेशोरुबलान्[१] **।**
वरदानादस्यैव
जगत्प्रभोरीरणात्समनुगतनादस्यैव ॥ ४४ ॥

यस्य । आवेशोरुबलात् । न्यहनत् । पार्थः । असुरान् । प्रजेशोरुबलान् ॥ [प्रजेशोरुवरान् ।] वरदानात् । अस्य । एव । जगत्प्रभोः । ईरणात् । समनुगत-नादस्य । एव ॥ ४४ ॥

यस्याऽवेशोरुसामर्थ्यात् प्रजेशोरुवरोद्धतान् ॥ १८१ ॥

निवातकवचाख्यांस्त्रिकोटिसङ्ख्यान् जघान ह ।
पार्थः षष्टिसहस्राणि पौलोमान् कालकेयकान् ॥ १८२ ॥

अत्रातमरक्षितमसति भगवदनुग्रहे । सति तु विहरकमाभिस्रातम् । अनेन पञ्चानामपि कोशानां त्राणमाह । हर इति शरीरपुरुषोऽन्नमयगतः । स एव शेषत्वे छन्दःपुरुषः प्राणमयगतः । विरिति गरुडो वेदपुरुषो मनोमयगतः । को ब्रह्मा संवत्सरपुरुषो विज्ञानमयगतः । मा रमाऽऽनन्दमयगतेति ॥

१२+२०+१२+२४ इति मात्राक्रमः । उपरितने च पद्ये ॥ ४३ ॥

यस्य आवेशेन आत्तोरुसामर्थ्यात् पार्थोऽर्जुनः प्रजापतेः सकाशादवाप्तोरुवरान्, तेन च उरुबलान् निवातकवचाख्यान् त्रिकोटिसङ्ख्यानसुरान् न्यहनत् । तथा तदनुगान् पौलोमान् कालकेयांश्च षष्टिसहस्राणि न्यहनत् । न केवलमावेश-बलात् । अस्य कृष्णस्य जगत्प्रभोर्वरदानादेव यावदहं भूमौ भवामि तावन्नामुं कश्चन जेष्यतीति । तथा तस्यैव प्रेरणात् । बहिर्वरेण अजेयतां ददौ । अन्तराविश्य विजेतुं शक्तिं ददौ । निरन्तरं प्रेरयामास च विजयपथे रथे च सारथीभूय ।

---

१. **'प्रजेशोरुबलात्'** इति हृ.ती.पाठ इति भाति । तदा प्रजेशानामुरुबलान्यत्तीति पार्थविशेषणम् ।

यावद् भूमावहं तावन्नामुं जेष्यति कश्चन ।
इति विष्णोर्वरादेव प्रेरणात् स्वगतस्य च ॥ १८३ ॥

सम्यग्घ्यनुगता यत्र बलभीमजयादयः ।
नादाः स्वयं गतोऽन्यत्र संहर्ताऽरिकुलस्य हि ॥ १८४ ॥

निमित्तमात्रमीशस्य पार्थो ब्रह्मेव सर्जने । ॥ * ॥

यस्यावेशात्सबलः
प्रचकर्षपुरम्प्रसँह्य[१] **वेशात्सबलः ।**
कुरुपतिनामनुयमुना[२]
कृष्टायेनाहुरर्ह्यमतनुयमुना ॥ ४५ ॥

अन्तराविश्य प्रेरणमेव स्फुटयति– समनुगतनादस्यैव । समनुगतः समन्वितः भीमपार्थादिनामरूपः नादः यस्य तादृशस्य । स एव शत्रुभीम इति भीमः । स एवाऽपत्पारावारं पारयति तारयतीति पार्थः । भीमादीन् निमित्तीकृत्य तदन्त-र्गतः स्वयमेव सर्वं करोतीति तस्यैव मुख्यतस्तत्तन्नामता । तद्यथा ब्रह्मा जगत् सृजतीति वदन्ति । का वाचोयुक्तिः । ब्रह्मणि गतः स्वयमेव ब्रह्मनाम्ना सृजति । ब्रह्मा तु निमित्तमात्रं तत्सन्निधानपात्रम् । नदीसमुद्रादिनादा अपि यमुपगायन्ति उदात्तादिस्वरा अपि सङ्गीतमूर्छना अपि किमुत भीमादिनामानीति स्फोरयितुं नादपदमुपादत्त । 'बलभीमपार्थव्याजाह्वयेन हरिणा–' (२.७.३५) इति भागवते । आह च स्वयमेवान्यत्र–'रामोऽखिलानन्दतनुः स एव भीमोऽति पापेषु दुरन्तवीर्यः' इति । अथच समनुगाः सम्यगनुगताः पाण्डवाः । सर्वे च भक्ताः । तत्र तनः विद्यमानः सन् स्वयं च लीलया विषयानत्तीति समनुगत-नादः । समनुगा तनोति यशसा विस्तारयति, तत्कृतां पूजामादत्ते स्वीकरोतीति, अन्ते तानत्ति संहरतीति च समनुगतनादः ॥ ४४ ॥

---

१. **'प्रसह्य चेशात्'** पा.

२. **'यमुना कृष्णा'** इति हृ.ती.पाठ इति भाति । हस्तस्खलनं सम्भाव्यते ।

29-3-2006

यस्य। आवेशात्। सः। बलः। प्रचकर्ष। पुरम्। प्रसह्य। वा। ईशात्। सबलः ॥ [सवरः]॥ कुरुपतिनाम। नु। यमुना। कृष्टा। [आकृष्टा।] येन। आहुः। अर्ह्यम्। अतनु। यम्। उना॥ ४५॥

यस्याऽवेशाद् बलो नागपुरं लाङ्गलमूलतः ॥ १८५॥

प्रचकर्ष प्रसह्याथ[1] तत्पुरेशात् सुयोधनात्।
तत्पुत्रिकावरेणैव[2] सहितः पूजितो ययौ ॥ १८६॥

हस्ती कुरुपतिस्तन्नामैतत्पुरमभून्महत्।
यमुनाऽपि तथा येन लाङ्गलाग्रेण गोकुले ॥ १८७॥

आकृष्टा पूज्यमाहुर्यमुना रुद्रेण वैदिकाः। ॥ * ॥

सः बलरामः। समनुगतनादस्य कृष्णस्य सन्निधानपात्रमिति स्मारयति– स इति। अत एव स्वत एव सबलोऽपि यस्यावेशात् पुनरात्तविशेषबलवानिति सबलः कुरुपतेः हस्तिनः नाम्ना सनाम पुरं हस्तिनपुरं प्रचकर्ष लाङ्गलेन। कथं हस्तिनपुरम्? वर्णलोपेन। हस्तिनः पुरं हस्तिनपरम्। हस्तिनामपुरं हस्तिन-पुरम्। एवं निरुच्य निदर्शयितुमेव कुरुपतिनाम पुरमित्याह। नु इति जिज्ञासुजनमनुनयति– एवं ननु निर्वचनमिति। अर्वाचीनास्तु व्याकरण-भीता अविदन्तः प्राचां प्रयोगसरणिं हस्तिनापुरमिति निगदन्ति। हस्तिनपुर-मित्येव तु प्राचामाचार्याणामैककण्ठ्यम्। अथ च पुरस्य ईशात् दुर्योधनात् प्रसह्य वा प्रसह्यैव, सबलः सवरः। वरेण लक्षणाकमित्रा साम्बेन दुर्योधन-बन्धनान्मोचितेन सहितः। साम्बार्थं वरेण वरणीयेन कन्यारत्नेन सहितो वा। येन च बलेन यमुना कृष्टा नु हलेन नन्दगोकुले विहरता। 'आकृष्टा' इति वा च्छेदः। नुर्निश्चये। किमनेन निश्चीयताम्? परस्परं निश्चीयताम्। इदममुना। अदश्चैतेन। येनाचलं महीखण्डमेवाखण्डमाकृष्यत तस्य यमुनासलिल-कर्षणे का कथन्ता? येन महानदी यमुनैव सलीलमाकृष्यत तस्य प्रतनुपुरकर्षणे

---

१. 'प्रसह्याऽशु' पा. २. 'तत्पुत्रिकां वरेणैव' इति प्र.पाठः प्रामादिकः।

29-3-2006

यद्बलवान्क्रोधवशान्-
निनायनाशंवृकोदरःक्रोधवशान्।
लेभेचान्यागम्यं
स्थानम्पुष्पाणिधामचान्यागम्यम्॥ ४६॥

यद्बलवान्। क्रोधवशात्। निनाय। नाशम्। वृकोदरः। क्रोधवशान्॥ लेभे। अचान्या। [अजान्या।] गम्यम्। स्थानम्। पुष्पाणि। धाम। च। अन्यागम्यम्॥ ४६॥

यस्य विष्णोर्बलात् क्रोधवशान् नाशं वृकोदरः ॥ १८८॥

निनाय क्रोधवशतो ह्यपूर्वकमलेच्छया।
सलक्षपद्मत्रितयसङ्ख्यान् हरवरोद्धतान् ॥ १८९॥

अचान्या कृष्णयोक्तोऽसौ स्वगम्यं नैव चेतरैः।
लेभे स्थानं च पुष्पाणि धाम वैश्रवणस्य च ॥ १९०॥

का कथन्तेति। नन्वयं शिरोधृतभुवनकोशः शेषः। तदेवाऽह–आहुरर्ह्यमतनु यमुना। यं च वेदज्ञाः उना शम्भुना अतनु प्रभूतं यथा तथा अर्हणीयमहीश-माहुः। स्वयं चाऽहान्यत्र–'यत्पादपङ्कजमहासनतामवाप शर्वादिवन्द्यचरणः' इति। यद्यपि महेश एवाहीशो भविष्यति। तेन स्वरूपतः समानौ। पदकृत-माधिक्यं तु भवति। साधनं च किञ्चिदधिकम्। सामीप्यं च भगवतः॥

१२+२०+१२+१९ इति मात्राक्रमः॥ ४५॥

यदनुग्रहबलवान् वृकोदरः क्रोधवशात् क्रोधवशो भूत्वा, क्रोधवशान् नाम असुरान् नाशं निनाय; भगवानेव हि भीमं क्रोधवशं निनाय। क्रोधवशान् नाशं निनाय। अचान्या। अचः न चितः समुच्चितः धर्मादिभिः यथा पाञ्चाली पार्वत्यादिभिरिति अचः केवलोऽनः प्राणो भीमसेनोऽचान उच्यते। तस्येयं

अजो हि भीमो भविता तद्भार्येयमजान्यपि ।
तृतीयोऽतिशये यस्मात् सैवाचानीति कथ्यते ॥ १९१ ॥

अन्यासु देवीमुख्यासु कृष्णा भीमस्य वल्लभा । ॥ ✻ ॥

यद्बलभारवहत्वान्-
नाचलदुरगादिभिस्सुभारवहत्वात् ।
धर्म्मादरिहापिपदम्-
भीमोयेनैवसाहसंलिहापि पदम् ॥ ४७ ॥

यद्बलभारवहत्वात् । न । अचलत् । उरगादिभिः । सुभारवहत्वात् ॥ धर्मात् । अरिहा । अपि । पदम् । भीमः । येन । एव । साहसम् । लिहा ।आपि । पदम् ॥ ४० ॥

यस्य विष्णोर्बलं भारस्तद्वहत्वाद् वृकोदरः ॥ १९२ ॥

नाचलत् पादमात्रं च नहुषेणाऽदिशब्दतः ।
धर्मेण द्रौणिना[१] वाऽपि स्वधर्माच्च न चाचलत् ॥ १९३ ॥

प्रेयसी अचानी । अथच अचानी अजानी । तृतीयोऽतिशये । चस्य जस्तृतीयः । जस्य चः । सतीष्वप्यन्यासु भार्यास्वियमतिवल्लभेत्यतिशयः । तया अजान्या भविष्यतोऽजस्य प्रेयस्या, तत्प्रचोदनया, स्वेन गम्यम्, अन्यैरगम्यं दुर्गमं स्थानमपूर्वकमलालयं लेभे प्राप । तत्र पुष्पाणि चान्यागाम्यानि लेभे । धाम च वैश्र-वणस्य ॥

१२+२०+१२+२० इति समाना च्छन्दोगतिः ॥ ४६ ॥

यस्य कृष्णस्य बलमेव भारः धूः, तद्वहत्वात्, स्वकर्तव्यात् पदमपि नाचलद् भीमः । सुष्ठु भासत इति सुभाः रवः श्रुतिरूपः, तेजस्वि अधीतमित्येतत् । जीवनार्थमप्रयोग एवाधीतस्य तेजस्विता नाम । तादृशो यस्य रवः स

१. '–ण रौद्रिणा वा–' पा.

सुभारवत्वहन्तृत्वरूपात् स हि सुभारवः ।
येनाधीतं सुतेजस्वि जीवनायाप्रयोगतः ॥ १९४ ॥

नहुषस्यापि धर्मस्य हन्तुं कृतमतेः स हि ।
न प्रश्नपरिहारेण ह्यात्ममोक्षं समैच्छत ॥ १९५ ॥

अरिहाऽपि स वै भीमो नाचरत् तद्वधादिकम् ।
हन्तृत्वं चापरो[१] धर्मस्तस्मिन्नेव वृकोदरे ॥ १९६ ॥

नारायणास्त्रपातेऽपि युध्यत्येव यतः परैः ।
[२]नहुषस्थमहाधर्मलिहा प्राप्तमिदं पदम् ॥ १९७ ॥

साहसं त्विति लोकोक्तं येन भीमेन नान्यथा ।
सहसा करणं यद्धि बलाबलमजानता[३] ॥ १९८ ॥

न तद् भीमे यतो वायुः सम्पूर्णबलवेदनः[४] । ॥ ✻ ॥

सुभारवः । हन्तीति हन्ता ह उच्यते । तयोर्भावः सुभारवहत्वं तस्मात् सुभार-वत्वरूपात् हन्तृत्वरूपात् धर्मादपि उरगादिभिः प्राप्तधर्मभङ्गप्रसङ्गोऽपि पद-मपि नाचलत्, स्वयमरिहाऽपि भीमः । उरगादिभिरित्युरगरूपेण नहुषेण, यक्षात्मना धर्मेण, द्रौणिना च । उरगेण धर्मेण च पृष्टोऽपि आत्ममोक्षार्थं प्रश्नपरिहारं नैच्छत् । विद्योपजीवनमधर्मं मन्यमानः । अरिहाऽपि न तौ जघान । न तावरी इति वास्तवं जानन् । अशत्रुशातनमधर्मं मन्यमानः । एवं द्रौणिना नारायणास्त्रमोचनेऽपि नास्त्राय नमश्चकार । आत्ममोक्षार्थं शरण-प्रपदनमधर्मं मन्यमानः । सुभारवो हि सः । अथचास्त्रपातेऽपि घ्नन्नेवारिसेना-मास । हन्तृत्वं स्वधर्मं मन्यमानः । लिहा नहुषस्थधर्मलिप्सुना बद्धवत् स्थितेन येनैव भीमेन लोकोक्तं साहसमिति पदमापि प्राप्तम् । 'अहो भीमेन साहसमा-चरितम् । अहो तस्याविमृश्यकारिता' इति तत्प्रभावमजानन्तो व्याजह्रुरिति ॥

१. 'च परो–' पा. २. 'नहुषस्य महा–' पा.
३ '–मजानताम्' पा. ४. '–बलदेवनः' पा.

नहिनहुषोलन्नहितुं[१]
धर्म्मोद्रौणिस्तथेतरोलन्नहितुम् ।
नोराट्कण्णौब्रह्मवरी
येनध्वस्तोस्त्रमग्रहीत्सुब्रह्मवरी ॥ ४८ ॥

न । हि । नहुषः । अलम् । नहितुम् । धर्मः । द्रौणिः । तथा । इतरः । अलम् । न । हितुम् । नो । राट्कर्णौ । ब्रह्मवरी । येन । ध्वस्तः । अस्त्रम् । अग्रहीत् । सुब्रह्म । वरी । [बली ।]॥ ४८ ॥

तदुपेक्षां विना तं न बद्धुं शक्नोति कुत्रचित् ॥ १९९ ॥

नहुषो वाऽपि धर्मो वा द्रौणिर्वाऽन्योऽपि कश्चन ।
यथेतरो न शक्नोति बद्धुं भीमं तथैव हि ॥ २०० ॥

गृहीतस्तेन तं जेतुं[२] नालमेव लयं विना ।
राजा दुर्योधनस्तेन निहतः ससहोदरः ॥ २०१ ॥

अत्र सुभारवहत्वाद् धर्मादिति भीमपदार्थमेव निरुच्य दर्शयतीव । भृतमो हि भीमः । तदेव हि सुभारवत्वं नाम । अरिभयङ्करो हि भीमः । तदेव हन्तृत्वं नाम ॥

१२+२०+१२+२१ इति मात्रागतिः ॥ ४७ ॥

ननु नहुषेण नद्धः? न नद्धः । नद्ध इवोपेक्षया तस्थावित्याह– नहि नहुषोऽलं नहितुम् । णह बन्धने । नहुषः तदुपेक्षां विना स्वसामर्थ्येन तं नहितुं नद्धुम्, बद्धुमित्येतत्, नालं न समर्थो हि । 'दोषशब्दाश्च विष्णवि' इति प्रयुञ्जानस्य

---

१. 'नह्यतीति नहः । तस्मादाचारार्थे क्विपि तदन्ततात् तुमुनो रूपम्– नहितुमिति । बन्धकवदाचरितुं बद्धुमिति यावत् । तथा हन्तीति हः । घातकः । तत आचारार्थे तुमुन् । तदन्तात् तुमुन् । हितुं हन्तुमिति यावत्' इति वेङ्कटाचार्यटीकायाम् ।

२. **'गृहीतस्तेन तं ज्ञातुम्'**, **'गृहीतुं तेन तं जेतुम्'** पा.

कर्णस्तेनैकहस्तेन जितः पार्थाय शेषितः ।
मागधोऽपि वरोन्मत्तो[१] विधेर्भीमेन पातितः ॥ २०२ ॥

बली द्रौणिर्हि विप्रत्वाज्जितो ब्रह्मास्त्रमग्रहीत् ॥ * ॥

क्षात्रन्धर्म्मंस्ववता
गुरुवृत्त्यैकेशवाज्ञयाचमंस्ववता[२] ।
सर्वंसेहेमनसा
भीमेनेशैकमानिनाहेमनसा ॥ ४९ ॥

क्षात्रम् । धर्मम् । स्ववता । गुरुवृत्त्यै । केशवाज्ञया । च । मम् । स्ववता ॥ सर्वम् । सेहे । मनसा ।[अमनसा ।] भीमेन । ईशैकमानिना । हेमनसा ॥ ४९ ॥

परमवैदिकस्याचार्यस्य नहितुमिति प्रयोगोऽपि परं शोभते । स्वेच्छया नद्धुं नहुषो न समर्थः । किन्तु भगवदिच्छया भीमः स्वेच्छया च बद्ध इव स्थित इत्याशयमाविश्चकार । । नहि धर्मो यक्षरूपः । न द्रौणिः । नेतरः कश्चन । यथेतरः कश्चन प्राकृतस्तं नहितुं नालं तथा नहुषादिरपीति । कम्? अलम्, लयरहितम् । अलं स्वलयं विना वा, न कोऽपि तं हितुम्, हि गतौ । अभिगन्तुं जेतुं वा नालम् । नो राट्कर्णौ, राजा दुर्योधनः, यस्तेन निहतः ससहोदरः, कर्णश्च, यस्तेनैकहस्तेन जित्वा पार्थाय शेषितः, तमभिगन्तुं नो नैव समर्थाविति किम्पुनः? ब्रह्मवरमत्तो मागधोऽपि ध्वस्तः । अपिच देववरा इन्द्रादयोऽप्यस्य सन्ति नियम्यतयेति वरी, अथच वरी बली द्रौणिरपि येन ध्वस्तः विजितः सुब्रह्म अस्त्रमग्रहीत् । यस्य ब्रह्माऽभिमानिदेवता । परं ब्रह्म च ध्येयदेवता । गायत्रत्वाच्च सुब्रह्म ॥

१२+२०+१२+२२ इति मात्राक्रमः ॥ ४८ ॥

---

१. **'–त्तो युद्धे भी–'** पा.

२. **'–केशवाज्ञया च चरमम्'**, **'केशवाज्ञया चरमम्'** इत्यादिपाठान्तरं प्रामादिकम्

भीमेनैव सुशक्तेन क्षात्रं धर्मं सुरक्षता ॥ २०३ ॥

क्षान्तं सर्वमनिष्टं तल्लीनवित्तवता[1] सता ।
मितेरपीतितो वाऽयं म इत्येव प्रयोगतः ॥ २०४ ॥

युधिष्ठिरानुवृत्त्यै च केशवस्याऽज्ञयैव हि ।
मन्यते यद्धरिर्विश्वजन्मस्थित्यादिकं सदा ॥ २०५ ॥

तदेव मन्यते भीम इति हीशैकमानिना ।
हेमरूपो य आकेशादा नखाग्रेभ्य ईश्वरः ॥ २०६ ॥

तन्नासावासितोक्त्या तत्प्राणप्रिय[2] इतीरितः । ॥ * ॥

क्षात्रं धर्मं सुरक्षता भीमेन सर्वमनिष्टं शत्रुकृतं मनसैव सोढम् । नतु देहबलेन प्रतिकृतम् । अमनसा हरिगतमनसा च । हरीच्छयेति वा । मं लीनं यथा भवति तथा स्ववता वित्तवता । 'मितेरपीतेर्वा मकारः' इत्यादिश्रवणात् । सर्वं हि तस्य स्वम् । अथापि द्यूते परैरपहृतमिति लीनमिव । केचित्तु 'लीनचित्तवता' इति टीकापाठं पठित्वा 'अमनसा' इत्यस्येदं व्याख्यानमिति मन्यन्ते–'ए लीनं मनोऽस्य' इति । तत्पक्षे मूले मं इत्येतदनन्वितमिति पाठभ्रान्तिरेवेयम् । किमिति सेहे ? गुरुवृत्त्यै युधिष्ठिरानुवृत्त्यै । तदपि केशवाज्ञयैव । ईशेन केशवेन एकं समानं सदा मन्यत इति ईशैकमानिना । यद्धरिर्मन्यते तदेवायं मन्यत इति । हेम्नः हिरण्यमयस्य भगवतः नसा नासया जातेन नासिकायाः समासान्तो नसादेशः । हेम्नः भगवतः नासा यस्य उत्पत्तिस्थानं वासस्थानं च स हेमनाः । तेन हेमनसा नासिकापर्यायः स्वतन्त्र एव नस्शब्द इत्यन्ये वैयाकरणाः । 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुहिरण्यकेश आप्रणखात् सर्व एव सुवर्णः' इति । 'प्राणाद् वायुरजायत' इति च श्रुतिः । 'ब्राह्मणोऽस्य मुखमासीत्' इतिवदभेदोपदेशः । 'यद् यस्माज्जायते चाङ्गात्' इति च हि

---

१. **'–ल्लीनचित्तवता'** पा. २. **'–त्त्या स प्राणप्रिय–'** पा.

यद्भक्तप्रवरेण
प्रोतस्स्वस्मिन्त्सकीचकःप्रवरेण ।
पतितास्तस्यसहायाः
कृष्णार्थेमानिनस्समस्यसहायाः ॥ ५० ॥

यद्भक्तप्रवरेण । प्रोतः । स्वस्मिन् । सः । कीचकः । प्रवरेण । [प्रबलेन ।] ॥
पतिताः । तस्य । सहायाः । कृष्णार्थे । मानिनः । समस्य । सहायाः ॥ ५० ॥

भीमेन यस्य भक्तेषु प्रवरेण स कीचकः ॥ २०७ ॥

गुदे प्रोतशिरा मृत्युं जगाम प्रबलेन हि ।
तेनैव कीचकाश्चान्ये कृष्णया प्रार्थितेन हि ॥ २०८ ॥

मिळित्वा पातिताः सर्वे दर्पिष्ठस्य सहायतः ।
सहाऽयाताश्च दर्पिष्ठाः– ॥ * ॥

स्मरन्ति । तत्स्थत्वाद् वा तद्व्यपदेशः 'मञ्चाः क्रोशन्ति' इतिवत् । अनेन भीमः कृष्णस्य प्राणवत् प्रिय इति सूचयति । यद्वा ह इति हरिः । 'अकयप्रविसम्भूमसखहा विष्णुवाचकाः' इति स्मरणात् । सर्वत्र हन्ति गच्छतीति हः । हे सर्वगते हरौ मनो यस्य तेन हेमनसा ॥

१२+२१+१२+२० इति मात्राक्रमः ॥ ४९ ॥

कृष्णभक्तप्रवरेण प्रकृष्टः कृष्ण एव वरो यस्मात् तेन अत एव प्रवरेण प्रबलेन च भीमेन स नीचाग्रणीत्वेन प्रथितः कीचकः कृष्णाया अर्थे स्वस्मिन् स्वदेहान्तः प्रोतशिरा मारितः । तस्य मानिनः दृप्तस्य मानिनो दृप्ताः सहायभूताः पक्षपातिनः, सह अयन्त इति सहाऽयाताः सहायाः सहचरा अनुजा उपकीचका अपि समस्य मिलित्वा सहैव कृष्णाया एवार्थे पतिताः कृताः । पातिता इत्येतत् ।

१२+२०+१२+२० इति मात्रागतिः ॥ ५० ॥

यद्भक्त्यानुगृहीतौ
पार्थोभीमश्चगोनृपौनुगृहीतौ[१]।
ऋणमुक्त्यैसुव्यत्यस्त्यै
क्रमशोवीरावमुश्चतांसुव्यत्यस्त्यै ॥ ५१ ॥

यद्भक्त्या । अनुगृहीतौ । पार्थः । भीमः । च । गोनृपौ । नु । गृहीतौ ॥ ऋण-मुक्त्यै । सुव्यत्यस्त्यै । क्रमशः । वीरौ । अमुश्चताम् । सुव्यत्यस्त्यै ॥ ५१ ॥

–ततः पूर्णे तु वत्सरे　　॥ २०९ ॥

यद्भक्त्याऽनुगृहीतौ तु पार्थो भीमो नु गां नृपम्[२]।
अमुश्चतां महावीरौ गृहीतौ सर्वकौरवैः　　॥ २१० ॥

ऋणशेषविमोकाय[३] सुव्यत्यासाय चैतयोः।
स्वामित्वदास्ययोः स्वामिदासयोः पार्थमात्स्ययोः　　॥ २११ ॥

विशेषेण त्वतिक्रम्य सुस्थित्यै चाऽत्मरूपतः।　　॥ * ॥

यद्भक्त्याऽनुगृहीतौ नु । नुर्निश्चये । यद्वा नु अनु कीचकवधानन्तरम् । अज्ञातवासार्थं नियते वत्सरे पूर्णे सति, पार्थभीमौ गोग्रहणे कौरवैर्गृहीतं गोगणं पार्थोऽमोचयत्, विराटं च नृपं भीमोऽमोचयत् इति क्रमशो वीरावमुश्चतां। ननु भीमोऽपि पार्थः? सत्यं योगवृत्त्या । अर्जुने तु योगरूढं पदम् । किं विदुषां रूढिरुताविदुषाम् । उभयेषामपि । कनिष्ठे हि मातुर्महाननुबन्ध इति लोक-रूढिः। तस्मिन् हि भगवतो विशेषावेश इति तमेव पार्थं कथयन्ति विप-श्चितोऽपि । कुरुपाण्डवन्यायेन चेदं भवति । किमित्यमुश्चताम्? ऋणमुक्त्यै । अज्ञातवासाय दत्तावसरेण विराटेन कृतादुपकाररूपादृणान्मुक्त्यै। सुव्यत्यस्त्यै स्वामित्वस्य दासत्वस्य च स्फुटं व्यत्यासाय मात्स्यस्य च पार्थानां च। अज्ञातवासे हि मात्स्यः स्वामी पार्था दासा इवावर्तन्त । सम्प्रति पूर्णे वत्सरे पार्थाः

---

१. **'गोनृपौ निगृहीतौ'** पा.　२. **'पार्थभीमौ तु गोनृपौ'** पा.　३. **'–शेषविमोक्षाय'** पा.

यद्भक्त्यामितयालं
कृष्णाकार्य्येविवेशकृष्णाकार्य्ये।
यामीरार्द्धतनुत्वान्-
नापाद्भीमादृतेपिनापाद्भीमात् ॥ ५२ ॥

यद्भक्त्या। अमितया। [मितया।] अलम्। कृष्णा। कार्ये। विवेश। कृष्णा-कार्ये॥ याम्। ईरार्धतनुत्वात्। न। अपात्। भीमात्। ऋते। अपि। ना। आप। आत्। भीमात्॥ ५२॥

यद्भक्त्याऽमितया कृष्णा कृष्णाह्वानाख्य उत्तमे　　॥ २१२ ॥

कार्ये विवेश या तस्याः किं कर्ता दुःखशासनः।
समीरार्धशरीरत्वाद् यां नाऽपान्योऽपि ना पुमान्　　॥ २१३ ॥

भीमादृतेऽन्यभार्याभिरेकदेहामपि क्वचित्।
अन्यस्यापि शरीरार्धदेहत्वात् तद्गतो मरुत्　　॥ २१४ ॥

तद्भार्यागामगाद् वाणीमित्यकारोदिताद्धरेः।
सकाशाद् वर्तते नित्यं नियमोऽतिभयङ्करात्[१]　　॥ २१५ ॥

न विद्यते पतिर्यस्य तस्मादित्येष निर्णयः　　॥ * ॥

स्वामिनोऽभवन् विराटश्च तद्दास इति। तथा सु+व्यति+अस्त्यै। अज्ञातवेषं व्यतिक्रम्य स्वरूपेण सुस्थित्यै चेति॥

१२+२०+१४+२२ इति मात्रागतिः॥ ५१॥

अमितयाऽलं मितया प्रमितया यद्भक्त्या कृष्णा कृष्ण आकार्यः यस्मिन् तादृशे कृष्णाह्वानरूपे कार्ये विवेश। 'गोविन्द द्वारकावासिन् कृष्ण गोपीजनप्रय' इति। ननु कोऽयं कार्ये प्रवेशो नाम। न प्रवेशः। किन्त्वभिनिवेशः। भक्त्यैव

---

१. **'–मोऽरिभयङ्करात्'** पा.

यांस्प्रष्टुमिच्छन्तमजातशत्रुं
न्यवारयत्स्वस्थमजातशत्रुम्।
शंरूपानेनित्यरतेरियंश्री-
रितिस्म देवेड्यदितेरियंश्रीः ॥ ५३ ॥

याम्। स्प्रष्टुम्। इच्छन्तम्। अजातशत्रुम्। न्यवारयत्। स्वःस्थम्। अजात-शत्रुम्। [अयातशत्रुम्।] ॥ शंरूपाने। नित्यरतेः। इयम्। श्रीः। इति। स्म। देवेट्। यदितेः। इयंश्रीः ॥ ५३ ॥

स्वर्गस्थमपि देवेन्द्रोऽजातशत्रुं न्यवारयत् ॥ २१६ ॥

यां कृष्णां स्प्रष्टुमिच्छन्तमयातोऽन्तररिर्यतः।
शमात्मके रता वायावतः श्रीरत एव सा ॥ २१७ ॥

कृष्णमाजुहाव। ननु दुःशासनो वासांसि मानं च हरेदिति भिया। श्यामलादिभिः सम्पृक्तामपि यां समीरभार्यात्वात् भीमादृते अन्यः कोऽपि युधिष्ठिरादिरपि ना पुमान् नाप। अः पालको यस्य, न विद्यतेऽन्यः पालको यस्य तस्माद् भीमादृते। कुतः? भीमादुग्रात्, अपात् नियामकान्तररहितात्, आत् अकारवाच्याद्धरेः। तन्नियमादिति यावत्। 'भयादस्याग्निस्तपति' इत्यादेः ॥

१२+२०+१२+२० इति च्छन्दोगतिः ॥ ५२ ॥

अत एव द्रौपदीं स्प्रष्टुमिच्छन्तं स्वर्गस्थितमजातशत्रुं युधिष्ठिरं देवेट् सुरपतिः न्यवारयत्। कुतः? अजातशत्रुम्। अकारवाच्यभगवदिच्छया जातकामाख्यशत्रुम्। कामदृष्ट्या स्वभार्येति तां स्प्रष्टुमिच्छन्तम्। अथच अजातो विष्णुजातः कामः शत्रुर्यस्येति वा। अत एवच अयातशत्रुमनपगतान्तःशत्रुम्। किमिति न्यवारयत्? शंरूपे अने प्राणे नित्यं रतत्वात्, शे शतानन्दे रमत इति इयं श्रीरुच्यते शास्त्रेषु तन्मैनां स्प्राक्षीरिति स्म न्यवारयत्। यस्य वायोः इतेः नित्यसंयोगाच्चेयं श्रयते वायुमिति श्रीरुच्यते इति चोक्त्वा न्यवारयत्। अथचेयं

भारती नान्ययोग्या हि यन्नित्युक्तः सदागतिः।
तद्विशेषाभिसंयोगादितीयं संश्रिता परा ॥ २१८ ॥

इच्छया याति यन्मुख्यप्राणस्तस्मादियो मतः।
इच्छा काम इकारोक्त इतीन्द्रोऽवारयन्नृपम् ॥ * ॥ २१९ ॥

मनसामनसामनसामनसा
यमनन्तमजस्रमवेदनुया।
विलयंविलयंविलयंविलयं
निखिलन्त्वशुभम्प्रचकारचयः ॥ ५४ ॥

मनसाम्। अनसा। अमनसा। मनसा। यम्। अनन्तम्। अजस्रम्। अवेत्। अनु। या ॥ विलयम्। [विः। अयम्।] विलयम्। [विरयम्।]विलयम्। विलयम्। निखिलम्। तु। अशुभम्। प्रचकार। च। यः ॥ ५४ ॥

न केवलं श्रीरिति, किन्तु 'इयंश्रीः' इति चोच्यते। कथम्? यदितेः। सदा यातीति यन् सदागतिर्वायुः। तेन इतेः नित्यसम्बन्धात्। किमुक्तं भवति? इरिति इच्छा। इना स्वेच्छया यातीति इयो मुख्यप्राणः। इना कामेन यातीति वा भारतीकमिता प्राण इयः। इयं श्रयत इति 'इयंश्रीः'इति। इयश्रीरिति वक्तव्ये इयंश्रीरित्याह। तेन तमेव श्रयते नित्यं च श्रयत इति सूचयति। 'दीर्घं प्लुतं च हिङ्कारो बिन्दुरप्यवधारणे'इति हि विदो वदन्ति। उपजातिश्छन्दः। इन्द्रवज्रोपेन्द्रवज्रयोः संश्लेषात्। तृतीयपादे प्रथमतगणस्थाने मगणयोजनेन छन्दो विच्छिद्य विच्छित्तिविशेषमादधाति च्छान्दस आचार्यः। तद् यथा भागवते– 'कश्चिद् भद्रेऽनामयमात्मनस्ते विच्छायाऽसि म्लायतो यन्मुखेन' इति। छन्दःसौहित्याय 'शंरूप्यने' इति पठन्तः शोच्याः ॥ ५३ ॥

या श्रीपदगदिता देवी भारती सर्वमनसां तदभिमानिनां गरुडशेषरुद्राणां चानसा शकटवदाश्रयेण, अमनसा, अमोऽमितो नारायणः, तन्नासाश्रयेण

या देवी च सदाऽनन्तं सह सस्मार वायुना।
तस्यानुसारिणी स्वेन मनसा प्राण एव हि ॥ २२० ॥

अनोवदाश्रयः सर्वमनसां शकटो ह्यनः।
मनसामनसा तेन ह्यमोऽनन्तः प्रकीर्तितः ॥ २२१ ॥

तन्नासाघ्रातमूर्धा[1] यस्तेनेत्यमनसा स्वयम्।
विर्विष्णुरशुभं स्मर्तुर्विलयं प्रचकार यः ॥ २२२ ॥

तज्ज्ञातेन, अथच अमितस्य नासा स्वमूर्धानमाजिघ्रती यस्य तेन। प्रीत्या पित्रा नारायणेनाऽघ्रातमूर्धाऽयं वत्सो वायुरिति। नारायणघ्राणेनानुगृहीतेन वा। तदा अमनसेति इत्थम्भूतलक्षणे तृतीया। अथच अमनसा, ब्रह्मण्येव गतमनसा स्वभर्त्रा प्राणेन सह, द्रौपदी भीमेन सह, अनु तमनुसरन्ती, यमनन्तं कृष्णाख्यं अजस्रं मनसाऽवेत् सस्मार। वेदनं हि मानसमेव। तेन मनसेति पुनर्वचनं स्मरणरूपं मननमाह। ध्यानमेव चाजस्रं स्मरणम्। 'अखण्डा ध्यानमुच्यते' इति स्मरणात्। कीदृश इति दध्यौ। विलयम्। वर्णविपर्ययमन्तरेणायमर्थः– योऽन्तः स्मर्तुः निखिलमशुभं विलयं विशिष्य सामस्त्येन लययुक्तं प्रचकार विलाप-यामास। कीदृशमशुभम्? विलयम्। स्वतो विगतलयम्। अनन्तकालं तमः प्रापयत्। अथापि विलयम्, विना विष्णुना तदनुग्रहेण केवलं लयो यस्य तादृशम्। अथच विलयम्, विलमिति बिलम्। तद् यथा अव्रणमब्रणं भवति– 'अकायमब्रणम्'इति। संसाराख्यं नरकाख्यं वा विलं यापयतीति तादृशं निखिलमशुभं विलापयामासेति। सामान्येन अशुभेन भवः,निरन्तरेण निरन्त-रायं तमः,सर्वात्मना तत्प्रहाणेन मोक्ष इति त्रिधा जीवानां गतिरुदिता। एव-मात्मविदां शोकापहो हरिरिति दध्यौ। वर्णव्यत्यासेनापरोऽप्यर्थः प्राचीना-चार्याभिमतः। तदात्वे विः। अयम्। विरयम्। बिलयम्। विलयम्– इति

---

१. 'यत्तेने–' पा.

विशिष्टरयसंयुक्तमखिलं विलयापकम्।
सैवमेव सदा वेत्ति ह्यात्मविच्छोकहा हरिः ॥ ॐ ॥ २२३ ॥

सोगाद्दूतमुखेन
प्रभुणेदंवर्ततेयदूतमुखेन।
पार्त्थार्त्थैबहुतनुतां
यत्रप्राकाशयत्स्वयंसवहुतनुताम्॥ ५५ ॥

सः। अगात्। दूतमुखेन। प्रभुणा। इदम्। वर्तते। यत्। ऊतम्। उखेन॥ पार्थार्थे। बहुतनुताम्। यत्र। प्राकाशयत्। स्वयम्। सवहुतनुताम्॥ ५५॥

अतो दौत्यमुखेनाऽसौ हन्तुमेव कुरूनगात्।
स्वावद्योत्थमतस्तेषां[1] वध्यत्वमिति चाऽनयन्[2] ॥ २२४ ॥
यस्मादूतमभिप्रेतं रक्षितं वा जगत्त्रयम्।
वर्तते प्रभुणा नित्यमुच्चज्ञानेन नान्यथा ॥ २२५ ॥

पदपाठः। तथाचायमर्थः– योऽयं विर्विष्णुः, विरयं अधःपातने विशिष्टरय-युक्तम्, बिलयं निरयाख्यं बिलम्, तमोनैबिड्यमेव समानो धर्मः, यापयतीति तादृशं अशुभं विलयं विनष्टं प्रचकारेति। अहो भगवतः प्रेमातिशयो भक्तेष्विति प्रचकारेत्याह। तुना न केवलमशुभात् तारयति वितरति च शुभं नित्यानन्द-मित्याह। सैश्चतुर्भिस्तोटकम्॥ ५४॥

यं प्राणेन सह भारती मनसाऽवेत्, यश्च स्मर्तुरशुभं विलयं प्रचकार सोऽ-गाद् दूतमुखेन। स हरिः दूतमुखेन भावप्रधानो निर्देशः, दौत्यमुखेन कुरुसभा-मगात्। तदपि न शान्त्यै। किन्तु हन्तुमेव कृतमन्तून् धार्तराष्ट्रान्। तत् कस्मात्?

---

१. **'स्वमध्योत्थमतस्तेषाम्'** इति सर्वत्र पठ्यते। लिपिकृत्प्रमादयोऽयम्। **'स्वावद्योत्थम्'** इति सम्भावितः पाठः।
२. **'चाऽनयत्'** इति क्वचित्। जनानां मनस्यानयन्। **'आणयन्'** इत्यपि स्यात्। ज्ञापयन्नित्यर्थः।

तदा च रक्षितं तेन पार्थार्थे कौरवं कुलम् ।
अनन्ततनुतां तत्र प्राकाशयदमित्रहा ॥ २२६ ॥

अबन्धयोग्यताज्ञस्यै सर्वयज्ञहुतां नुताम् ।
स्वातन्त्र्याखिलकर्तृत्वपूर्वाखिलगुणालयम् ॥ २२७ ॥

अनन्ततनुमात्मानमर्जुनायाप्यदर्शयत् ।
यत्र यत्राप्यगाद् देवः कुरुक्षेत्रं जगत्प्रभुः ॥ * ॥ २२८ ॥

गुरुकर्ण्णनदीजादी-
नवधीच्चक्षुर्बलेनजनदीजादी ।

यत् यस्मात्, उखेन उच्चं खं ज्ञानं यस्य तेन, खं ज्ञानरूपं ब्रह्मेति श्रुतिवचनात्, प्रभुणा कृष्णेन इदं जगत्, सम्प्रतीदं कुरुकुलं ऊतं रक्षितं रक्ष्यतयाऽभिमतं वा वर्तते, तन्मा सुयोधनो विनाशीदिति । तं क्षपयित्वा कुरुकुलं जगच्च रक्षितुमेव जगाम । अहो भगवतः क्षपणेच्छाऽपि रक्षया गर्भिणी भवति । तदपि पार्थार्थे पाण्डवानामर्थे । अथच पार्थार्थे स्वबन्धोद्यमनेन कृतागसां कौरवाणां हनन-जनितं यशः पार्थानापयितुं, तेषामागश्च प्रकटयितुं बहुतनुतामनन्तरूपतां पूर्ण-रूपतां वा प्राकाशयत् । तदपि रूपं स्वतन्त्रं स्वरूपभूतं चेति स्वयम् । न मायामयम् । तनोति करोतीति तनुः तस्या भावस्तनुता । बहुविधस्य जगतः, बहुविधा वा तनुता कर्त्तृत्वशक्तिः विस्तरणशक्तिर्वा यस्यास्तादृशीं स्वातन्त्र्याखिलकर्तृत्वपूर्वसर्वगुणालयं बहुतनुतां प्राकाशयत् । न केवलं विश्वरूपः । विश्वनामा चायमित्याह– सवहुतनुताम् । सवैः सर्वयज्ञैः सर्वेषु वा सवेषु सर्वैरपीन्द्रादिनामभिर्हुता चाऽहूता च नुता स्तुता च या तादृशीं बहुतनुताम् । यत्र यदा कुरुक्षेत्रं सोऽगात् सारथ्यमुखेन तदा पार्थार्थे अर्जुनार्थे बहुतनुतां प्राकाशयदित्यहो भगवत्तनुरिव विश्वरूपा भगवत्पादस्य वाचोयुक्तिः ॥

१२+२०+१२+२१ इति मात्राक्रमः ॥ ५५ ॥

29-3-2006

शक्त्यानिजयापरवान्
स्वजनानुद्रेचयन्ननन्तयापरवान् ॥ ५६ ॥

गुरुकर्णनदीजादीन् । अवधीत् । चक्षुर्बलेन । जनदीजादी ॥ शक्त्या । निजया । परवान् । स्वजनान् । उद्रेचयन् । अनन्तया । अपरवान् ॥ ५६ ॥

स भीष्मद्रोणकर्णादीन् दृष्ट्वैव न्यहनद्धरिः ।
जनदीजो विरिञ्चोऽपं जायमानः श्रियः सुतः ॥ २२९ ॥

जनिताऽसौ महति यज्जनयन् वा जनान् यतः ।[1]
नृहरिर्जनदीजादी तमप्यन्तेऽत्ति यः स हि ॥ २३० ॥

द्रोणकर्णभीष्मादीन् दृष्ट्वैव जघान । उक्तं हि भगवतैव 'मयैवैते निहताः पूर्वमेव' इति । 'परसैनिकायुरक्ष्णा......(१.९.४२) इति च भागवते । यो जनदीजादी । जनन् जायमानः ईजः श्रियः सुतः सन् जात इति जनदीजो विरिञ्चः । जीवजातं जनन् जनयन्निति वा । जनयन् जनन् भवति यथा जनयिता जनिता भवति च्छन्दसि । जीवजातस्रष्टा लक्ष्मीजात इति जन-दीजः । 'अहं सुवे पितरमस्य मूर्धन्' इति हि श्रुतिः । तमप्यत्ति संहरतीति जनदीजादी नृसिंहात्मा । 'यस्य ब्रह्म च क्षत्रं चोभे भवति ओदनः' । ब्रह्म च क्षत्रं चेति ब्रह्मवायू ब्रह्मक्षत्रमानिनौ । तस्य द्रोणभीष्मादिहननं कियन्मात्रम् । अनन्तया निजया शक्त्या स्वजनान् पाण्डवान् ब्रह्मादींश्च उद्रेचयन् वर्धयन्, स्वजन-विरोधिभिः कौरवादिभिः दैत्यदानवादिभिश्च परवान् शत्रुमान् । यतः परवान् भक्तवशंवदः । वस्तुतस्तु तस्य परः शत्रुः कोऽपि नास्तीत्यपरवान् । 'न मे

१. अत्र महान् पाठभेदः–**'जनिता सोम इति यत्'** इति क्वचित् । द्वितीयचरणेऽपि–**'जनयित्र्यां जनन् यतः'** इति क्वचित् पठ्यते । उपलब्धाः सर्वेऽपि पाठा नातीव सङ्गताः । एवं मूलपाठः स्यादिति भाति– **'जनिता सोम इतिवत् जनयन् वा जनन् यतः'** इति । अयमर्थः– जनयन् वा यकारलोपेन जनन्नुच्यते । 'जनिता सोमः' इति-वत् । तद्यथा जनयिता सोम इति वक्तव्ये जनिता सोम इत्या-मनन्ति । तथाहि श्रुतिः– 'सोमः पवते जनिता मतीनाम्' [ऋ.सं.९.९६.५] इति ।

स्वजनान् वर्धयन् देवः शत्रुमांस्तद्विरोधिभिः ।
स्वतस्त्वपरवान्नित्यं निरनिष्ट इति श्रुतिः ॥ २३१ ॥

निजयाऽनन्तया शक्त्या वर्धयन् स्वजनं हरिः ।
स्वत उत्तमहीनोऽसौ स्वतस्त्वपरवान् प्रभुः ॥ * ॥ २३२ ॥

यस्यसुनीत[२]सहायान्-
नरिपून्मेनेर्ज्जुनस्समेतसहायान् ।
अकरोच्चासुपरासु-
प्रततिंसेनासुधावनासुपरासु ॥ ५७ ॥

१

यस्य । सुनीतसहायात् । न । रिपून् । मेने । अर्जुनः । समेतसहाः । यान् ॥ अकरोत् । च । आसु । परासुप्रततिम् । सेनासु । धावनासुपरासु ॥ ५७ ॥

यस्य सारथ्यबलतो यस्य न्यायबलादपि ।
समेतान् सहमानो यान् गच्छन् मेने रिपून्न हि ॥ २३३ ॥
अकरोच्चासु सेनासु गतासूनां ततिं च यः ।
धावनेनासुतात्पर्यं यासु सेनासु वै नृणाम् ॥ * ॥ २३४ ॥

द्वेष्योऽस्ति न प्रियः’ इति स्वयमेवाऽह हि । अथच पर उत्तमः तद्वान् न भवतीत्यपरवान् । अथाप्यपरं स्वतोऽवरं यत् तद्वान् भवतीति चापरवान् । ‘यस्मात् परं नापरमस्ति किञ्चित्’ इति श्रुतेः । १२+२०+१२+२० इति मात्रागतिराऽष्टापञ्चाशतम् ॥ ५६ ॥

यस्य सुनीतं सारथ्यं तस्य सहायात्, सुनीतिसहायाच्च, समेतानपि समूह्याऽ-गतानपि असहायः सहत इति समेतसहाः, यातीति यान् शत्रूनभिगच्छन् अर्जुनः न रिपून् बहुमेने । शत्रुभिरनभिभाव्यत्वं सहः । षह मर्षणे । आसु च पुरः-स्थितासु अरिसेनासु धावनेन असुपरासु प्राणरक्षणपरासु परासूनां गतासूनां प्रततिं चाकरोत् ॥ ५७ ॥

---

२. **‘सुनीतिसहा–’** पा.

येनजयद्रथमारः
पार्थश्शत्रूनवापतद्रथमारः ।
यद्विरहादपिदेहे
सरथश्शश्वत्स्थितेस्सदादपिदेहे ॥ ५८ ॥

येन । जयद्रथमारः । पार्थः । शत्रून् । अवापतत् । रथमारः ॥ यद्विरहात् । अपि । देहे । सः । रथः । शश्वत् । स्थितेः । सदात् । अपि । देहे ॥ ५८ ॥

जयन्तो हि रथा येषां ते सर्वे हि जयद्रथाः ।
अथवा सिन्धुराजोऽसौ जयद्रथ इतीरितः ॥ २३५ ॥

मारयन्नर्जुनस्तान् हि येन शत्रूनवापतत् ।
येन सारथिना चैव रमते रथशोभया ॥ २३६ ॥

हर्यधीनजयः सोऽयं दग्धो यद्विरहाद् रथः ।
यत्स्थितेर्देहगोऽप्येष जीवोऽत्ता सुखदुःखयोः ॥ * ॥ २३७ ॥

यद्भरितोभरताभः
प्रभुरम्भाभावितोभिभरताभः ।

जयन्तो रथा येषां ते प्रतिपक्षमहारथाः । जयद्रथश्च सिन्धुराजः । तांश्च तं च मारयामासेति जयद्रथमारः पार्थः येन हरिणा शत्रून् अवापतत् अभिजगाम । येन च रथमारः आरुढकृष्णस्य रथस्य मा शोभा तया रमत इति । युद्धरङ्ग-गतानां रथानां मध्येऽयमेव विशिष्य बभाविति । यस्य विरहात्, यस्मिन् रथादवरूढे सति, सोऽर्जुनरथोऽपि देहे अदह्यत । अत्र देहे शरीरेऽपि यस्य शश्वत् स्थितेः जीवः सदात् । सदा सुखदुःखयोरत्ता । देहे सन् वसन् आ अत्तीति वा ॥ ५८ ॥

येन भरितो भीमो भरताभः । प्रकृत्यन्तस्य जगतो भरणाद् भरतो नारा-यणः । तद्वदाभाति तत्सन्निधानातिशयादित्यधिकदृष्टान्तः । अथच भरतो

भीमोरभसाभिभवी
प्रसभम्भाभाभिभूर्भसाभिभवी[1] ॥ ५९ ॥

यद्भरितः । भरताभः । प्रभुः । अम्भाभावितः । अभिभरताभः ॥ भीमः । र-भसा । अभिभवी । प्रसभम् । भाभाभिभूः । भसा । भिभवी [साभिभवी] ॥ ५९ ॥

भरतो हरिरेवैकः [2]प्रकृत्यन्तविधारणात् ।
भरितस्तेन हरिणा भाति तद्वद् वृकोदरः ॥ २३८ ॥

अथवा भरतः प्राणः स एव ह्यवतारगः ।
तद्वदाभाति भीमोऽयं सङ्ग्रामादौ महाबलः ॥ २३९ ॥

अथवा भरतो राजा वासुदेवपदाश्रयः ।
तद्वद् भीमोऽथवा तं च तद्वंश्यान् भासयेत् प्रभुः ॥ २४० ॥

अं बिभर्ति यतो नित्यमम्भ्रिण्यम्भेति कीर्तिता ।
तया यः पोषितः सोऽयमम्भाभावित ईरितः ॥ २४१ ॥

वायुः । 'वायुर्वाव भरतः' इति श्रवणात् । स्वमूलरूपवदेवावतारेऽप्याभातीति भरताभ इति साम्यदृष्टान्तः । अथच भरतो दौष्यन्तिः भे भगवति रत इत्यन्वर्थनामा परमवैष्णवः, येनायं वंशो भरतवंशो बभूव । तद्वदाभातीति चोनदृष्टान्तः । तदुक्तम्– 'दृष्टान्ता ऊनसाम्याधिकाः' इति भागवततात्पर्ये । अथच भरतान् तद्वंश्यान् भरतमेव वा आ समन्ताद् भासयति स्वपौरुषेणेति भरताभः । प्रभवतीति प्रभुः समर्थः । अं बिभर्तीति अम्भ्रिणी अम्भा जगन्माता । तया सम्भावितः रक्षितः पोषितश्च । अभितो ये भरतास्तेष्वयमेक एव आ समन्ताद् भातीत्यभिभरताभः । अभितो येषु नक्षत्रेषु रतस्तारापतिश्चन्द्रः तद्वदाभाति वा । रभसा वेगेन प्रसभं प्रसह्य भसा भासा स्वतेजसा शत्रूनभिभवतीति

---

१. '–भूर्भासाभिभवी' पा. २. 'स्वतोऽत्यन्त–' पा.

अभितो भरता ये हि सङ्ग्रामेषु परस्परम् ।
समन्ताद् भाति तेष्वेको भीमसेनो महाबलः ॥ २४२ ॥

रभसाऽभिभवत्येष [1]प्रसह्यारीन् स्वतेजसा ।
भारूपः सर्वतोऽन्येषां भारूपाणां समाश्रयः ॥ २४३ ॥

भमृक्षं भी शशी रुद्रो भवस्तद्वान् वृकोदरः ।
भिभवौ चन्द्ररुद्रौ यदभिमन्युघटोत्कचौ ॥ * ॥ २४४ ॥

यदनुग्रहिपूर्णत्वाद्
भीमस्सर्वानरीननहिपूर्णत्वात् ।

अभिभवी । सुमनस्शब्दवदयं भस्शब्दः । तेन भसेति भवति । भाभाभिभूः । स्वयं भातीति भः भारूपः । आ समन्तात् तस्य परितः ये भान्ति स्वपुरुषकाराविष्कारेण स्वपक्षीयास्त आभाः । तेषामभिभूः समाश्रयः । भश्च आभाभिभूश्च भाभाभिभूः । भाभानि नक्षत्रवदाभान्ति अन्यक्षत्राणि, भान्ति न भान्ति वा, तेषामयं सूर्य इवाभिभूरभिभावकः, चन्द्र इवाभिभूराश्रय इति वा । तानयमभिभवति जयतीति वा । अथ भिभवी । भानि नक्षत्राणि । भी नक्षत्रेशः शशी । भवः शिवः । भिभवौ दुष्टसंहारेऽस्याङ्गभूतौ स्त इति भिभवी । अभिमन्युगतः शशी । घटोत्कचे भवः । 'भसाभिभवी' इत्येकं वा पदम् । शत्रून् विजयमानो भातीति भः । अभिभवेन सहिताः साभिभवाः अस्म शत्रवः । तादृशशत्रुमानयं साभिभवी । भश्चासौ साभिभवी चेति । आद्यवर्गत्रयाक्षरवर्जितमिदं पद्यम् । चतुर्भिर्वर्गाक्षरैस्तपभमैः, चतुर्भिश्च व्यापकाक्षरैर्यरवसैः । तेन चत्वारिंशदक्षरमप्यष्टाक्षरम् ॥

१२+१८+१२+१८ इत्यार्यागतिः ॥ ५९ ॥

---

१. 'प्रज्ञयाऽरीन्' इति क्वचित् । तदा 'भसा' इत्यस्यैवार्थान्तरमेतत् ।

अदहद्बाहुबलेन
क्रोधाग्नावाहितान्निजाहुबलेन ॥ ६० ॥

यदनुग्रहिपूर्णत्वात् । भीमः । सर्वान् । अरीन् । अनहिपूः । नत्वा । अत् ॥ अद-हत् । बाहुबलेन । क्रोधाग्नौ । आहितान् । [आहुतान् ।] निजाहुबलेन । [निजाहुवरेण ।] ॥ ६० ॥

यदनुग्रहपात्रेषु सम्पूर्णत्वाद् वृकोदरः ।
क्रोधाग्नाविति मन्व्यग्नौ नृसिंहाग्नावरीन् बहून् ॥ २४५ ॥

अदहद् बाहुबलत आहितानाहुतानिति ।
तृतीयोऽतिशये यस्माद्धोमोऽयं सर्वतो वरः ॥ २४६ ॥

निजाह्वानवरेणेति मन्युसूक्तेन सूक्तवित् ।
एतावता न भीमस्य कामाद्यान्तरवैरिणः ॥ २४७ ॥

यस्मादनहिपूरेष जीवन्मुक्तान् पुनाति हि ।
कुतः कामादयो दोषा नत्वाऽत्तुर्विष्णवेऽखिलम् ॥ २४८ ॥

यदनुग्रहिषु यस्यानुग्रहपात्रेषु पूर्णत्वात्, सर्वाधिकानुग्रहपात्रत्वात् भीमः बाहुबलेन क्रोधाग्नौ क्रोधावतारे मन्युसूक्तप्रतिपाद्ये नृसिंहाग्नौ आहितान् अर्पितान्, अपिच आहितान्, तृतीयोऽतिशये, सम्यगाहुतान् सर्वानरीनदहत् । नन्वाहुतिराहवेषु समन्त्रं दीयते । सत्यम् । अत्रापि समन्त्रमेवाजुहाव । केन मन्त्रेण? निजाहुबलेन । निजाह्वानवरेण । 'यस्ते मन्यो' इत्यादिना मन्यु-सूक्तात्मकेन । निजाह्वानरूपं सूक्तमेव बलं तेन वा निजाहुमन्त्रबलेन । निजा-हुमन्त्रस्य बलेन वा । न कामक्रोधादिबलेन । कुतः? यतोऽयं अनहिपूः नत्वा अत् । असमानपदेऽपि नस्य णो भवति । तद्यथा– 'कर्म णो ह्यपि बोद्धव्यम्' इति । 'सुरभि णो मखा करत्' इति च । नहो बन्धः । णह बन्धने । विधि-निषेधाभ्यामनहिनः अनद्धा जीवन्मुक्ताः । तानप्ययं पुनातीत्यनहिपूः । स

न मे मदादिकं किञ्च किन्त्वेतद्विष्णवेऽखिलम् ।
इत्येष हि नमस्कारस्तस्यान्तररयः कुतः ॥ २४९ ॥

शत्रून् जयन् श्रियं चैव तत्प्राप्तं राज्यमेव च ।
यः समर्पयतीशस्य विहितं विष्णुना सदा ॥ * ॥ २५० ॥

कृष्णाभीमाप्ततमः
शीर्णंर्येनस्वकीयहृदयमाप्ततमः ।
धृतराष्ट्रसुतानवधीद्-
भीमेनस्थापितोमनसिसुसुतानवधीत् ॥ ६१ ॥

कृष्णाभीमाप्ततमः । शीर्णम् । येन । स्वकीयहृदयम् । आप्ततमः ॥ धृतराष्ट्र-सुतान् । अवधीत् । भीमेन । स्थापितः । मनसि । सुसुतान् । अवधीत् ॥ ६१ ॥

द्रौपदीभीमयोः स्वाप्तः[1] स्वभृत्यानां मनोगतम् ।
येनाज्ञानतमः शीर्णं मनसि स्थापितोऽपि यः ॥ २५१ ॥

भीमसेनेन तेनैव निमित्तेनावधीत् खलान् ।
धृतराष्ट्रसुतान् सम्यङ्निष्पिष्टानेव सोमवत् ॥ २५२ ॥

स्वयं कथं कामादिना कलुषतामेति । अपिच भगवन्तं नत्वा शत्रूनत्तीति अत् । न ममेति भगवदर्पणबुद्ध्या सञ्जहार । तदेव किल नमनं नाम ॥

१२+२०+१२+२० इति मात्रागतिः ॥ ६० ॥

कृष्णाभीमयोराप्ततमः कृष्णः, येन स्वकीयानां हृदयमाप्तं प्राप्तं तमोऽ-ज्ञानं शीर्णं नाशितम्, स एव भीमेन मनसि स्थापितो भीमेनैव निमित्तेन धृत-राष्ट्रसुतानवधीत्, सुसुतान् सोमवत् सम्यङ् निष्पिष्टान् । तथाचास्मिन्नध्वरे नृसिंह इष्टदेवता, मन्युसूक्तमेवेश्टमन्त्रः, धृताष्ट्रसुतानां शोणितमेव सोम इति भावः । किमित्यवधीत्? यतोऽयमवधीत् । अवधिं लोकमर्यादां इन्धयति

---

१. '–योश्चाऽप्तः' पा.

अवधेरिन्धनाद्विष्णुरवधीदिति कथ्यते ।
रक्षत्ययं सुमर्यादां तत्कण्टकवधेन हि ॥ ✻ ॥ २५३ ॥

भीमविपाटितदेहा-
नदर्शयत्स्वानरीन्विपाटितदेहान् ।
कृष्णायाहितकारी
सम्यग्घीरप्रियस्सदाहितकारी ॥ ६२ ॥

भीमविपाटितदेहान् । अदर्शयत् । स्वान् । अरीन् । विपाटितदेहान् ॥ कृष्णायाः । हितकारी । सम्यग् । हि । ईरप्रियः । सदा । अहितकाली । [सदा-हितकारी ।]॥ ६२ ॥

भीमेन पाटिता देहा येषां वै बहुधा रणे ।
यद्धस्तपादचेष्टाश्च विपानामटितप्रदाः ॥ २५४ ॥
तान् स्वारीन् दर्शयामास कृष्णायै तद्धिते रतः ।
सम्यङ्मरुत्प्रियो विष्णुः सदा तद्वैरिमर्दनः ॥ २५५ ॥

कल संहरणे चेति धातुर्विद्रावणे तथा ॥ ✻ ॥

कण्टकोद्धरणेनेत्यवधीत् । लोकरक्षार्थमेव लोककण्टकानां वध इति । ञि इन्धी दीप्तौ ॥

१२+२१+१२+२२ इति मात्रागतिः ॥ ६१ ॥

भीमेन विपाटितदेहान्, स्वीयानां पाण्डवानामरित्वेन स्वानरीन्, भगवतः सर्वमेव हि स्वम् । कृष्णायाः स्वानरीनिति वा । कृष्णाया अदर्शयत् कृष्णः । कीदृशान् विपाटितदेहान् ? विपाटितदेहान् विपैः गृध्रादिभिः पक्षिभि-रितस्ततोऽटिता देहा येषां तान् । अथच विपानां बृहतां श्येनादीनां विष्कि-राणां मांसस्य चिरचिखादिषया पतितकायोपरि निपत्य निषण्णानां अटितदा इतस्तत उत्पतनप्रदा ईहा अङ्गचेष्टा येषां तान् । मरिष्यमाणास्ते तां यातनां

अथहरिणापीतबलं
द्रौणेरस्त्रम्महारिणापीतबलम् ।
दधतावासोमरणं
नीतश्चक्रेभिमन्युजंसोमरणम् ॥ ६३ ॥

अथ । हरिणा । पीतबलम् । [अपीतबलम् ।] द्रौणेः । अस्त्रम् । महारिणा । अपि । इतबलम् ॥ दधता । अवासोमरणम् । [वासोऽमरणम् ।] नीतम् । चक्रे । अभिमन्युजम् । सोमरणम् ॥ ६३ ॥

हरिणा दधता धृत्वा पुष्णतेदं महारिणा ॥ २५६ ॥

महान्तोऽरा हि यस्य स्युः महारं तत् सुदर्शनम् ।
तद्वता लीनसामर्थ्यमपि प्राप्तबलं स्वतः ॥ २५७ ॥

सोढुमप्रभवन्तः शीर्णं हस्तपादमितस्ततः कृच्छ्रेण विचिक्षिपुः । तदा तत्र निषण्णाः सञ्जातविक्षेपाः पक्षिणस्तत उत्प्लुत्योत्प्लुत्य पुनरागत्य खादितुमारेभिर इति । कृष्णाभीमयोराप्ततम इत्युक्तं स्मारयति– कृष्णायाः सम्यक् हितकारी, ईरस्य च भीमस्य सम्यक् प्रियो हि सः । अत एव अहित-कारी अहितकाली कृष्णाभीमयोरहितान् सदा कालयति संहरति विद्रावयति वेति । कल संहरणे । कल विद्रावणे । सर्वेषां सतां आ समन्तात् हितकारी च ॥

१२+२०+१२+२० इति मात्रागतिः । उत्तरयोश्च पद्ययोः ॥ ६२ ॥

अथ पाण्डवराज्यलाभानन्तरं स्वतः इतबलं प्राप्तबलमपि द्रौणेरस्त्रं द्रौणि-प्रयुक्तं ब्रह्मास्त्रं हरिणा पीतबलं नीतबलम् । अपीतबलं वा । अपगतबलम्, लीनसामर्थ्यम् । कीदृशेन हरिणा? महारिणा । महारं सुदर्शनम्, यस्य महान्तोऽ-राः । येन तदुद्धरणे प्रयत्यापि न शशाक द्रौणिः । महारवता महारिणा चक्रिणा । उक्तं च 'जुगोप कुक्षिङ्गत आत्तचक्रः' इति । किमिति चक्रमादत्त? दधता सम्प्रति पाण्डवकुलं सदा जगच्च धारयता धृत्वा च पुष्णता । डुधाञ्

द्रौण्यस्त्रं विष्णुरातं तद्वासस्यमरणं बहिः ।
नीतं प्रसूतितश्चक्रे सोमस्य रणगं मृगैः[1] ॥ २५८ ॥

सोमो रुद्रः स हि द्रौणिरुल्बं वास इति श्रुतिः । ॥ * ॥

तस्यचरक्षासुकृता
जनार्द्दनेनेशशेषकेक्षासुकृता ।
पार्त्थेषुप्रेमवता
नित्यम्भर्त्रासुतासुविप्रेमवता ॥ ६४ ॥

तस्य । च । रक्षा । सुकृता । जनार्द्दनेन । ईशशेषकेक्षासुकृता ॥ पार्त्थेषु । प्रेम-वता । नित्यम् । भर्त्रा । असुतासुविप्रेम् । अवता ॥ ६४ ॥

तस्य रक्षा मृतस्यापि सुकृता चक्रपाणिना ॥ २५९ ॥

धारणपोषणयोः । अत एव अस्त्रपातेऽपि न जातं वाससि उल्बे मरणं यस्य तादृशमवासोमरणं अभिमन्युजं परीक्षितं गर्भाद् बहिर्नीतं चक्रे । वाससि अमरणं मरणरहितमिति वा । अत एव यं विष्णुरातं वदन्ति । वस्ते आच्छादयतीत्युल्बं वास उच्यते । 'उल्वं(ल्बं?) वासः प्रोर्णुते तस्माद् गर्भो जायते' (६.५.३) इति तैत्तिरीयसंहितायाम् ॥

कीदृशम्? अवासोमरणमपि सोमरणम् । उमया सहितः सोमो रुद्रः । रुद्रो हि द्रौणिः । तस्यायं कुरुसन्ताने ब्रह्मास्त्रप्रयोगरूपो रणः यस्मात् हेतोः स सोम-रण इति तादृशम् ॥ ६३ ॥

तस्य च प्रसूतिकाले मृतस्यापि परीक्षितः पुनरुज्जीवनेन रक्षा सुष्ठु कृता जनार्द्दनेन । यो जननमर्दयति स परीक्षिते जननं ददाविति भगवतो लीला-मुल्लाघयति । सुकृतलभ्या चेदृशी रक्षेत्याह– सुकृतेति । ईशः शेषः को ब्रह्मा चेति ईशशेषकाः । वायुश्च कः । द्वौ हर्तारौ द्वौ जनयितारौ । तेषामीक्षया

१. सवत्रैवमेव पाठ उपलभ्यते । अर्थस्तु न स्फुटः ।

ईशः शेषश्च जगतो हर्तारौ जनिकृच्च कः ।
तज्जीवनकृता सम्यगीक्षयैव महात्मनाम् ॥ २६० ॥

पाण्डवानां प्रियेणैव भर्त्रा तेषां च सर्वदा ।
असुता असवो येषामदान्तास्तेऽसुतासवः ॥ २६१ ॥

तथाविधा हि विप्रा ये तेषामीः श्रीरुदाहृता ।
अस्त्रशापादिरूपा या तामप्यंशेन रक्षता ॥ * ॥ २६२ ॥

ज्ञानम्परमम्प्रादाद्
भीष्मगतस्सृतिविमोक्षचरमम्प्रादात् ।
पाण्डुसुतानामधिकं
चक्रेवेदङ्गुणोत्तरंस्वनामधिकम् ॥ ६५ ॥

ज्ञानम् । परमम् । प्रादात् । भीष्मगतः । सृतिविमोक्षचरमम् । प्रादात् ॥ पाण्डु-सुतानाम् । अधिकम् । चक्रे । वेदम् । गुणोत्तरम् । स्वनामधिकम् ॥ ६५ ॥

कटाक्षमात्रेण असुकृता जीवनप्रदेन । तेन परीक्षिदरक्षीति किमत्र चित्रम् । सत्यं न चित्रमेतत् । कारणं तु जिज्ञासामहे? किमित्यरक्षि ब्रह्मास्त्रस्यापि बलमपनीय? पार्त्थेषु प्रेमवता पार्थतन्तुरयमिति । नित्यं भर्त्रा पार्थानाम्, पार्थसन्ततेस्तेन च जगतः । ननु गर्भे रक्षा कृता । प्रसूत्यनन्तरं च पुनरुज्जीवनेन । अन्तरा किमिति मृतस्य जननम्? प्रसूतिकालेऽपि किमिति न रक्षा कृता? आह– असुतासुविप्राणां ईं अवता । असुतासवः अजितेन्द्रिया अदान्ता विप्राः । तेषां ईं तपःश्रियमवता अंशेन रक्षता । अयमर्थः । यद्यपि द्रौणिः कामक्रोधवशं गत इति तदात्वेऽदान्त आसीत् । अथापि वस्तुतो विदिततत्वो विप्र इति मृतस्य शिशोर्जननेन तस्य तपःसम्पदंशतो रक्षिता भगवता । तेनास्त्रमर्यादाऽपि रक्षिता । परीक्षिदपि रक्षितः । पुनरुज्जीवनेन सत्यसङ्कल्पता च स्वस्य प्रकट्यकारीति ॥ ६४ ॥

प्रकृष्टं राज्यं पाण्डवानां ये न किलादुस्ते प्रादाः कौरवास्तेषामत्ता संहर्ता प्रादात् कृष्णो भीमगतः । स एव भीष्मगतः पाण्डुसुतानां सृतिविमोक्षचरमं

पाण्डवेयं प्रकृष्टं यद् राज्यं नो ददति स्म ते ।
प्रादास्तेषां स्वयं ह्यत्ता प्रादात् तस्माज्जनार्दनः ॥ २६३ ॥

ज्ञानं च परमं मोक्षधर्मान्तविषयं हरिः ।
साधनं च विमोक्षस्य सम्पूर्णं भीष्मगो ह्यदात् ॥ २६४ ॥

पाण्डवानां च तेनैव वेदं तेषां स्वनामधिम् ।
स्वगुणख्यापकं[२] चक्रे ह्यन्येभ्योऽतिशयेन च ॥ २६५ ॥

अब्धिवन्नामधिर्नाम स्वार्थे कप्रत्ययः स्मृतः । ॥ * ॥

तेनावापिसुजातै-
र्हरिमेध[२]स्तुरगवर्त्तनेपिसुजातैः ।
पाण्डुसुतैस्सवसूकै-
राप्तैर्व्यासात्मनाचसुसवसूकैः ॥ ६६ ॥

मोक्षधर्मान्तं मोक्षाख्यचरमफलसाधनं च परमं ज्ञानं परविद्याख्यं प्रादात् । तेन तेषां वेदं इतरज्ञानिभ्योऽधिकं भगवद्गुणैरुन्नतं भगवद्गुणकथनेनोत्तमम्, अधिकं यथा भवति तथा गुणोन्नतं वा, प्रत्यक्षरं भगवन्नामत्वेन स्वनाम्नां निधिः स्वनामधिः, उदधिरिति यथा । स्वार्थे कः । तादृशं स्वनामधिकं चक्रे । सर्व-वेदपदानामक्षराणां च स्वनामत्वात् । तदुपदेशं श्रुत्वा वेदानां भगवदेकपरत्वं भगवन्नामत्वं चेतरेभ्योऽतिशयेन गाढं बाढं च व्यज्ञासिषुरिति । 'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि पठितानि न संशयः' इति पौराणं वचः ॥

१२+२०+१२+२१ इति मात्रागतिः ॥ ६५ ॥

तेन कृष्णेन व्यासात्मना तत्प्रसाददेव पाण्डुसुतैर्हरिमेधोऽश्वमेधोऽवापि समाप्तः । कीदृशैः ? सुजातैः सुकृतमयजन्मभिः । अश्वमेधाङ्गतयाऽवन्यां अश्व-

२. '–ख्यापनम्' पा. २. '–र्हयमेध–' पा.

तेन । अवापि । सुजातैः । हरिमेधः । तुरगवर्तने । अपि । सुजातैः [सुयातैः ।] ॥ पाण्डुसुतैः । सवसूकैः । आप्तैः । व्यासात्मना । च । सुसवसूकैः ॥ ६६ ॥

तत्प्रसादेन सम्प्राप्तो ह्यश्वमेधः सुजन्मभिः ॥ २६६ ॥

सुन्दरैर्वा सुपूर्णाङ्गैर्महायुद्धेषु पाण्डवैः ।
सुष्ठु यातैरवन्यामप्यश्वस्य परिवर्तने ॥ २६७ ॥

रुद्रदेहस्थितो विष्णुरुकः परशुभृद् विभुः ।
सवसुश्च स वै देवो यज्ञोच्छिष्टधनाधिपः ॥ २६८ ॥

अयं हि सवसुश्चोको येषां कार्यकरः परः ।
सवसूकैश्च तैः पार्थैः सधनैस्तत्प्रसादतः ॥ २६९ ॥

तमेव शरणं प्राप्तैर्व्यासस्यैव प्रसादतः ।
सुसवः सुमखो ह्यश्वमेधस्तत्कर्तृभिर्बुधैः ॥ * ॥ २७० ॥

तदनुसपाण्डुतनूजै
रेमेक्ष्माम्पालयन्त्सुपाण्डुतनूजैः ।

परिवर्तनेऽपि सुजातैः युद्धेष्वक्षताङ्गतया कमनीयाकृतिभिः । अथच सुजातैः सुयातैः, सुष्ठु यातं येषामिति अप्रतिहतगतिभिः । सवसूकैः । उकः शिवान्तर्गतो रामः परशुभृत् । स एव यज्ञोच्छिष्टधनाधिप इति सवसुः । सवसुः उकः परशुभृद् येषामनुग्रहीता तैः । अत एव सवसूकैः सवसुकैः, तदनुग्रहलब्धसमृद्धधनैः । अतिशयार्थे दीर्घः । तं शरणमाप्तैः । व्यासात्मना तेनैव स्वीकृतनेतृत्वेन, सुसवं सुयज्ञमश्वमेधाख्यं सुवत इति सुसवसूकास्तैः । स्वार्थे कः ॥

१२+२०+१२+१९ इति मात्रागतिः ॥ ६६ ॥

तदनन्तरं स कृष्णः पाण्डुतनूजैः क्ष्मां पालयन् रेमे । क्रीडमात्रमेतत् यत् सर्वपालकस्य पृथिवीपालनमिति, तदपि पाण्डुतनयानां साहाय्येनेति । कीदृशैः

अनुपमसुखरूपोजः
परमश्श्रीवल्लभस्सतिखरूपोजः ॥ ६७ ॥

तदनु। सः। पाण्डुतनूजैः। रेमे। क्ष्माम्। पालयन्। सुपाण्डुतनूजैः। [सुपाण्डु-तनूयैः।]॥ अनुपमसुखरूपः। अजः। परमः। श्रीवल्लभः। सति। खरूपः। जः। [यः]॥ ६७॥

तदन्वसौ महीं पाण्डुपुत्रैः कृत्वाऽनुपालयन्।
रेमे सुशुद्धविज्ञानतनुं गच्छद्भिरेव तैः ॥ २७१ ॥

स्वयं तु नित्यसंशुद्धानुपमानन्दचिद्घनः।
श्रीवल्लभः परः सर्वकार्ये यः सत्पदोदिते ॥ २७२ ॥

महदादिपृथिव्यन्ते बृहदण्डेऽप्यनेकधा। ॥ * ॥

पाण्डुतनूजैः? सुपाण्डुतनूजैः। देवांशतया सुपाण्ड्वा सत्त्वमय्या ज्ञानप्रचुरया तन्वा जाता इति तादृशैः। अथवा यकारस्थाने जः। सुपाण्डुतनूयैः तादृशीं तनूं यान्ति गच्छन्तीति तादृशैः। तेन धर्मेण क्ष्मारक्षणं तेषामेव सुशकमिति अधर्माज्ञानमयान् कौरवान् निहत्य एतैरेव क्ष्मां पालयन् रेमे। उक्तं हि तेनैव– 'धर्मसंस्थापनार्थाय सम्भवामि' इति। स स्वयं कीदृशः? अनुपमसुख-रूपः अजः नित्यः। नित्यत्वं चैतत् सुखेऽन्वेति। अनुपमनित्यानन्दः। 'नित्यः सर्वगतः' इति यथा। खरूपः। नित्यमित्येव। खं ज्ञानम्। नित्यचिद्घनः। अथच सुखरूप इत्येवाऽनन्दचिद्घन उच्यते। सु सुखम्। 'स्वित्यानन्दः समुद्दिष्टः' इति वचनात्। खं ज्ञानमिति चोक्तम्। श्रीवल्लभः अक्षरादपि चोत्तमः। अत एव परमः। अपिच जः यः सति सदिति स्थूलं कार्यमुच्यते, महदादिपृथिव्यन्ते बृह-दण्डे, न केवलं क्ष्मायाम्, खरूपः आकाशवद् व्याप्तरूपः। तत्र तत्तदाकारतया जः जातः, यथाऽऽकाशः घटाकशो मठाकाश इत्यनेकधा भवति तथैकोऽप्य-नेकधा भूत्वाऽनेकधा व्यवहारभाक् च भवतीति। १२+२०+१२+२० इति मात्रागतिरत्र चोत्तरयोश्च ॥ ६७ ॥

सुगतिश्चरमामददा-
न्निजयोग्याञ्ज्ञानिसुततिपरमामददात्।
पार्थानांसयदूनां
सपितृप्रेष्यादिनामिनांसयदूनाम् ॥ ६८ ॥

सुगतिम्। चरमाम्। अददात्। निजयोग्याम्। ज्ञानिसुततिपरमाम्। अददात् ॥ पार्थानाम्। सयदूनाम्। सः। पितृप्रेष्यादिनामिनाम्। सयदूनाम् ॥ ६८ ॥

सुगतिं निजयोग्यां तु चरमां मोक्षरूपिणीम् ॥ २७३ ॥

ज्ञानिनां सुततिर्देवसमूहस्तत्र चोत्तमाम्।
अददाद् यादवेशानः पार्थानां यदुभिः सह ॥ २७४ ॥

अदद्याऽकारवाच्यं चापरं ब्रह्माददा मतम्।
तदत्ता ह्यददादेव सुरोदरविधिं ग्रसन् ॥ २७५ ॥

अददात्, सुरानप्यन्तेऽत्तीति अदन् आकारवच्यश्चतुर्मुखः अददा। जीवेष्व-धिकानन्दत्वादा। शतानन्दो हि सः। तमप्यत्तीति अददात्। विधेरपि सायुज्य-दः। यत्र सोऽदन्नन्नादश्च भवति अन्नं च भवति। तथाच तैत्तिरीयाणां श्रुतिः– 'अहमन्नादः' इति, 'अहमन्नम्' इति च। तेनैतच्छ्रुतिव्याख्यानरूपमपूर्व-मिदं विशेषणमददादिति। सुरान् स्वोदरे निधायादन्तं चतुर्मुखं आ सम्य-गत्तीति वा। एवं विधेरपि सुगतिप्रदो विधिजनकः स कृष्णः सयदूनां पार्थानां चरमां सुगतिं मोक्षरूपामददात्। एष्यदपि निश्चितमतीतत्वेन भण्यते। तद् यथा– 'सहभुजमकरोद् रामनामा मुकुन्दः'। ये न ददति तेऽददाः। तानय-मयत्तीति च। कीदृशीं सुगतिम्? निजयोग्याम्,यस्ययस्य या निजा सहजा योग्या च ताम्। ज्ञानिसुततिपरमाम्। ज्ञानिनां सुततिः तरतमभावं गता पङ्क्तिः। तत्र परमामुत्कृष्टाम्। सुरोत्तमैरेव प्राप्याम्। कीदृशानां पार्थानां सयदूनाम्?

अन्नादोऽहं हरेरन्नं क्ष्माऽम्भ इत्यादिवाक्यतः[1] ।
सायुज्यदो हरिस्तस्य पितरः कुत एव तु ॥ २७६ ॥

पुत्रा वा चारुदेष्णाद्या यस्य पुत्रश्चतुर्मुखः ।
प्रेष्यः पुत्रस्ततश्चैषां पितृपुत्रादिनामिनाम् ॥ २७७ ॥

नित्यं यन्तीति[2] मरुतो यत्पदोक्ता उनामिनः ।
रुद्रास्तेषां यदूनां च पार्थिवानां गतिप्रदः[3] ॥ * ॥ २७८ ॥

रेमेतत्रापिसुखी
परमोनन्तोननन्दतत्रापिसुखी ।

पितृप्रेष्यादिनामिनां सयदूनाम् । प्रेष्यः पुत्रः । पितृभ्यां प्रकर्षेणेष्यत इति । पितृपुत्रादिभावं गतानाम् । अन्यथा विधिजनकस्य कः पिता । यस्य विधिरेव पुत्रः शङ्करः पौत्रः का कथाऽन्येषाम् । अथापि पिता वसुदेवः । पुत्राश्चारुदेष्णाद्याः । आदिना भ्रातरो गदादयः । पितृष्वस्रीयाः पाण्डवा इत्यादि । अथच सयदूनाम् । सदा यन्तीति यन्तो मरुतः । उकारो रुद्रगणः । नृपत्वेन पृथिवीं गता पाण्डुकेकयाद्या मरुतः । सौमदत्तिमुखा रुद्रगणसम्भवाः । यन्तश्च अवश्च यदवः । तैः सहितानां सयदूनाम् ॥ ६८ ॥

तत्र च तेषां लोके मूलरूपं गतैस्तैः सह रेमे । अपिसुखी । अं परमात्मानं तद्गुणसारं सदा पिबन्तीत्यपयः ज्ञानिनः पार्थाद्याः । ते येन सुखिनः सोऽपिसुखी । ये तमाप्नुवन् त आपयः । ते सुखिनो येनेति वा । अथच अपिसुखी अविसुखी । परम्परया तृतीयात् तृतीयमप्याधिक्यार्थम् । यथा 'बळित्था तद्

---

१. **'क्ष्माम्भोऽनलानिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतः प्रतिसञ्जिघृक्षुः ।**
अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परं स्वमनुभूय परः स्वयम्भूः ॥
एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः ।
तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपान्त्यगताभिमानाः' [३.३३.९–१०]
इति भागवते ॥

२. **'यान्तीति'** पा. ३. **'प्रार्थनां सुगतिप्रदः'** पा.

प्राणेनेन्दिरयाच
प्रयुतोनित्यम्महागुणेन्दिरयाच ॥ ६९ ॥

रेमे । तत्र । अपिसुखी । [आपिसुखी ।] [अविसुखी ।] परमः । अनन्तः । ननन्द । तत्र । अपि । सुखी ॥ प्राणेन । इन्दिरया । च । प्रयुतः । नित्यम् । महागुणेन्दिरया । च ॥ ६९ ॥

नारायणः स वै रेमे तेषां तत्र महात्मनाम् ।
विसुखं दुःखमेव स्याद् विपरीतं सुखस्य यत् ॥ २७९ ॥

सोऽविसुख्येव नित्यं तद्रहितः[1] परमो यतः ।
न तस्मादुत्तमोऽन्योऽस्ति सोऽनन्तो देशकालतः ॥ २८० ॥

गुणतश्च स्वयं[2] नित्यं ननन्दातिसमृद्धितः ।
सर्वत्रापि सुखी देवो वैकुण्ठे किमु वर्धते[3] ॥ २८१ ॥

वपुषे धायि दर्शतम्' इति श्रुतौ दर्शतं दर्शनं भवति । यद्वा वकारस्य बकारस्ततस्तृतीयः पकारः । तेनापिसुखीत्यविसुखी भवति । विसुखं सुखविरुद्धं दुःखम् । तद्रहितः । मा नास्ति परो उत्तमो यस्मादिति परमः । अनन्तः देशतः कालतो गुणतः शक्तितश्च । तत्रापि अमुक्तानां परोक्षे मोक्षेऽपि सुखी ननन्द । समृद्ध्यते स्म । टुनदी समृद्धौ । प्राणेन ब्रह्मणा महागुणेन्दिरया इन्दिरया च । महागुणैः इन्दति सर्वेश्वरी भवति इति तादृश्या लक्ष्म्या च नित्यं प्रयुतः । तादात्म्येनार्धनारीनरात्मना । प्रकृष्टा युतिः सायुज्यम् । तद्रमाया नित्यम् । प्राणस्य तु मुक्त्यनन्तरम् । अन्येषां सारूप्यादि यथाक्रमम् ॥ ६९ ॥

यथा कृष्णरूपं भारताख्यानविषयः साक्षात् अन्तर्यामितया च । एवं सर्वाणि मत्स्यादीनि रूपाणि श्रीपतेः हरेः । सुपर्वाणः सुराः । तेषामाणिः

---

१. **'यद्रहितः'** पा. २. **'–तश्च स वै नित्यम्'** पा.
३. **'किमु तद्धिते'** पा.

तत्रापि रमया नित्यं प्राणेन प्रयुतः प्रभुः ।
अन्यैस्तु युत एवायं तारतम्येन तेषु च ॥ २८२॥

महागुणश्रिया[१] नित्यं तादात्म्येनैव संयुतः । ॥ * ॥

एवंसर्वाणिहरे
रूपाणिश्रीपतेस्सुपर्वाणिहरेः ।
पूर्णसुखानिसुभान्ति
प्रततानिनिरन्तराणिनिसुभान्ति ॥ ७० ॥

एवम् । सर्वाणि । हरेः । रूपाणि । श्रीपतेः । सुपर्वाणिहरेः ॥ पूर्णसुखानि । सुभान्ति । [सुभा । अन्ति ।] प्रततानि । निरन्तराणि । निसुभान्ति ॥ ७० ॥

एवं सर्वाणि रूपाणि हरेर्लक्ष्मीपतेः प्रभोः ॥ २८३ ॥

सुपर्वाणो हि देवाः स्युस्तेषामाणिस्तु चाञ्चलिः[२] ।
स्वस्थानादेः स्ववैरिभ्यस्तद्धारी दैत्यमर्दनः ॥ २८४ ॥

सुपर्वाणिहरिस्तस्य रूपं यद्वर्णितं प्रभोः ।
समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् ॥ २८५ ॥

भारताख्यानविषयः प्राधान्येनोक्तमार्गतः ।
श्रीकृष्णरूपमथवा सर्वान्तर्यामकं परम् ॥ २८६ ॥

स्वस्थानात् प्रच्यवनम्, अण गताविति धातोः, तत् परिहरति प्रच्यावकान् दैत्यादीन् संहृत्येति सुपर्वाणिहरिस्तस्य । सुपर्वणामाणी धारकः दैत्यहारकश्चेति वा । चलमाणम्; धारकतया तद्धानाणी । पूर्णसुखात्मकानि जीवस्यान्तिके सुष्ठु भानात् सुभान्ति । सुभा– अन्ति इति वा च्छेदः । अन्ति अन्तिके सुभान्तीति सुभानि, अन्त्यलोपेन । 'सर्वा भूतानि' इतिवत् । अणोरणीयांस्यपि प्रततानि

---

१. '**महागुणा च या**' पा. २. '**चाचलिः**' इति क्वचित् । अस्फुटार्थं पदम् ।

आस्तीकादिप्रकारेण तथा मन्वादिना क्रमात् ।
तद्वन्मत्स्यादिरूपाणि सर्वाणीत्यवधार्यताम् ॥ २८७ ॥

सम्पूर्णसुखरूपाणि सुप्रभाणि तथाऽन्तिके ।
अत एव प्रकर्षेण ततानि च परस्परम् ॥ २८८ ॥

निरन्तराणि सर्वत्र भेदोऽन्तरपदोदितः ।
स्वयं तु नितरां सुष्ठु भान्ति च ज्योतिषा सह ॥ * ॥ २८९ ॥

राममराममहाबाहोमायातेसुदुरासदा ।
वादसाददकोलोकेपादावेवतवासजेत् ॥ ७१ ॥

राम । राम । महाब ।] [महाव । अहो । [महाबाहो ।] माया । ते । सुदुरासदा ॥ वाद । सादद । [वादसादद ।] कः । लोके । पादौ । एव । तव । आसजेत् ॥ ७१ ॥

अग्निबीजं रमित्येतदामोऽपक्वोऽभिधीयते ।
क्रीडायां रम्वमो मानवर्जितश्चोच्यते यतः ॥ २९० ॥

व्याप्तानि । यतः निरन्तराणि परस्परं निर्भेदानि । नितरां सुष्ठु भान्ति भासन्ते सूर्यादिज्योतिषा सहेति । 'यदादित्यगतं तेजः' इत्यादेः ।।

१२+२०+१२+१८ इति मात्रागतिः ॥ ७० ॥

कथिता भारतकथा । इदानीं मार्कण्डेयसमास्यायां प्रस्तुतं रामं प्रस्तौति पूर्वावतारोपास्यम्– राम राम । रमित्यग्निबीजं दाहार्थम् । रीङ् क्षय इति च धातुः । अमानपक्वान् पापक्लिन्नान् दुष्टान् दहतीति रामः । अथच रमु क्रीडायाम् । रमत इति रः, क्रीडारूप आनन्दरूपो वा । अमेयत्वादमः । स चासौ स चेति रामः । 'आनन्दरूपो निष्परीमाण एषः' इति श्रुतिः । तथाच राम दुष्टानां दाहक, राम अप्रमेयलीलामय । सदा रमत इति च रामः । तापत्रयोज्झित

दाहकाऽशेषदुष्टानां[1] नित्यं तापत्रयोज्झित ।
क्रीडारूपाप्रमेयेति धन्यैः सम्बोध्यते हरिः ॥ २९१ ॥

राम रामेति तत्पश्चान्महाबेति पदं भवेत् ।
महाबल महाज्ञान ततश्चाहो इतीरितम् ॥ २९२ ॥

महाबाहो इतीत्थं वा मायेति महिमोच्यते ।
महिमा तव दुष्प्राप्या मुक्तैर्ब्रह्मेशपूर्वकैः[2] ॥ २९३ ॥

ज्ञानदाखिलभक्तानां तेनैव स्वगतिप्रद ।
गतिगन्धनयोर्वेति तत्र घ्राणादिभोगद ॥ २९४ ॥

साददामरशत्रूणां सादो नाशस्तमोऽभिधः ।
वादस्य साददाद्यापि विष्णोर्नुकमिति श्रुतेः ॥ २९५ ॥

एवं वक्तुं च नालं यस्तमसौ स कथं भवेत् ।
वशीकृतशिवाहीशवीशपूर्वश्चतुर्मुखः ॥ २९६ ॥
पादावेवाऽश्रयेद् विष्णोः कस्ततोऽन्यस्तथाऽऽश्रयेत् ॥ * ॥

इत्येतत् । महाब, बं बलम्, महाबल, अथच वबयोरैक्यात् महाव, वं ज्ञानम्, महाज्ञान । अहो आश्चर्यमय । अथच महाबाहवित्येकं वा पदम् । महावीर । ते माया महिमा सुदुरासदा, दुष्प्रापा मुक्तैरपि ब्रह्मादिभिः । 'न ते विष्णो जायमानो न जातः','न ते महित्वमन्वश्नुवन्ति' इत्यादेः । वा गतौ गन्धने च । गतिरित्यवगतिरपि । वाद भक्तानां ज्ञानप्रद, तेन च स्वगतिप्रद । गन्धन इत्युपलक्षणम् । तत्र च मुक्तौ घ्राणादिभोगप्रद । सादोऽवसादः । अमरशत्रूणामवसादद तमःप्रद । वादसाददेत्येकं वा पदम् । वादस्य सादमवसानं ददातीति तादृश । तद्गुणवादे वाद एवावसीयते न गुणा इति । 'विष्णोर्नु कं वीर्याणि प्रवोचम्' इति श्रुतिः । 'विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह' इति च

---

१. **'–दुःखानाम्'** पा. २. **'दुष्प्रापा मुक्तैर्ब्रह्मेन्द्रपूर्वकैः'** पा.

[[1]जेत्सवातववेदापाकेलोकोददसादवा ।
दासरादुसुतेयामाहोवाहाममरामरा ॥]

[जेत् । सवातव । वेदाप । आके । लोकोदद । सादव । अ । दासर । आत् । उसुतेयाम । अह । उवाह । आ । मम । राम । रा ॥]

जेतः सवातजगतो वर्तकाऽऽगमगम्य भोः[2] ॥ २९७ ॥

आके दूरे समीपे च लोकानां ज्ञानकर्मद ।
उदं कर्म तथा ज्ञानमुदेत्येतेन सज्जनः[3] ॥ २९८ ॥

ज्ञानेन तेन भक्तानां सादस्य च निवारक[4] ।
सर्वदोषविरुद्धान्य सर्वस्माज्जगतः सदा ॥ २९९ ॥

अभावाशेषदेषाणामित्यनन्तगुणाख्य भोः ।
दासो दस्युस्तथा भृत्यो रोऽग्निः क्रीडा च रं यतः ॥ ३०० ॥

भागवते । एवं वक्तुमप्रभविष्णुः कथं स्वयं विष्णुः स्यादित्यहो शोचनीयता तमःपरायणानामैक्योपासकानाम् । लोके ज्ञानिलोके कः ब्रह्मा वायुर्वा तव पादावेव अनन्यतयाऽऽसजेत् । तथाऽन्यः क आसजेत्? न कोऽपि । षन्ज सङ्गे । 'दन्शसन्जस्वन्जां शपि' [अ.सू.६.४.२] इत्युपधाया नकारस्य लोपं मन्यन्ते पाणिनीयाः । काशकृत्स्नस्तु धात्वन्तरं पपाठ– 'षज गतौ' इति ॥ * ॥

अथचास्यैव श्लोकस्य विपर्ययपाठेनार्थान्तरमवगम्यते । जयतीति जेत् जेतः । सवातव, वातेन मुख्यप्राणेन सहितं सकलं जगद् वर्तयतीति तादृश । वेदाप, वेदैराप्यत इथि वेदगम्य । आके आरे दूरे समीपे च । 'त्वमग्ने ऋभुराके नमस्यः' इति श्रुतेः । लोकानामुदं ददाति तादृश । उदेत्यनेनेति उदं ज्ञानं च कर्म

---

१. पूर्वश्लोकस्य व्यत्यस्य पठनेऽयं श्लोकः सम्पद्यते । प्राचीनादर्शेषु नायमत्र पठ्यते ग्रन्थभागतया । किन्तु ग्रन्थावसाने पृथगेव पठ्यते ।

२. **'–गम्यभाः'** पा. ३. **'यज्वनः'** पा. ४. **'स्य विनिवारक'** पा.

29-3-2006

दस्युदाहक भृत्यानां नित्यमेव रतिप्रद।
आदित्यत्तरथान्तःस्थ तथाऽऽदेय महात्मभिः ॥ ३०१ ॥

उसुतेयाम रुद्रोऽसावुकारार्थस्तु तत्सुतौ।
कुमारविघ्नपावीश्च[1] श्रीरासां विनियामक ॥ ३०२ ॥

य आकाशमनस्तेजो यमयत्यन्तरः प्रभुः।
इति श्रुतेर्मनः स्कन्दः श्रीस्तेजः खं विनायकः ॥ ३०३ ॥

अहाहीन तथाऽहेय सर्वथैव शुभेच्छुभिः।
उवाह नृहरे मेषरूपशङ्करवाहन ॥ ३०४ ॥

समन्तान्मम राम त्वं सुवित्तं नैव चेतरत्।
शाक्तेयशैवकौमारसौरवैनायकान्यपि ॥ ३०५ ॥

च। 'न ऋते त्वत् क्रियते किञ्चनाऽरे' इति हि श्रुतिः। ज्ञानेन च भक्तानां सादं विषादं वारयतीति सादव। सादव-अ इति च्छेदः। अकारः विरुद्धाभावान्य-वचनः। अ सर्वदोषविरुद्धानन्तगुण। सर्वदोषाभावस्वरूप। सर्वजगतोऽन्य। दासर-आत् इति च्छेदः। दास इति दस्युः। दासर दस्युदाहक। दास इति भृत्यः। दासर स्वभृत्यरमण। आ समन्तादत्तीत्यात्, सर्वात्तः। अन्तस्तत इति, आप्नोतीति वा आत्। भक्तानादत्ते। आदीयते च भक्तैरिति चात्। आत्मेत्ये-तत्। तत उसुतेयामेति पदम्। उः शम्भुः। उसुतौ स्कन्दविनायकौ। मनआकाशमानिनौ। ईः श्रीस्तेजोभिमानिनी। तयोस्तस्याश्च नियामक। 'य आकाशमन्तरो यमयति'इत्याद्या श्रुतिः। तत अह उवाह इति पदे। हः हीनः न भवतीत्यहः अहीनः। सर्वैः शुभेच्छुभिर्हः हेयो न भवतीति अहः अहेयः। अहर्मानिसूर्यगतश्चात्राह इत्युक्तः। उवाह मेषरूपशङ्करवाहन। अथच उवाह, उं रुद्रमप्यन्ते वहयतीति नाशयतीति तादृश। वह हिंसायाम्।

---

१. '–वी च श्री–' पा.

निरस्तान्युसुतेयामाहोवाहेति ह्युदाहृतम्।
सौरं च नयसाम्येन य आदित्यमिति श्रुतेः ॥ * ॥ ३०६ ॥

देवानाम्पतयोनित्यन्नोमतंयस्यजानते।
तस्मैदेवनमस्येहम्भवतेसुरमारये ॥ ७२ ॥

देवानाम्। पतयः। नित्यम्। नो [नः।] मतम्। यस्य। जानते॥ तस्मै। देव। नमस्ये। अहम्। भवते। असुरमारये। [सुरमारये] ॥ ७२ ॥

देवानां पतयो नित्यं नो मतं यस्य जानते।
कुतोऽसुरा विजानन्ति त्रैपुराः पुनरागताः ॥ ३०७ ॥

तस्मै विशुद्धिशुद्धाय बुद्धायासुरघातिने।
दैत्यज्ञानारये वाऽथ तेषां शोभारयेऽथवा ॥ ३०८ ॥

यद्वा देवेषु विज्ञानदानाय श्रीकराय वा।
रा दान इति धातोश्च तृतीयोऽतिशये तथा ॥ * ॥ ३०९ ॥

उसुतेयामेति उवाहेति च विशेषणाभ्यां शाक्तेयशैवस्कान्दवैनायकानि मतान्य-वैदिकानीति बोधयति। सौरमप्युपलक्ष्यते अहेति सूचितत्वात्। नयसाम्याच्च। 'य आदित्यमन्तरो यमयति' इति तस्यामेव श्रुतौ श्रवणात्। हे राम, त्वं मम आ सर्वतोदिशं रा सम्पत्। त्वमेव मम सर्वस्वमिति। राति सर्वाभीष्टमिति रा सम्पदुच्यते। 'रातेर्डैः' [दशपा.२.१०] इति नाऽश्रितम्। केचित् 'मम राम राः' इत्येव पठन्ति। मूलादर्शे तु विसर्गरहितः पाठः। इतश्चतुष्टयमानुष्टुभम् ॥ ७१ ॥

अथ बुद्धं प्रस्तौति। देवानां पतयोऽपि यस्य नित्यं मतं मनोगतं नित्यं नो जानते तं तन्मतं वा कथमसुरास्त्रैपुरा जानीयुः। तन्मतानुयायिन इति वाशन्तो बौद्धमानिनो वा। यस्य मतमभिमतं तत् तदेव नोऽस्माकमपि मतमिति विशिष्य देवानां पतय एव जानत इत्याचार्यः स्वयमाप्ततमत्वमुल्लाघयति। तस्मै

समस्तदेवजनकवासुदेवपरामृत ।
वासुदेवपरामृतज्ञानमूर्त्तेनमोस्तुते ॥ ७३ ॥

समस्तदेवजनकवासुदेवपरामृत । [समस्तदेवजनक । वासुदेव । परामृत ।]॥ वासुदेव । [व । असुदेव ।] परामृत । [वासुदेवपर । अमृत ।] पर । अम् । ऋत । ज्ञानमूर्ते । [परामृतज्ञानमूर्ते ।] नमः । अस्तु । ते ॥ ७३ ॥

भवते नमस्येऽहं देवानां देव । भवते, भं ज्ञानम्, तद्वते बुद्धाय । भ सम्मोहने । असुरमोहनाय कृतावताराय । भा दीप्तौ । दीप्ताय परिशुद्धाय । तदेव स्फुटमाह– असुरमारये । असुरान् मोहयित्वा मारयतीति मारिस्तस्मै । असुराणां या मा प्रमा शोभा वा तदरये । सुरमारय इति वा च्छेदः । सुराणां मां प्रमां शोभां सम्पदं वाऽतितरां रातीति तादृशाय । मार एव मारिः । तृतीयोऽतिशये ॥

एतेनैव सर्वावतारकथा अपि सङ्ग्राह । अत एव न विशिष्य बुद्धपदमुपादत्त । भ सञ्चारे । प्रळयोदधिसञ्चाराय भवते मीनाय । भ आधारभावे । धृतमन्दराय भवते कूर्माय । भ आनन्दे । अमृतकलशेन जनितदेवानन्दाय भवते धृतधन्वन्तरिरूपाय । भ सम्मोहने सुन्दरभावे च । अनुपमया सुषमया दानवमोहनाय भवते धृतमोहिनीरूपाय । धृतधराय वराहाय । भ विदारणे । रक्षोवक्षोविदारणाय नरसिंहाय । असुरमारय इति च स्फुटम् । भ ऊरीकरणे । ऊरीकृतबलिदानाय वामनाय । असुरस्य बलेर्माया अरय इति च । भ विस्तारे । भुवनत्रयविस्तृतरूपाय त्रिविक्रमाय । भ विनाशने । क्षत्रकुलनाशनाय भार्गवाय । भ सन्धाने । कृतसेतुसन्धानाय रामाय । धृतगोवर्धनाय नाशितकंसाद्यसुरवृन्दाय जगन्मोहनसौन्दर्याय कृष्णाय । त्रैपुरमोहनाय बुद्धायेति गतम् । भ उग्रभावे । म्लेच्छेषु दर्शितोग्रभावाय कल्किने । कलं ज्ञानं कं सुखं चास्येति किल कल्की । भ आनन्दे ज्ञाने चेति भवते कल्किने । भ सन्ततवचने सन्ततं वेदप्रवक्त्रे भवते हयग्रीवाय दत्तव्यासकपिलादिरूपाय चेत्यादिकमूह्यम् । सुरमारय इति च स्फुटम् । असुरमारय इति बलकार्योऽवतार उक्तः । सुरमारय इति ज्ञानकार्य इति ॥ ७२ ॥

देवाश्च ते जनाश्चैव देवा नाम जनाश्च[१] ये ।
सम्यगस्ताः कलेरन्तमासाद्यान्ते[२] हि सर्वशः ॥ ३१० ॥

कं सुखं वेति विज्ञानमसुः प्राणोऽभिधीयते ।
देवनं देव इत्युक्तं तच्च क्रीडादिसप्तकम् ॥ ३११ ॥

परामृतं विमोक्षस्तदेतेषां च यतो ह्यसौ ।
समस्तदेवजनकवासुदेवपरामृतः[३] ॥ ३१२ ॥

इति ज्ञानादिदानेन कलिकात्कारतो हरिः ।
कल्की संस्तूयते किञ्च कलं ज्ञानं सुखं च कम् ॥ ३१३ ॥

तद्वान् कल्की तदत्रोक्तं वासुदेवपदोपरि ।
परामृतज्ञानमूर्त इत्यनन्तसुखाम्बुधिः ॥ ३१४ ॥

परामृत इति प्रोक्तो वासुदेवश्च स प्रभुः ।
कृत्वा विशुद्धसत्त्वं तद्गम्यत्वात्तु सतां सदा ॥ ३१५ ॥

विस्तारक्रमतोऽप्येष कल्की तस्मै नमोनमः ।
यद्वा समस्तदेवानामुत्पत्त्यादियुगादिकृत् ॥ ३१६ ॥

इदानीं विशिष्य कल्की प्रस्तूयते । कल्किना दुष्टहननेन धर्मे संस्थापिते समस्ताः पुनरेकीभूय स्थिताः देवजनाः । देवाः सत्त्वप्रधाना ज्ञानिनो जनाः सज्जनाः । देवनामानश्च जनाः सुपर्वाणः तेषां कं सुखम्, वं ज्ञानम्, असुः प्राणशक्तिः, देवो देवनं क्रीडादिसप्तकम्, क्रीडा, विजयः,व्यवहारः, द्युतिः, स्तुतिः, कान्तिर्गतिश्चेति, परामृतं विमोक्षश्च यस्मात् तादृश समस्तदेवजनकवासुदेवपरामृत । कलिकात्कारेण देवजनानां ज्ञानानन्दादिप्रद कल्किन् । अपिच कलं ज्ञानं कं सुखमिति तद्वान् हि कल्की गीयते । तददिमाह– परामृतज्ञानमूर्ते । अमृतं सुखम् । परममृतं ज्ञानं च मूर्तिरस्येति तादृश । 'ज्ञानमूर्ते' इति भिन्नं वा पदम् । अत एव वासुदेव । 'सत्त्वं विशुद्धं वसुदेवशब्दितम्'

---
१. **'देवनामजनाश्च'** पा. २. **'–मासाद्यं ते'** पा. ३. **'–परामृत'** पा.

चतुर्ष्वादियुगादित्वाद् वासुदेवेति कथ्यते।
परामृतस्त्वमेवाऽन्ये त्वत्प्रसादात्तु[1] मोक्षिणः ॥ ३१७ ॥

ज्ञानरूपासुदेव त्वं परोऽसि जगतः पते।
अमन्तक सुदुष्टानां सदैवैकप्रकारतः ॥ ३१८ ॥

ऋतमित्युच्यते देव ज्ञानमूर्ते नमोऽस्तु ते। ॥ ✽ ॥

देवादे देवलोकपपूर्णानन्दमहोदधे।
सर्वज्ञेशरमानाथदेवादेदेवलोकप ॥ ७४ ॥

देवादे। देवलोकप। पूर्णानन्दमहोदधे ॥ सर्वज्ञेश। [सर्वज्ञ। ईश।] रमानाथ। देव। आदे। अदेवलो। कप। [अदे।][अव। लोकप।][देवलोकप।]॥७४॥

कलिमलमपहत्य विशुद्धसत्वं विधाय तेन गम्यत इति वसुदेवस्यायं वासुदेवः कल्की। अथच समस्तदेवजनक। समस्तदेवानां जनः जननं यत्र तमादियुगादिं करोतीति समस्तदेवजनकः। आह हि स्वयमेव– 'धर्मविवर्धन मूलयुगादे' इति। अत एव च वासुदेवः। कृतयुगसम्बन्धी हि वासुदेवश्चतुर्मूर्तिषु। तत्र च समस्तदेवानां जनक। परामृत नित्यमुक्त। अथच परेऽमृता यस्मात् तादृश। वासुदेव। वः ज्ञानरूपोऽसुर्मुख्यप्राणः। तस्य देव क्रीडादिप्रद। व बलरूप, असुदेव इन्द्रियस्वामिन् इति भिन्ने वा पदे। ततः परम्, 'पर-अम्-ऋत' इति त्रीणि पदानि। जगतः पर विलक्षण, सर्वोत्तम जगत्पते। अम् अन्तक पञ्चदशस्वरवाच्य। 'अन्तोऽर्द्धगर्भः' इति स्मरणात्। सदैकरूपत्वादृत। वासुदेवपर इत्येकं वा पदम्। ज्ञानरूपादसुदेवात् परः। तस्मै ज्ञानमूर्ते नमोऽस्तु ते ॥ ७३ ॥

अथ महाभारततात्पर्यपर्यवसितं सर्वशास्त्रार्थनिर्णयमाह–देवादे। देवानामप्यादिरित्यादिदेव। देवान् देवलोकं च पातीति देवलोकप। अनन्ता-

---

१. '**–त्प्रसादाच्च मो–**' पा.

29-3-2006

आदिदेव महापञ्च्यः सलोकसुरपालक ॥ ३१९ ॥

अनन्तानन्दसान्द्राब्धे सर्वज्ञेश रमापते।
देवाखिलजगज्जन्मस्थित्यप्ययविमोक्षद ॥ ३२० ॥

अदेवनाश धातृप विमुक्तसुरपालक।
अदेऽविनाशिन् धातुश्च यद् दीङ् क्षय इति श्रुतः ॥ ३२१ ॥

अव नः सुरसन्दोहान् विमुक्तसुखपालक।
संसारादेव लुप्ता ये मुक्ता लोकं तु तत्सुखम् ॥ ✽ ॥ ३२२ ॥

यो निर्म्ममेशेषपुराणविद्यां
योनिर्म्ममेशेषपुराणविद्याम्।

नन्दमहोदधे। सर्वज्ञस्य ब्रह्मणो वायोः सर्वज्ञमुनेः स्वस्य वेश। सर्वज्ञ ईश इति भिन्ने वा विशेषणे। रमायाः पते। देव लीलालोल। आदे लीलयैवाखिललोकस्य सृष्ट्यादिकारण। अदेवानसुरान् लुनातीति अदेवलो अदेवनाश। कं धातारं प्राणं च पातीति कप। अथचान्ते 'देवलोकप'इत्येकं पदम्। लोकन्ते साक्षादवलोकन्ते भगवन्तमिति लोका मुक्ताः। देवलोकं मुक्तदेवगणं पातीति देवलोकप विमुक्तसुरपालक। तस्मै देव नमोऽस्तु ते। अथच तुर्यचरणे देव अदे अव लोकप इति च्छेदः। दीङ् क्षये। अदिः अक्षयः। अदे अविनाशिन्, लोपयन्ति संसारमिति लो लुप्तसंसारा मुक्ताः। लुप्लृ छेदने। आद्यक्षरग्रहणेन वा समस्तं पदं गृह्यते लोपका इति। तद्यथा अमित्यन्तकः। तेषां कं सुखं लोकम्। लोकं पातीति लोकप विमुक्तसुखपालक। लुम्पन्ति संसारमिति वा लावो मुक्ताः। तद्यथा गच्छन्तीति गावः। लुपेर्डोस्। तेषां कं सुखम्। तत्पालक देव त्वमव रक्ष नः सुरसन्दोहानिति ॥ ७४ ॥

अभिहितं महाभारततात्पर्यम्। सम्प्रति महाभारतकृत् कृष्णद्वैपायनः प्रस्तूयते– यो निर्ममे। यः अशेषां पुराणाख्यां विद्यां निर्ममे तं अं व्यासं याम्,

योनिर्म्ममेशेषपुराणविद्यां
योनिर्म्ममेशेषपुराणविद्याम् ॥ ७५ ॥

इति भारतमाश्रित्य सर्वशास्त्रार्थनिर्णयम् ।
कृत्वैतद्विद्यया वेद्यं विद्याधीशं स्मरन् हरिम् ॥ ३२३ ॥

तत्प्रसादाद्धि विद्यैषा मया प्राप्तेत्यथाब्रवीत् ।
योनिर्मम इति ह्यत्र छिन्द्यादेवं पदान्यपि ॥ ३२४ ॥

यः । निर्ममे । अशेषपुराणविद्याम् । योनिः । मम । इशेषपुः ।
[इशेषपुः] । आ । अनवित् । याम् ॥ ई +अः । अनिः । ममे ।

शरणमयामित्येकान्वयः । अमाङ्योगेऽप्यडभावो भवति च्छन्दसि । छान्दसानामग्रणीश्च भगवत्पादः । अकारो व्यासवचनः । 'गुरूंश्चान्' इति स्वयमेवाऽह गीताभाष्ये । 'अ आ अं अः पुराणर्षिर्व्यासः'इति च पौराणं वचः । कीदृशी पुराणविद्या? या उ निर्ममेशे षपुराणविद्या अम् इति च्छेदः । अं व्यासमिति पूर्वत्र गतम् । या षपुराणविद्या । षकारः प्राणः । ततोऽपि पुराणस्तज्जनको नारायणः । तत्प्रतिपादनी विद्या । अत एव उ उच्चा, निर्ममाणामीशे शुके स्थिता भाति । निर्ममतः ईशः शम्भुर्वा निर्ममेशः । तस्मिन् तदवतारभूते शुके । अथवा प्राचीनटीकापदपाठानुसारेण या उ निर्ममशे षपुराणविदि आ अम् इति च्छेदः । आ सम्यक् निर्ममेशे षपुराणं नारायणं वेत्तीति षपुराणविदि शुके स्थिता आ भातीत्यर्थः । तादृशीमथ च द्यां द्योतमानां, द्युपदवाच्याभ्यां श्रीभारतीभ्यामभिमन्यमानामशेषपुराणविद्याम् । कीदृशः कृष्णद्वैपायनो निर्ममे? योनिर्मम । मम सूत्रात्मनो वायोर्योनिः सङ्कर्षणरूपेण । शुकाविष्टस्य मम वायोर्योनिर्व्यासात्मनैव । ईः श्रीः । तां तदुत्सङ्गे पादौ निधाय, शेषं च तत्र शयानः पुनाति श्वेतद्वीपगत इति ईशेषपुः । ईशेषपूरिति वक्तव्य ईशेषपुरित्याह । तेन यः पवित्राणां पवित्रं तस्य स्वाङ्गसङ्गेनेशेषयोः पवित्रीकरणं कियन्मात्रमित्यावेदयति । इशेषपुरित्यपि च्छेदः । इः कामः रोमहर्षणगतः, शेषः

अशेषपुराणवित् । द्याम् । या । उ । निर्ममेशे । षपुराणविदि ।
आ । अम् ॥ ७५ ॥

ई श्रीरिति समानार्थावकारार्थो हि केशवः
अहं यां शरणं व्यासमह्लोपश्छान्दसत्वतः ॥ ३२५ ॥

यः श्रीविष्णुः पुराणाख्यां विद्यां द्यां निर्ममेऽखिलाम् ।
द्यौस्तु श्रीर्भारती चाऽपि तद्रूपामभिमानतः ॥ ३२६ ॥

निर्ममेशे शुके भाति याऽत्युच्चा तत्प्रसादतः ।
षः प्राणस्तत्पुराणो हि विष्णुस्तज्जनकः प्रभुः ॥ ३२७ ॥

तद्विद्या[१] विष्ण्वधीनं तु विश्वं जानन् हि सर्वदा ।
ममतारहितः शम्भुः शुको जातस्तपोधनः ॥ ३२८ ॥

योनिश्च मम देवेशः शुकाविष्टस्य धीमतः ।
अवान्तरं कारणं च यद्वा सूत्रात्मनो मम[२] ॥ ३२९ ॥

ईशेषपुरयं दीर्घलोपश्छान्दस इष्यते ।
श्रियं शेषं पुनात्येष विष्णुः क्षीराब्धिमन्दिरः ॥ ३३० ॥

पैलगतः । तौ पुनाति व्यासात्मनैव परविद्योपदेशेन । विधिवैशम्पायनादीनामप्युपलक्षणम् । तत आ अनविदिति द्वे पदे । आ समन्तात् पुनातीति योग्यतया पूर्वान्वयः । अवित् किमप्यविदन् न भवतीति अनवित् सर्वज्ञः । अथवा आनविदित्येकं पदम् । आ आपरोक्ष्येण सर्वं जानन्नानवित्, आ समन्तादखिलं सदा अनं प्राणं वेदयतीति चाऽनवित् । विद ज्ञाने । ननु आणविदिति पठ्यते । नाऽनविदिति । सत्यम् । संहितापाठोऽयम् । आनविदिति पदं पठामः । तद् यथा 'प्र ण आयूंषि तारिषत् 'इति । आणविदित्येव वा पठ्यताम् । ण इत्यानन्दः । जीवानन्दमानी प्राण एवाऽण इत्युच्यते । तं वेदयतीत्याणवित् । द्यामिति गतम् । ततो यः अनिः इति द्वे पदे । यशब्दोऽयं

१. 'तद्विदि आ' इति च्छेदः । २.'मतः' पा.

29-3-2006

इशेषपुरथो वेदपतिरिः काम ईरितः ।
शेषकामौ पुनात्येष पैलसूतगतौ क्रमात् ।। ३३१ ।।

उपलक्षणमेतद्धि मुनीनन्यान् सुरानपि ।
वैशम्पायनविध्यादीन् पुनात्येष कृपानिधिः ।। ३३२ ।।

आ पुनातीति सम्बन्ध उत्तरेणापि योग्यतः ।
अनविचेति सर्वज्ञो यदविन्न कचित् प्रभुः ।। ३३३ ।।

आ समन्ताच्च विद् योऽयमापरोक्ष्येण वेदराट्[1] ।
यद्वाऽनं वेदयत्येष ह्या समन्तात् सदाऽखिलम् ।। ३३४ ।।

इः कामः स न यस्यासावकामोऽनिर्मुनीश्वरः ।
कामं दहन्ति कृतिनो नन्वित्यादिप्रकीर्तनात् ।। ३३५ ।।

पुराण्यणन्ति ये जीवास्ते पुराणा अशेषतः ।
यत [2]उत्पत्तिकृत् तेषामतोऽशेषपुराणवित् ।। ३३६ ।।

यद्वा विष्णोः शेषभूता अशेषा हरिकिङ्कराः ।
वेदयन्नेव तद्वस्तानुक्तोऽशेषपुराणवित् ।। ३३७ ।।

विदोत्पत्तौ विदास्तित्वे विद ज्ञान इति क्रमात् ।
इत्थं देवो ममेऽज्ञायि वेदेशो वेदवैदिकैः ।। ✻ ।। ३३८ ।।

यकारः । न यच्छब्दः । पुनरुक्तेः । ईसहितः अः यः । ईकारः श्रीकारः । 'अः इति ब्रह्म' । तेन यो व्यासः स्वयं श्रीविष्णुरेव । किमुक्तं भवति? साक्षाद् विष्णुरेव स्वयं व्यासो बभूव । नावेशादिमात्रमित्युक्तं भवति । इः कामः यस्य न विद्यते सोऽनिः जितकाम आप्तकामश्च । ततो ममे अशेषपुराणवित् यामिति त्रीणि पदानि । पुरमणन्तीति पुराणा जीवाः । अशेषान् सर्वान् जीवान् वेदयति उत्पादयतीति अशेषपुराणवित् । विद उत्पत्तौ । अकारवाच्यस्य स्वस्य शेषान्

---

१. 'देवराट्' पा. २. 'यत उत्पादकस्तेषा–' पा.

अनन्तपारामितविक्रमेश
प्रभोरमापारमनन्तपार ।
महागुणाढ्यापरिमेयसत्त्व
रमालयाशेषमहागुणाढ्य ।। ७६ ।।

अनन्तपार । अमितविक्रम । ईश । प्रभो । रमाप । अरम् । अनन्तप । अर ।। महागुणाढ्य । अपरिमेयसत्त्व । रमालय । अशेषमहाः । गुणाढ्य । [अशेषमह । आगुणाढ्य ।]।। ७६ ।।

इति सर्वेषु शास्त्रेषु देवा ब्रह्मादयोऽखिलाः ।
उक्त्वाऽप्यन्तं न चाऽपुस्ते गुणान् विष्णोर्निरन्तरम् ।। ३३९ ।।

परिवारभूतान् किङ्करान् जीवानिति वा । जीवेषु विद्यत इति वा पुराणवित् । विद अस्तित्वे । जीवान् वेदयतीति ज्ञापयतीति वा । एतादृश इति यो वेदेषु ज्ञानिभिर्ममेऽज्ञायि तं व्यासं शरणं यामयामिति सर्वं चतुरस्रम् । ततजाश्च गौ चेतीन्द्रवज्रा ।। ७५ ।।

अन्तपारविरहितः । पूर्वान्तोऽपरान्तश्च कालतः । पारः सीमा देशतः । असङ्ख्येयपराक्रम । ईश, ईष्टे कर्तुमकर्तुमन्यथा च कर्तुमिति । सर्वस्य प्रभो । रमाया अपि पालक रमापते, अरमलमितरेभ्योऽतिशयेन रमाप । अनन्तप शेषस्य पालक, अनन्तं नित्यं नित्यत्वेन अरमलं नित्यं पातीति तादृश । न क्षीयत इत्यर अक्षीण । रीङ् क्षये । महद्भिः पूज्यैर्निरवधिकैश्च गुणैराढ्य । अपरिमेय-सत्त्व । सत्त्वं बलज्ञानसमाहारः । अनन्तबलज्ञान । अयं रमाया निवासः, रमा चास्येति रमालय श्रीनिवास । अशेषमहाः । महो नाम नैजः सर्वगुणोत्कर्षः । अशेषं महो यस्य सोऽशेषमहास्त्वं हे गुणाढ्य । आढ्या ब्रह्मादयोऽपि गुणभूता यस्य । यद्वा अशेषमह आगुणाढ्य इति च्छेदः । अशेषमह अशेषपूज्य । मह पूजायाम् । आ समन्ताद् गुणभूता आढ्या ब्रह्मादयो यस्य तादृश ।।

इति दर्शयितुं भूयः सामान्यात् स्तौति तं प्रभुम् ।
विष्ण्वधीनं सदा पश्यन् विश्वमात्मानमेव च ॥ ३४० ॥

निर्ममोऽतः सदा स्वस्य नित्यमप्रार्थितप्रदम् ।
तं च देवं सदा पश्यन् प्रेरितारं पुरःस्थितम् ॥ ३४१ ॥

स्तौति सम्बोधनेनैव नो नमस्यन्न चार्थयन्[१] ।
प्रतीतौ ममकारस्य निषेधो नम इत्यतः ॥ ३४२ ॥

अप्राप्तममकारो यः [स कथं तन्निषेधति][२] ।
अथाप्यनुवदत्येष सतः संशिक्षयत्यपि ॥ ३४३ ॥

ननु क्रियापदं न श्रूयते? न श्रूयताम् । को दोषः । यच्छ्रोतव्यं तदुक्तम् । ननु कथं तर्हि वाक्यपूर्तिः? किं कार्यतावादी भवान् । तर्हि विष्णुसहस्रनामसु कथं शाब्दबोधः? यदि न बुद्ध्यते तर्हि शुश्रूषस्व गुरून् । आराद्धगुरुरेव हि वेदान्तेष्वधीती भवति । ननु 'नमोऽस्तु ते' इति पूर्वतनश्लोकादाकृष्यताम् । कोऽयमाकर्षणमोहः? यदप्रयोगेणैवापूर्वमर्थमाविश्चकार भगवत्पादः । यन्मौनेनैव सुग्राहं तदर्थं को न्वात्मानं मुखरयति? किमपूर्वमाविश्चकार? न ममेति ममता-निषेधः किल नमःपदार्थः । यस्य ममकार एव न सम्भविता स कथं नाम नमस्कारेण तन्निवारणं प्रार्थयते । अत एव प्राचीनाचार्या आहुः– 'स्तौति सम्बोधनेनैव नो नमस्यन् नचार्थयन्' इति । तर्हि कथं प्रथमं 'ज्ञानमूर्ते नमोऽस्तु ते' इत्याह ? 'तस्मै देव नमस्येऽहम्' इति च । 'नत्वा सूत्रार्थ उच्यते' इत्याद्यन्यत्र च । कोऽयं पाश्चात्यो ज्ञानोदयः? ननु भोस्तर्हि कथं 'नारायणं नमस्कृत्य' इति भगवत्तमः स्वयमेवाऽह । तत्र भवतो यत् समाधानं तदेवात्र नः समाधानं भवति । 'नारायणं नमस्कृत्य' जयमधीहि इति विनेयान् ग्राहयन्नाह तथेति किल वक्तव्यम् । समं तर्हि समाधानम् । भगवानाचार्योऽपि शिष्यान् ग्राहयितुं

१. '**नचार्चयन्**' पा.

२. इति चिह्नान्तर्गतो भागः सर्वत्र कोशेषु लुप्तः । अध्ययनसौकर्यायार्थानुगुणं पूरितः ।

29-3-2006

सम्प्राप्तममकारान् वै नमोनम इति क्वचित् ।
अन्तपारौ न यस्य स्तोऽनन्तपारः स वै हरिः ॥ ३४४ ॥

अन्त उत्पत्तिनाशौ तु पारः सीमा हि देशतः ।
असङ्ख्येयाद्भुतानादिविक्रमोऽमितविक्रमः ॥ ३४५ ॥

अकर्तुमन्यथाकर्तुं कर्तुं शक्तः स ईश्वरः ।
प्रभुः सर्वस्य जगतो रमाया अपि स प्रभुः ॥ ३४६ ॥

शेषोऽनन्तस्तथा नित्यस्तत्पालोऽलं जनार्दनः ।
नित्यं स पाति चाक्षीणस्त्वपि नित्यस्य नित्यताम् ॥ ३४७ ॥

महद्भिश्च गुणैराढ्यः पूज्यैरप्यधिकैरपि ।
अनन्तसत्त्ववान् सत्त्वं बलज्ञानसमुच्चयः ॥ ३४८ ॥

श्रीनिवासोऽखिलं यस्य महोऽशेषमहाः स हि ।
नैजः सर्वगुणोत्कर्षः सर्वेभ्यो मह उच्यते ॥ ३४९ ॥

यस्य ब्रह्मादयो ह्याढ्याः गुणभूताः स एव हि ।
गुणाढ्यो विपरीतोऽयं समासः कथितो भवेत् ॥ * ॥ ३५० ॥

भाभाभाभाभा
भाभाभाभाभाभाभा ।

क्वचित् नमस्करोति । स्वयं ममकाररहित इति न मे नमेदेवेति निर्बन्ध इति क्वचिन्न नमस्करोतीति । जतजाश्च गौ चेत्युपेन्द्रवज्रा ॥ ७६ ॥

भगवानेव सर्वगुणोदीर्ण इति स एव सर्ववेदार्थ इति तस्मिन्नेव सर्ववेदपदाक्षर-समन्वयं ज्ञापयन् भकारस्य भगवत्परत्वं तावदाह– भाभा । भकारवाच्य अ विष्णविति सर्वत्रान्वयः । आकारस्य पूर्वं विश्लेषेण आ सम्यक् भशब्दार्थेति च । प्राचीनटीकायामेतत् स्फुटम् । सम्बोधने प्लुतमित्येके ।

अष्टाविंशतिभकारेयमुष्णिक् । अथवा मात्राच्छन्दःप्रभेद एवायम् । षड्भि-र्भाकारैर्द्वादशमात्रौ प्रथमतृतीयपादौ । अवशिष्टैरष्टभिर्भाकारैः षोडशमात्रौ

भाभाभाभाभाभा
भाभाभाभाभाभाभाभा ॥ ७७ ॥

भ । आ ।– ॥ ७७ ॥

इति सामान्यतोऽनन्तगुणशक्तिक्रियात्मके ।
सिद्धे नारायणे तत्रानन्तवेदपदान्यपि ॥ ३५१ ॥

प्रत्येकं योगवृत्त्या हि वर्तमानानि केशवे ।
अनन्तगुणतां विष्णोर्विशेषाज्ज्ञापयन्ति हि ॥ ३५२ ॥

इत्याह भा इति श्लोकं सर्वशब्दोपलक्षणम् ।
अतो विष्णोः परो नान्यस्तच्छब्दा अपि यद्धरौ ।
मुख्यतोऽन्येषु तत्सङ्गादत्यल्पेन निमित्ततः ॥ ३५३ ॥

श्रीमत्सन्दीप्त नाकादुपरि परतमाकुण्ठलोकेषु जीवे
बाह्ये सर्वज्ञ भूमिप्रभृतिपरमखान्ताखिलाधारभूत ।
नित्यं चोदार लोकेष्वगणितविबुधाभीष्टमोक्षादिदाने
सन्धाने कर्मणां च स्वत उत रजसः सन्नुपादेयपाद ॥ ३५४ ॥

सर्वेषां सज्जनानामतिनिकट सुरैः सेव्य चोरीकरोषि
त्वं तेषामिष्टमन्यान् नमयसि[1] निखिलांस्त्वं हि नानावतारैः ।
नानाभावेन वाऽथाखिलहृदयग सन्नम्य सद्भिः समस्ताद्
वैलक्षण्येन युक्ताधिक सुरनिकरात् सर्वदाऽपि स्वतन्त्र ॥ ३५५ ॥

द्विमात्रोनौ द्वितीयतुरीयपादाविति । भकारस्याष्टाविंशतिरर्थाः सर्वविदा भगवत्पादैनैव निरूपिताः । तेनैव साक्षादधीततीर्थाभ्यां श्रीहृषीकेशनरहरितीर्थाभ्यां समधिगतपरमार्थाभ्यां यथावत् सङ्गृहीताः । द्वात्रिंशद्भकारान् पठन्तोऽपपाठेऽपार्थे लुठन्तो भ्रान्ता एव । प्राचामाचार्याणां वचोऽनुसारेण चायं पद्यार्थः–

---

१. **'–न्यान् नयसि'** इति क्वचित् पठ्यते । लिपिकृत्प्रमादोऽयम् । **'अन्यान् नमसि च'** इति च क्वचित् । तदा त्वयमर्थः । अन्यान् त्वदवरान् दशरथवसुदेवादीनपि अवतारेषु लीलया नमसीति ।

तस्मादानन्दपूर्णानवरतवचनाशेषपूज्यार्चकानां
मुक्तौ विस्तारकर्तस्तदितरकुमतीन् नाशयस्येव नित्यम् ।
स्वामिन्नद्धोभयेषां सततमपि विभो निश्चलस्वामिभावा-
त्युग्रातो नैव चान्यः कथमपि भवतः स्वामितां हन्तुमीष्टे ॥ ३५६ ॥

तस्मादुद्वेय सर्वैरथ च कुमतयो नैव गायन्ति ये त्वां[1]
तेषां संमोहकर्तर्निखिलहृदयसञ्चारिरूपासुरांस्त्वम् ।
सर्वेशोऽहं[2] न चान्यो मदिति निगदतो दारयन् वीरसिंह
ह्यालोच्येत्थं प्रमाणैर्विधिभवमुखरैः सर्वसौन्दर्यसार ॥ ३५७ ॥

दीप्तौ ज्ञाने भ आधारभाव[3] औदार्ये एव च ।
सन्धाने भ उपादाने निकटत्वे च कथ्यते ॥ ३५८ ॥

भ सेव्यत्वे च विद्वद्भिरूरीकरण एव च ।
सम्पूर्णनतिभावे भा नानाभावे च कथ्यते ॥ ३५९ ॥

---

१. भा दीप्तौ । आ भातीति आभ, श्रीमन्, दीप्तिमन् । आ समन्तात् नाकादुपरि परतमाकुण्ठवैकुण्ठादिनित्यलोकेषु नित्यं सन्दीप्त । जीवजातस्य आ समन्तादन्तर्बहिश्च सन्दीप्त । 'भा' इत्याबन्तानि वा पदानि भगवतः स्त्रीरूपस्य स्तुतिपराणि । भ इति भगवानुच्यते । भमिति परं ब्रह्म । भेति परदेवता ।

२. भा ज्ञाने । आभ समन्तात् सर्वं जानन् सर्वज्ञ ।

३. भ आधारभावे । आभ आ समन्तात् भूमिप्रभृतिपरमाकाशान्तानामखिलानामाधारभूत । तृणादिब्रह्मान्तानामखिलजीवानां चाऽधारभूत ।

४. भ औदार्ये । आभ आ सम्यगुदार । अगणितानां विबुधाभीष्टानां मोक्षादीनां दाने नित्योदार ।

---

१. **'गायन्ति तं त्वाम्'** पा. २. **'सर्वज्ञोऽहम्'** पा.

३. **'आधारे भ भ औदा–'** इति सर्वत्र पठ्यते । अयं सम्भावितः पाठः ।

वैलक्षण्ये तथाऽधिक्ये स्वातन्त्र्ये भ उदीर्यते।
भ आनन्दे भ सम्पूर्णततवादेऽपि कथ्यते ॥ ३६० ॥

पूज्यभावे भ विस्तारे भ विनाशन ईर्यते।
स्वामित्वे निश्चले भाव ओग्ग्र[१] उद्गान एव च ॥ ३६१ ॥

---

५. भ सन्धाने। आभ आ सम्यक् स्वरूपभूतानां रजःप्रभवानां च कर्मणां सन्धाने सन् सन्निहित। सन्धातरिति यावत्।

६. भ उपादाने। आभ आ सम्यक् सद्भिरुपादेयपाद।

७. भ निकटभावे। आभ आ सम्यक् सर्वेषां सज्जनानामतिनिकट।

८. भ सेव्यत्वे। आभ सुरैः सेव्य।

९. भ ऊरीकरणे। आभाति सुरानूरीकरोतीति तादृश। तेषां यदिष्टं तदेव चोरीकरोतीति च।

१०. भ सन्नतिभावे। तदन्यानसुरान् आ समन्तात् नानावतरणैः नमयतीति। सद्भिः सम्यङ् नम्यत इति च।

११. भ नानाभावे। आभ नानाभावेन नानाप्रकारेणाखिलहृदयगत।

१२. भ वैलक्षण्ये। आभ समस्ताज्जगतो विलक्षण।

१३. भ आधिक्ये। आभ ब्रह्मादिसुरनिकरादप्यधिक।

१४. भ स्वातन्त्र्ये। आभ सर्वदाऽपि स्वतन्त्र।

१५. भ आनन्दे। आभ पूर्णानन्द, स्वातन्त्र्यादेव।

१६. भ सन्ततवचने। आभ अनवरतवचन। 'अखिला वेदा उद्गीर्यन्ते यतोऽनिशम्' इति हि स्वयमेवाह।

१७. भ पूज्यभावे। आभ अशेषपूज्य।

---

१. **'निश्चले भावे भ भ उद्गान एव च'** इति प्रचलितः पाठः। एवं सर्वत्रापि धातुपाठे बहवः पाठभेदाः। अयं तु हृषीकेशतीर्थीयपाठानुसारी परिशुद्धः पाठः। तथाहि हृषीकेशतीर्थीये पाठः–

29-3-2006

सम्मोहने भ सञ्चारे भ विदारण ईर्यते।
आलोचने भ सौन्दर्य इति सर्वविदीरितम् ॥ * ॥ ३६२ ॥

---

१८. भ विस्तारे। आभ पूजकानां मुक्तौ स्वरूपविस्तारकर्तः।

१९. भ विनाशने। आभ तदितरेषां द्विषां नाशक तमसि पातनेन।

२०. भ स्वामिभावे। आभ उभयेषां पूजकानां सुमतीनां द्विषां च कुमतीनां स्वामिन्। तेनैव सुमतयः सुमतयः। तेनैव च कुमतयः कुमतय इति।

२१. भ निश्चलभावे। आभ निश्चलस्वामिभाव।

२२. भ उग्रभावे। आभ अत्युग्र दुष्टानाम्। तेन न कोऽपि ते स्वामितां विहन्तुमीष्टे।

२३. भ उद्गाने। आभ तत एव सर्वैरुद्गेय।

२४. भ सम्मोहने। आभ ये न गायन्ति कुमतयस्तेषां सम्मोहन।

२५. भ सञ्चारे। आभ निखिलहृदयसञ्चारिन्।

२६. भ विदारणे। आभ ये न मत्तोऽन्यद् ब्रह्मेति वदन्ति तेषां विदारण वीरसिंह।

---

१. भा दीप्तौ।	१०. भ सन्ततिभावे।	१९. भ विनाशने।
२. भा ज्ञाने।	११. भ नानाभावे।	२०. भ स्वामिभावे।
३. भ आधारभावे।	१२. भ वैलक्षण्ये।	२१. भ निश्चलभावे।
४. भ औदार्ये।	१३. भ आधिक्ये।	२२. भ उग्रभावे।
५. भ सन्धाने।	१४. भ स्वातन्त्र्ये।	२३. भ उद्गाने।
६. भ उपादाने।	१५. भ आनन्दे।	२४. भ सम्मोहने।
७. भ निकटभावे।	१६. भ सन्ततवचने।	२५. भ सञ्चारे।
८. भ सेव्यत्वे।	१७. भ पूज्यभावे।	२६. भ विदारणे।
९. भ ऊरीकरणे।	१८. भ विस्तारे।	२७. भ आलोचने।
		२८. भ सुन्दरभावे॥

अत्र दशमं धात्वर्थं विहायान्यत् सर्वं समानम्। दशमस्तु **'भ सन्नतिभावे'** इति नरहरितीर्थाभिमतः पाठः। **'सन्ततिभावे'** इति हृषीकेशतीर्थलिखिते मूलादर्शे। महतामपि हस्तस्खलनं सम्भाव्यते। नरहरितीर्थीयविवरणेन संवादात् **'सन्नतिभावे'** इत्येव पाठः साधीयानिति भाति॥

२७. भ आलोचने। आभ सर्वप्रमाणैर्ब्रह्मरुद्रादिभिरित्थमालोचनीय।
२८. भ सुन्दरभावे। आभ सर्वसौन्दर्यसार। एवमनया दिशा शताधिका अर्था अनुसन्धातुं शक्याः।

एवं प्राचीनटीकानुसारेण एकैकमप्यक्षरं प्रत्येकं पदमिति विवक्षित्वा व्याख्यायि। अपिच समस्तपदतयाऽपि परःशतमर्थाः परिस्फुरन्ति। तत्र तावन्निदर्शनार्थं भगवत्पादोदाहृतधातुपाठमनुसृत्य कतिचनार्थविशेषाः सम्प्रति प्रदर्श्यन्ते।

भा दीप्तौ। भान्तीति भानि नक्षत्राणीति प्रसिद्धम्। तानि न भान्त्यनेनेति भाभः सूर्यः। सोऽपि भगवताऽऽभाति। 'यदादित्यगतं तेजः–' इत्यादेः। सोऽपि भगवति न भातीति वा। 'न तत्र सूर्यो भाति–' इत्यादेः। अथवा भानि नक्षत्राणि, आभानि सूर्यचन्द्रादीनि च ज्योतींषि न भान्ति यत्र, येन वा तानि आभान्ति स भगवान् भाभाभ उच्यते।

आभातीति आभः सूर्यः। तद्वदाभातीति आभाभः। आभातीत्याभश्चन्द्रः। तद्वदाभाति वा। हे आभाभ प्रोद्यदादित्यवर्ण सहस्रचन्द्राधिककान्तिकान्त।

स्वयं तु तत्र आविष्टो भाति। पादान्ते श्रूयमाणस्य आङः पूर्वत्रान्वयः - आ सम्यक् सर्वाधिकत्वेनाऽभातीति। तेन आ आभ। तथाच प्रथमपादे प्रतृण्णम्– भाभाभ+आभाभ+आभ+आ॥

भानि आभान्त्यत्रेति भाभं नभः। तद्वत् सर्वगत आभातीति भाभाभः। 'आकाशवत् सर्वगतश्च नित्यः', 'आकाशशरीरं ब्रह्म' इत्यादेः। हे भाभाभ आकाशवत् सर्वत्र भासमान। तदाभस्तन्निभो वा। तत्र आभाति वा।

अभानि अभानवन्ति भूतानि। आभानि भानवन्ति भूतानि। तानि च तानि च अभाभानि अनेनैव अभानि आभानि च भवन्तीति अभाभाभाभः। तेषां पारतन्त्र्यात्। स्वयं त्वाभाति सर्वत्र सदा स्वतन्त्रो भवति। भ स्वातन्त्र्ये।

अन्ते पुनरकारः। 'अः इति ब्रह्म' इति श्रुतेः। तथाच द्वितीयचरणे प्रतृण्णम्– भाभाभ+अभाभाभाभ+आभ+अ॥

भा ज्ञाने। भ विस्तारे। भान्तीति, भाः ज्ञानिनः। न भान्तीत्यभा अज्ञानिनः। भाभानां यथाक्रमं यथायोग्यं च आभां प्रज्ञां अभामज्ञानं च भाति विस्तारयतीति भाभाभाभाभः। सतामभां अज्ञानं भति नाशयतीति अभाभः। भ विनाशने। आभान्तीत्याभा देवाः। तेषामाभां प्रतिभां भाति विस्तारयतीति अभाभाभः। आभाति ईषज्ज्ञानातीत्याभं जीवजातम्। न किमपि भाति जानातीत्यभं जडजातम्। अनयोर्जीवजडयोः आभं सन्धानरूपं जन्म, अभमसन्धानरूपं मरणं च येन सः। देहयोगवियोगाख्यजन्ममृतिप्रद इत्यर्थः। आभस्य जीवस्य अभेन जडेन आभं सन्धानमभं विसन्धानं च येनेति च। भ सन्धाने। तथाचोत्तरार्धे पदपाठः– भाभाभाभ+अभाभ+अभाभाभ+ आभाभाभ+आ (याहि)। अन्ते श्रूयमाण आङ् याहीति क्रियापदमाक्षिपति। उपसर्गाः क्रियापदमाक्षिपन्तीति न तिरोहितमेतद् वेदसम्प्रदायविदाम्॥ ✻ ॥

अथ द्वितीयं व्याख्यानम्– भा आधारे। भान् लोकधारकान् ब्रह्मादीनपि आभाति आधरतीति भाभः। भ औदार्ये। अभानामनुदाराणामदानशीलानां लुब्धानां स्वयमप्यभोऽनुदारः। तेषां वित्तं हृत्वा भिक्षाटमाटयतीत्यर्थः। तेन अभाभः। भ सन्धाने। अभान् असंहितान् आभाति सन्धत्ते पतिपद्यादिरूपेणेत्यभाभः। भ उपादाने। अभमभक्तदत्तमनुपादेयं न भाति नोपादत्त इत्यभाभः। नोरीकरोति वा। भ ऊरीकरणे। आभा भक्तत्वेनो-पादेयाः, तैराभैः आभमुपायनीकृतं पत्रं पुष्पं फलं आ सम्यक् प्रीतिपूर्वकं भाति स्वीकरोतीति आभाभाभः। भ निकटत्वे। पादान्ते श्रूयमाणं आङ् पूर्व-त्रान्वेति। आ अतिशयेन अभानां अनिकटानाम्, दूरगतानां दैत्यानाम्, अभा दूरतरा आभा स्वरूपप्रभा प्रज्ञा वा यस्य तादृशः। तथाच पूर्वार्धे प्रतृण्णम्– भाभ+अभाभ+अभाभ+अभाभ+आभाभाभ+ अभाभाभ+आ॥

अथ भान् ज्ञानिनो भक्तानाभात्यूरीकरोतीति भाभः। अभानभक्तान्न भाति न स्वीकरोतीति अभाभः। आभया स्वरूपप्रभया भातीत्याभाभः। भ नाना-भावे। भ वैलक्षण्ये। भ आनन्दे। आभेषु नानाविधतया भिन्नेषु भूतेषु विलक्षणं आभमानन्दमभं दुःखं च आभाति आतनोति विस्तारयतीति आभाभाभाभाभः। भ उग्रभावे। अभं भक्तानामनुग्रम्, आभमभक्तानामत्युग्रम्, आभमानन्दमयं स्वरूपमस्येति अभाभाभः। भ आधिक्ये। भ सुन्दरभावे। आभं सर्वविलक्षणं आभं सर्वोत्तमं आभं परमसुन्दरं वपुरस्येति वा। भ विनाशने। आभेभ्यः नश्वरेभ्यः क्षरजीवेभ्यः, अभायाः अक्षरायाश्च लक्ष्म्याः भाति अधिको भवतीति समतीतक्षराक्षरो वा आभाभाभः। अन्ते पुनरकारेण सर्वस्मादधिकत्वं सर्वदोषाणामभावं सर्वगुणसमृद्धिं च निगमयति। 'अकारो वै सर्वा वाक्' इति श्रुतेरुक्तसर्वगुणोपसंहारश्चायम्। तथाचोत्तरार्धे प्रतृण्णम्– भाभ+अभाभ+आभाभ+आभाभाभाभाभ+अभाभाभ+अ ॥ ✻ ॥

न केवलमेतावत्। भकारारम्भपदवाच्या बहवोऽर्था भकारवाच्या भवन्ति। 'भा' इति भारतम्। 'भा' इति भागवतम्। 'भा' इति भारती। 'भ' इति भरतः। 'भ' इति भक्तः। 'भ' इति भगवान्। एवं क्रियापदं विनैव समग्रं पद्यं व्याख्यातम्। सक्रियापदं च व्याख्यानं भवति। तद् यथा 'भाभा' इति। भ ज्ञानानन्दमय भगवान् अभाः व्यद्योतथा इत्यादि। दिङ्मात्रदर्शनमिदम्। अनयैव दिशाऽन्येऽप्यर्था अनुसन्धेयाः। अनन्तार्थमिदं पद्यम्। भकारस्यार्थविशेषाश्चा-स्मत्कृतायामेकाक्षरनाममालायां द्रष्टव्याः। ग्रन्थविस्तारो मा भूदित्येवेवोप-रम्यते ॥ ✻ ॥

अथ भगवदवतारकथाश्चात्र शक्यमनुसन्धातुम्। तथाहि पूर्वार्धेन मत्स्या-वतारं प्रस्तौति– भाभेति। भानि नभसि भासमानानि चन्द्रतारकादीनि ज्योतींषि प्रतिफलितानि सन्ति आभान्त्यत्रेति भाभमम्भः। भाभे प्रळयाम्भसि आभाति सञ्चरतीति भाभाभः। भ सञ्चारे। चरित्वा च आभमत्युग्रं वेदापहारिणं हयग्रीवासुरं आभाति विनाशयतीति भाभाभः। विनाश्य च आभान् निरन्तरं

भगवद्गुणवाचिनो वेदान् आभासयति प्रकाशयतीति आभाभः। भ सन्तत-वचने। भ निश्चलभावे। अभं चञ्चलं मत्स्यरूपं प्रथमं सत्यव्रताञ्जलिपुटमेयं पश्चादाभाति विस्तारयति प्रळयाम्भसि विततरूप इत्यभाभः। तत्र आभेन निरन्तरोपदेशेन सत्यव्रतस्य मुनीनां च अभाया अविद्याया भः विनाशक इति आभैः ज्ञानिभिः आभायत उद्गीयत इत्याभाभाभः। अकारवाच्यश्च। भ उद्गाने। तथाच पूर्वार्धे प्रतृण्णम्–भाभाभ+आभाभ+आभाभ+अभाभ+आभाभाभाभाभ+अ ॥

अथ कूर्मो धन्वन्तरिर्मोहिनी च। भ आधारे। भान्ति धरन्तीति भाः धराः पर्वताः। तेषु विशिष्टतया आभातीति भाभो मन्दरः। तं पृष्ठे आभाति धत्ते इति भाभाभः कूर्मः। भ निश्चलभावे। अचलस्याधस्तात् त्वमप्यपरोऽचल इव आभः निश्चलो भवन् अभाः प्राकाशथाः। तथाच तृतीयपादे प्रतृण्णम्– भाभाभ+आभाभ+अभाः ॥

भ स्वामिभावे। भातीति भान् अमृतदानेन देवानां स्वामी भवन्, न भान्ति न विनाशिनो भवन्ति येन तेन अभेन अमृतेन सह आभातीति भाभाभो धन्वन्तरिः। भ सुन्दरभावे। आभया सुन्दरतरया तन्वा भातीति आभाभं मोहिनीरूपम्। तेन आभानत्युग्रानसुरान् आभान् विमोहयन् आबभाविति आभाभाभाभाभः। भ सम्मोहने। स्त्रीरूपोऽपि स्वयमः परं ब्रह्मैव। तथाच तुरीयचरणे प्रतृण्णम्– भाभाभ+आभाभाभाभाभ+अ ॥ ✻ ॥

अथ वराहः। भाति लोकजातं भरतीति भा भूः। भायाः भे विनाशने प्रवृत्तस्य आभस्य अत्युग्रस्य हिरण्याक्षस्य आभो विनाशनो वराहः। तेन आ समन्तात् भां भूमिमाबभारेति। आ आनन्दरूप। तथाच प्रथमचरणे प्रतृण्णम्– भाभाभाभ+आभाभ+आ ॥

अथ नृसिंहः। भानां विनाशकानामयमाभः। मृत्युमृत्युं हि तं वदन्ति। आभः अत्युग्रो हिरण्यकशिपुः। भ विदारणे। तस्य आभस्य हिरण्यकशिपोः

आभानि हृदयविदारणानि, आभातीत्याभं वज्रं तदाभानि नखराणि तैराभातीति तादृशः। अथापि प्रह्लादे अभोऽनुग्रः आ समन्तात् सर्वात्मनेति। अकारवाच्यत्वाद इति वा । तथाच द्वितीयचरणे प्रतृण्णम्– भाभ+आभाभाभाभाभ+ आभ+आ(अ) ॥

अथ वामनः । भाया भूमेः पदत्रयमिताया भमूरीकरणम् । तदर्थं अभमनुग्रस्वभावं भक्तमपि बलिं आभाति सम्मोहयति। ततश्च त्रिविक्रमो भवन् आभे, न भातीत्यभे वा नभसि आ समन्तादाभाति। तथाच तृतीयचरणे प्रतृण्णम्– भाभाभाभ+अभाभ+आ ॥

अथ भार्गवः। भायां भूमौ क्षत्रियकुलेषु जनित्वा भासमानान्, आभानत्युग्रान् अत एव भूमेराभान् विनाशकान् आभाति विनाशयतीति तादृशः। तथाऽप्यभानामनुग्राणां भानां वा ज्ञानिनां भक्तानां भीष्मद्रोणादीनामाभः सन् आत्मज्ञानप्रदः सन्ना समन्तादाभाति। तथाच तुरीयचरणे प्रतृण्णम्– भाभाभाभाभ+ अभाभाभ+आ ॥ ❊ ॥

अथ रामकथापरतया पञ्चमं व्याख्यानम्। भायां यज्ञभूमौ भाति प्रकाशत इति भाभा सीता। तस्या भरणात् भाभाभः श्रीरामः। अभे नभसि आभान्तीति अभाभा गगनचुम्बिनो वृक्षाः । अभाभैराभातीति अभाभाभा अटवी । तत्र भान् सञ्चरन्नाभाति। भ सञ्चारे। तत्र चाटव्यां आभान् अत्युग्रनाभाति संहरतीति आभाभः। अथ चाभैः सौम्यैः आभैर्ज्ञानिभिर्मुनिभिः आभातः पूजितः सन् तान् स्वयमाभाति लोकशिक्षार्थं प्रणमति। भ पूज्यत्वे। भ सन्नतिभावे। असदृशत्वादश्च । तथाच पूर्वार्धे प्रतृण्णम्– भाभाभ+अभाभाभाभाभ+आभाभ+ आभाभाभाभ+अ ॥

भः ज्ञानी। अभश्चञ्चलः कपिरित्यभाभः कपिसन्निभाकारः प्रभञ्जनः। तेन भातः सेवित इति भाभाभाभः। भैः ज्ञानिभिः अभाभैः कपिरूपैर्देवांशैः सुग्रीवादिभिः सेवितो वा । भं ज्ञानिनमिन्द्रावतारमभाभं कपिरूपं वालिनमभाद-

हन्निति वा। अभः राक्षसकुले जातोऽपि अनुग्रस्वभावो विभीषणः । तमाभात्यूरीकरोतीति अभाभः । अभं सौम्यमेनं सोदरं यो न बभौ नोरीचकार, प्रत्युत निराचकार, तमभाभं दशकन्धरं आभाति विनाशयतीति तादृशः। अभां निष्प्रभां विरहदूनां सीतां भेन अग्निना द्वारभूतेन आभाति स्वीकरोतीति तादृशः । अभां तेन विना गतप्रभामयोध्यां आ समन्तात् आ सम्यग् भासयामासेति आ अभाभः । तथाचोत्तरार्धे प्रतृण्णम्– भाभाभाभ+अभाभ+ अभाभाभ+अभाभाभ+ अभाभ+आ ॥ ❊ ॥

अथ कृष्णकथापरतया षष्ठं व्याख्यानम् । भानि नक्षत्राणि भान्ति यस्यां तस्यां भाभायां निशायां आभाति आविर्भवतीति भाभाभः । अभात् शोभाहीनात् कंसनगरात् कारागारराद् वा आभां शोभमानां व्रजभूमिं भाति चरतीति अभाभाभः। भाति याति वा। तृतीयोऽतिशये। अजत्वादः। तथाच प्रथमचरणे प्रतृण्णम्– भाभाभ+अभाभाभ+अ ॥

भाः सञ्जातयौवनशोभाः अभाः मदनचपलाः गोपवधूटीः भाति सम्मोहयतीति भाभाभः। आभे अत्युग्रे विषोद्बणे काळीये नृत्यन्नाभातीति आभाभः। आभान्ति परितः सञ्चरन्त्यो भासन्त इत्याभा धेनवः । वृषभाश्च आभाः । ताश्च ते च भान्ति सञ्चरन्त्यत्रेति आभाभं वृन्दावनम् । तत्र गोभिर्गोपैश्च सह आभाति सञ्चरति । सञ्चरन्नाभाति चेति आभाभाभः । वृन्दावनान्तःसञ्चारी । सर्वविलक्षणत्वादश्च । तेन द्वितीयचरणे प्रतृण्णम्– भाभाभ+आभाभ+ आभाभाभ+ अ ॥

भं उग्रं शिवधनुः, उग्रं भं इभं च कुवलयापीडं नाशयामासेति भाभः। अभान् हतप्रभान् आभान् अत्युग्रान् चाणूरादीन् पञ्च मल्लान् स्वयं च बलरामद्वारा च नाशयामासेति अभाभाभः। तत आभान् रङ्गे सञ्चरन् अभं गतप्रभं कंसं सञ्जहारेति आभाभाभः । आभात इत्याभे रुग्मिणीसत्यभामे । आ भान्तीति आभाः षण्महिष्यश्च, शतोत्तरषोळशसहस्रस्त्रियश्च । ते च ताश्च ताश्च भाः भार्याः

29-3-2006

भार्यात्वेनोरीकृता अनेनेति आभाभः । ज्ञानभक्तिभ्यामाभान्तीति आभानां अभनानां साधुचरितानां वा पाण्डवानाम्, अभैरज्ञानिभिः हतप्रभैः, आभैरत्युग्रैर्वा कौरवैः सह अभ अकृतसन्धान । आभ त्रिजगन्मोहन त्रिभुवनसुन्दर । अश्च अनन्तः । तथाचोत्तरार्धे प्रतृण्णम्– भाभ+अभाभाभ+आभाभाभ+आभाभ+आभाभाभ+आभ+अ । पूर्ववदा आयाहीति वा । वस्तुतस्तु पादान्ते पठ्य-मानस्य दीर्घस्य गानाङ्गतया नार्थविशेषो गवेषणीयः । तद् यथा–'पालया कमलालया–' इत्यादिषु । अपिच अनेनैव भगवतः स्त्रीरूपाण्यपि वर्णितानि स्युरिति भावेन 'भाभा–' इत्याह । भं च भगवान् । भश्च भगवान् । भा च भगवानिति ॥ ✼ ॥

अथ बादरायणः । भासयति भगवन्तमिति, भगवन्मातृत्वेन भाति, भगवन्तं प्रसूयाऽपि कन्यात्वेन भातीति च भा कृष्णप्रभा काळी । तस्या भे निकटे आविर्भवतीति भाभाभो भगवान् वेदव्यासः । आ समन्तात् भापयन्ति प्रकाशयन्ति वेदार्थमिति आभानि पुराणानि । विशिष्य च भद्वयं भारतं भागवतं च, अयमेव प्रकाशयामासेति आभाभः । अभाया अविद्याया भाय भेदनाय आभ आविर्भूतः । गळे नील आभातीति संहरतीति वा आभं भवं शुकात्मानं पुत्रत्वेनोरीकरोतीति आभाभः । अभैरज्ञानिभिरसद्भिः अभां निरानन्दां आ समन्ताद् भां भूमिं भारतीं वा भासयत्यानन्दयति चेति अभाभाभाभः । अगम्यत्वादः । तथाच पूर्वार्धे प्रतृण्णम्– भाभाभ+आभाभ+अभाभाभ+आभाभ+अभाभाभाभाभ+आ ॥ ✼ ॥

अथ बुद्धः । भाः उग्राः अभा अज्ञानिनो ये दैत्यजनास्तानाभाति सम्मोह-यतीति भाभाभः । तामसानामभामज्ञानमुद्दीपयतीति अभाभः । सात्विकानामा समन्तात् भां प्रमां प्रशान्तविद्यां प्रकाशयतीति आभाभो वा । सर्वजगन्मोह-कत्वादाभः । अचिन्त्यत्वादः । तथाच प्रतृण्णम्– भाभाभ+अभाभ+(+आभाभ)+ आभ+अ ॥ ✼ ॥

नैवपरःकेशवतः
परमादस्मात्समश्चसुखकेशवतः ।
सोयंशपथवरोनः
शश्वत्सन्धारितस्सुशपथवरोनः ॥ ७८ ॥

न । एव । परः । केशवतः । परमात् । अस्मात् । समः । च । सुखकेशवतः । [सुखगेशवतः]॥ सः । अयम् । शपथवरः । [शपथबलः ।] नः । शश्वत् । सन्धारितः । सुशपथवरः । अनः ॥ ७८ ॥

अतो न केशवादन्यः परोऽस्ति गरुडध्वजात् ।
कश्चेशश्च विधीशौ तौ वर्तयन् स हि केशवः ॥ ३६३ ॥

समश्च तेन नान्योऽतः स हि सर्वेश्वरेश्वरः ।
सुखगेन्द्रः सुपर्णो हि तद्वान् स्याद् गरुडध्वजः ॥ ३६४ ॥

अथ कल्की म्लेच्छानां भमानन्दं आभां प्रमां च नाशयतीति भाभाभः । आ आशु भाति वाति सञ्चरतीति आभोऽश्वः । आभे आभाति सञ्चरतीति आभाभः । दुष्टानामाभः अत्युग्रः । सतामभः अनुग्रो वा । करे आभातीति आभं करवाळम् । तेन म्लेच्छान् विदारयन्नाभाभः । अनुपमत्वादः । तथाच प्रतृण्णम्– भाभाभ+आभाभ+आभ(+अभ)+आभाभ+अ ॥ ✼ ॥

एवमन्येऽप्यवतारविशेषा यथाप्रज्ञमनुसन्धेयाः । बहुज्ञा एव च विशेषार्थान् जानीयुः । विज्ञा एतावता जानन्ति । अज्ञानां दुराग्रहग्रस्तानां च सुबहुकथनेऽपि न किञ्चित् फलम् ।

कविरप्रयुक्तानि, अप्रसिद्धार्थानि च पदानि न प्रयोक्तव्यानीति कविसमयः चित्रकाव्यातिरिक्तविषयः । तेन नात्राप्रयुक्तत्वमप्रसिद्धार्थत्वं वा दोषः ॥ ७७ ॥

कं ब्रह्माणमीशमीशानं च सृष्टिसंहारयोर्वर्तयतीति केशवः । स्वयं च पालयन् रमत इति परमः । 'पॄ पालने' । सुखकेशवतः । गस्य कः । सुखगेशवतः ।

को गस्थाने समुद्दिष्टस्तृतीयोऽतिशये यतः ।
अर्थोऽयं श्रुतियुक्तिभ्यां पूर्वं सुप्रतिपादितः ॥ ३६५ ॥

शपथस्य बलेनाऽपि सोऽयमर्थोऽवधार्यते ।
सुशं विष्णुः सुखं वा तत्प्रणयत्सु वरो ह्यनः[१] ॥ ३६६ ॥

मोक्षदश्रीहरिज्ञानदात्राचार्यवरो [२]ह्यसौ । ॥ ❋ ॥

सुखगानामीशो गरुडस्तद्वतो वाहनतया । अत्र यत् केचिद् व्याचक्रुः– 'खस्य कस्थानत्वात् केति खग्रहणम् । नामैकदेशे नामग्रहणमिति न्यायात् खशब्देन खगशब्दो ग्राह्यः । तथाच सुखगेशवत इति पठितव्ये छन्दोभङ्गभयात् सुकेशवत इति पठितम्' इति । तदेतत् सर्वमज्ञप्रळपितम् । छन्दोभ्रान्तिः, पाठभ्रान्तिः, अर्थ-भ्रान्तिरिति दोषत्रयी शिरोमणिस्तेषाम् । लक्षणबद्धा स्फुटं गीतिरियमिति कथं छन्दोभङ्ग इति त एव प्रष्टव्याः । छन्दःपरिज्ञानविधुराणामीदृशा व्याहारा भवन्ति । सुखकेशवतः इत्येव मूलपाठः । तृतीयोऽतिशय इति नयेन सुखगेशः सुखकेशो बभूवेति प्राचीनटीकादृशां स्फुटम् । टीकां मूलं च व्याकुलयन्तः किमप्यसङ्गततमं भणन्तीति शोच्या एव ते । अस्मात् महाभारतप्रतिपाद्यात् परमात् केशवादन्यः पर उत्तमः समश्च नैव श्रूयते नापि विद्यते । 'केशवतः' इत्यनेन नियम्यतया ब्रह्मरुद्रवान् केशवान्, प्रशस्तकेशवांश्चेति निरुच्य दर्श-यतीव । सुखमयकेशवतश्च । कृष्णकेशाद्धि कृष्णो बभूव । सोऽयमर्थः शश्वत् सदा श्रुतियुक्तिभ्यां सम्यगवधारितः । तत एव च सोऽयं नः शपथवरः शपथ-श्रेष्ठः । 'शपथैरितमुच्छ्रितबाहुयुगम् । न हरेः परमः न हरेः सदृशः' इति स्व-वचनात् । अथच शपथवरः शपथबलः । शपथरूपं बलं यस्य । सोऽयं शपथेन बलवत् सम्यगवधारित इति । कथं वः शपथवरः? यतः सुशापथवरोऽनः । सुशं विष्णुरानन्दमयः, स्वरूपानन्दो वा सुशम् । तस्य पन्थानः प्राप्तिद्वाराणि

१. सर्वत्र व्याकुलः पाठः । अयमर्थानुगुणः सम्भावितः पाठः ।
२. **'–दाताऽऽचार्यवरो–'** पा.

कृष्णकथेयंयमिता
सुशतीर्थेनोदिताननेयंयमिता ।
भक्तिमतापरमेशे
[१]सर्वोद्रेकात्सदनुतापरमेशे ॥ ७९ ॥

कृष्णकथा । इयम् । यमिता । सुशतीर्थेन । उदिता । अनने । यम् । यम् । [यँयम् ।] इता ॥ भक्तिमता । परमेशे । सर्वोद्रेकात् । सदानुता । आप । रमेशे ॥ ७९ ॥

इति स्वानन्दतीर्थाख्यमुनिना यमकात्मना ॥ ३६७ ॥

मानैर्नियम्यते चाऽपि कृष्णस्येयं कथेत्यलम् ।
परमेशे रमेशेऽथ ह्यनस्य स्वस्य नेतरि ॥ ३६८ ॥

सुशपथानि, तेषु वरः किल अनः मुख्यप्राणः । 'स एनान् ब्रह्म गमयति' इति श्रुतिः । 'वायुश्च तदनुज्ञया' इति स्मृतिः । ततश्च प्राणावतारभूतः मोक्षदज्ञान-दात्राचार्यवरः स्वयं प्रतिजानामीति श्रोतॄनुल्लाघयति ।

१२+२०+१२+२० इति च्छन्दोगतिः । उत्तरपद्ये च ॥ ७८ ॥

इयं यमिता कृष्णकथा सुशतीर्थेन स्वानन्दतीर्थमुनिना उदिता । अति-शयार्थे सुः । तेन स्वस्य शतानन्दतामाह । यमिता यमकबद्धा प्रमाणैर्नियमिता च । समग्रं भारतमपि कृष्णस्यैव कथेति प्रमाणैर्नियम्य निरूपिता च । कीदृशेन सुशतीर्थेन? अनने अनस्य स्वस्य नेतरि परमेशे रमेशे भक्तिमता । भक्त्या तमेव सदानुता सदा स्तुवता । कृष्णकथा च सदानुता सद्भिरानुता । यं यमिति प्रथमो यच्छब्दः । द्वितीयो यशब्दः । ईसहितः लक्ष्मीसहितः अः यः श्रीविष्णुः । 'अकयप्रविसम्भूमसखहा विष्णुवाचकाः' इति वचनाद्वा य इति विष्णुः । यं यम्, यं श्रीविष्णुं इता प्राप्ता स विष्णुर्मयाऽऽप आपि । प्राप्त

१. **'सर्वोद्रेका'** इति हृ.ती. पाठ इति भाति । स्खलनं सम्भाव्यते ।

29-3-2006

भक्त्यैवोक्ता न चातुर्यख्यापनाय कथञ्चन ।
सदानुता सदास्तोत्रा कथा यं यं च सन्नुता ॥ ३६९ ॥

प्राप्तैषा कथिता नित्यं स मयाऽऽपं[१] न संशयः ।
अध्याहारः स इत्यस्य यत्तदोर्नित्ययोगतः ॥ ३७० ॥

यमित्येष द्वितीयोऽर्ण ईकाराकारभागवान्[२] ।
ईकारः श्रीरवो यस्मादकारो हरिवाचकः ॥ ३७१ ॥

अतः श्रीविष्णुमित्युक्तं भवत्यत्र न संशयः ।
अकयप्रेति वाक्याद्वा यकारो विष्णुवाचकः ॥ ३७२ ॥

अथवा यँयमप्येषा कथाऽतीव सुदुर्लभा ।
कश्चित्कश्चिन्नरं[३] प्राप्ता नैव सर्वं नरं भुवि ॥ ३७३ ॥

कश्चिदर्थे च यच्छब्द इति वाक्यात् तथा सति ।
कथा प्राप रमेशं यद् विषये सप्तमी मता ॥ ३७४ ॥

सर्वोत्कर्षात् कथायाश्च कृष्णस्याऽत्मन एव च ।
शब्दराशिषु देवेषु भक्तेषु च यथाक्रमम्[४] ॥ ॥ ३७५ ॥

इत्येतत् । यतः सदानुत् नुतिर्भगवन्तमाप । तेन नोता च भगवन्तमाप । 'तृतीयोऽतिशये' इति वचनात्, 'आपि' इति वक्तव्ये 'आप' इत्याह । निःसंशयमाप्त इत्यर्थः । यद्वा स श्रीविष्णुः सदा स्तुवता मया इमां सदास्तुतिरूपां कथामाप । अथच यँयमिति वीप्सा । 'कश्चिदर्थेऽपि यच्छब्दः' इति स्मरणात्, यँयमिता कश्चित्कश्चित् प्राप्ता पुण्यभाजम् । तादृशी दुर्लभेयं कृष्ण-कथा रमेशे विषये आप रमेशं प्राप । कुतः? सर्वोद्रेकात् नुवतो मम । सर्वोद्रेकात् कृष्णकथारूपाया अस्याः कृतेः । सर्वोद्रेकाच्च नुतस्य कृष्णस्य । शब्दराशिषु कृष्णकथाया उत्कर्षः । देवेषु कृष्णस्य । भक्तेषु स्वस्येति ॥ ७९ ॥

१. **'मयाऽपि'** इति पाठः सम्भाव्यते । २. **'–कारभेदवान्'** पा.
३. **'कापि कश्चिन्नरम्'** पा. ४. **'यथाक्रमात्'** पा.

इतिनारायणनामा-
ऽवकतीर्थम्पूजितस्सुरायणनामा[१] ।
पूर्णगुणैर्द्धिकपूर्ण-
ज्ञानेच्छाभक्तिभिस्स्वधिकपूर्णः[२] ॥८०॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं
महाभारततात्पर्य्यं
सम्पूर्णम्

—०—

इति नारायणनामा । अव । कतीर्थम् । पूजितः । सुरायणना । मा ॥ पूर्ण । गुणैः । धिक । पूर्णज्ञानेच्छाभक्तिभिः । स्वधिकपूर्णः ॥ ८० ॥

इत्युक्तेन प्रकारेण श्रीनारायणनामवान् ।
रमाजशङ्करोमादिसुराधारः परः पुमान् ॥ ३७६ ॥

हे गुणैः पूर्ण, धिक सर्वस्मादधिक । अवाप्योरिवाधेरप्यल्लोपो वक्तव्यः । 'वधिमवधिम्, अल्लोपेन' इति स्वयमेवाऽह भगवत्पादो भागवततात्पर्ये । पूर्णाः ज्ञानं च हरिसेवेच्छा च भक्तिश्च येषां तैरस्माभिः, पूर्णाभिर्ज्ञानेच्छाभक्तिभिर्वा मया इत्येवं वचःप्रसूनैः पूजितः त्वं कतीर्थमानन्दतीर्थनामानं मा मामव । सम्बोधनेन बोधितं मुखत आह– नारायणनामा सुरायणना स्वधिकपूर्णस्त्वमिति । नाराणां गुणानामयन इति नारायणः, तदेवान्वर्थं नाम यस्य । गुणैः पूर्ण इत्येतत् । सर्वाधिकत्वात् नारस्य नरसमुदायस्यायन इति नारायणः । तदेव विशिष्याऽह–

१. अत्र यानि च पाठान्तराणि– **'–नामा सुखतीर्थं पूजितः'** इति, **'–सुखतीर्थपूजितः'** इति, **'सुखतीर्थसुपूजितः'** इति च सर्वाण्येतानि भ्रममूलानि ।
२. **'पूर्णगुणाधिक....स्वधिकपूर्ण'** पा. नरहरितीर्थीयपाठेऽपि तुरीयचरणान्ते विसर्गो न पठ्यत इति भाति ।

29-3-2006

त्वमस्माभिः सुसम्पूर्णज्ञानेच्छाभक्तिभिः प्रभो।
पूजितोऽव सदाऽऽनन्दतीर्थं मामेव मे विभो[१] ॥ ३७७ ॥

पूर्ण सर्वगुणैर्नित्यं सर्वस्मादधिकाऽञ्जसा।
स्वधिकब्रह्मवाय्वादिदेववृन्दसुबोधन[२]।
या सदा हरिपूजायै सैवेच्छा मारुतस्य यत् ॥ ३७८ ॥

इत्थं संस्तूयते यः सततमपि महाभारताद्यैः सुशास्त्रै-
र्वेदव्यासोपदिष्टैरपरिमितसुखज्ञानमूर्तिर्महात्मा।
येनाऽऽद्यं श्रीनृसिंहं श्रुतिपतिमपि तं[३] सन्नमाम्युच्चभक्त्या
स्तोतारं तं च देवं सुरवरमुखरं श्रीमदानन्दतीर्थम्[४] ॥ ३७९ ॥

यैरेवं स्तुतिमापितोऽतिमहतीं श्रीविष्णुपादाम्बुजे
हंसा ये सुविवर्धितां च महतां स्नेहेन निष्कण्टकाम्।
संसेव्ये रमयाऽखिलापरमया ब्रह्मेशपूर्वैः सुरैः
श्रीमद्वारिजनाभतीर्थमुनिभिस्तेभ्यो गुरुभ्यो नमः[५] ॥ ३८० ॥

सुरायणना। रमाजशङ्करोमादीनां सुराणामयनो ना परः पुमान्। मुख्ये सम्प्रत्ययात्। नियामकतया नरसम्बन्धिनो नारा देवास्तेषामयन इति वा। नहि केवलं बहिरयणः, अन्तरयणोऽपीत्याह– स्वधिकपूर्णः। स्वधिकेषु

१. **'मे प्रभो'** पा. पुनरुक्तेरस्वरसम्।

२. सर्वत्रैवमेव पठ्यते। '–वृन्दसुपूरणः' इति पाठः स्वरसः।

३. **'श्रुतिपतिममितम्'** इति क्वचित् पाठः।

४. इत्थं यः स्तूयते तं श्रीनृसिंहं सन्नमामि ; येन स्तूयते तं च स्तोतारं श्रीमदानन्दतीर्थं सन्नमामि। सुरवराणामपि मुखे अग्रभागे रमत इति सुरवरमुखरः।

५. अखिला अप्यपरमा अवरा यस्यास्तयाऽखिलापरमया रमया, ब्रह्मेशपूर्वैः सुरैश्च संसेव्ये श्रीविष्णुपादाम्बुजे ये हंसायिताः, व्याख्यानेन सुविवर्धितां विस्तारिताम्, दुर्गमार्थामपि महतां ज्ञानिनां स्नेहेन निष्कण्टकितां सुगमीकृतामिमां महाभारततात्पर्याख्यां कृष्णस्तुतिं च यैरहं प्रापितः श्रीपद्मनाभतीर्थमुनिभिः, तेभ्यो गुरुभ्यो नमः। तदनुग्रहेणैवेयं व्याख्या समपादि समपूरि चेति।

दशमतिनाऽमितमतिना विरचितभारतनिर्णयस्य टीका।
सुरवरनरहरितुष्ट्यै नरहरिवरतीर्थनामिना रचिता ॥ ३८१ ॥

[श्रीमन्नृहरितीर्थार्यमुखाम्भोजविनिःसृतम्।
पीयतां सन्मधुकरैः कृष्णलीलामृतं शुभम्[१] ॥]

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमन्महाभारततात्पर्यानुक्रमणिका
श्रीकृष्णप्रकाशिका श्रीनरहरितीर्थविरचिता समाप्ता
श्रीकृष्णार्पणमस्तु

—०—

सुतरामधिकेषु, ब्रह्मादिषु देवेषु पूर्णस्तदन्तर्विततः। नारानयतेऽन्तर्नियन्तुमिति नारायणः। स्वधिकान् ज्ञानेन पूरयतीति च पूर्णः। नाराणामयनं ज्ञानं यस्मादिति च नारायणः। 'यस्माद् ब्रह्मेन्द्ररुद्रादि देवतानां श्रियोऽपि च। ज्ञानस्फूर्तिः' इति हि तलवकारभाष्यम्। इत्यन्वर्थ-नारायणनामा त्वमव मामिति।

१२+२०+१२+१८ इति मात्रागतिः ॥ ८० ॥

'भगवंश्चित्रकवितां लौकिकीं दर्शयन् किल।
गोप्यं भारतसङ्क्षेपमकृथा विश्वविस्मयम् ॥'

इति नारायणाचार्यवचस्याश्वासवर्धनम्।
श्रीमन्नृहरितीर्थीयं व्याख्यानं रोचनं सताम् ॥

इमामाचार्यगोविन्दः प्रमृष्टां शब्दतोऽर्थतः।
वितेने विमलां टीकां विनेयजनवाञ्छया ॥

इत्याचार्यगोविन्दस्य कृतिषु महाभारततात्पर्यविवृतिः
श्रीकृष्णचन्द्रिका समाप्ता

श्रीकृष्णार्पणमस्तु

—०—

---

१. इदमेकं पद्यं क्वचिदधिकं पठ्यते।